This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit. The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक
हस्तलिखित संग्रह

दाखल क्र M 587 विषय वेद (यजुः)
नाव. शुक्लयजुर्वेद काण्व संहिता
लेखक/लिपीकार बालकृष्ण जगन्नाथ
पृष्ठ १२४ काळ शके १७९९ पूर्ण/~~अपूर्ण~~

Checked 2012

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१ श्रीगणेशाय नमः। श्रीसरस्वत्यै नमः। श्रीगुरुभ्यो नमः
श्रीयाज्ञवल्क्याय नमः। हरिः ॐ। इषे त्वोर्जे त्वा वायव
स्थ। देवो वः सविता प्रार्पयतु श्रेष्ठतमाय कर्मणे। १।
आप्यायध्वमघ्न्या इन्द्राय भागं प्रजावतीरनमीवा अय
क्ष्माः। मा वः स्तेन ईशत माघशंसः। २। ध्रुवा अस्मिन्गो
पतौ स्यात बह्वीः। यजमानस्य पशून्पाहि वसोः पवित्रम
भागस्य
१

म
सि। ३। द्यौरसि। पृथिव्यसि मातरिश्वनो घर्मोसि। वि २
श्वधाः परमेण धाम्ना। १। दृंहस्व मा ह्वार्मा ते यज्ञप
तिर्ह्वार्षीत्। वसोः पवित्रमसि शतधारं वसोः पवित्रम
सि सहस्रधारं। २। देवस्त्वा सविता पुनातु वसोः पवि
त्रेण शतधारेण। सुप्वा कामधुक्षः। ३। सा विश्वायुः
सा विश्वकर्मा सा विश्वधायाः। इन्द्रस्य त्वा भागं सो
मेनातनच्मि विष्णो हव्यं रक्षस्व। ४। ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२ अग्नेव्रतपतेव्रतंचरिष्यामितच्छकेयंतन्मेराध्यतां इद
महमनृतात्सत्यमुपैमि १ कस्त्वायुनक्तिसत्वायुनक्ति
कस्मैत्वायुनक्तितस्मैत्वायुनक्ति कर्मणेवांवेषायवां
२ प्रत्युष्टꣳरक्षःप्रत्युष्टाअरातयोनिष्टप्तꣳरक्षो
निष्टप्ताअरातयः उर्वंतरिक्षमन्वेमि। ३ धूरसिधू
र्वधूर्वंतंधूर्वतंयोस्मान्धूर्वति धूर्वतंयं वयंधूर्वामः २

४ देवानामसिसस्नितमंवन्हितमंपप्रितमंजुष्ट
तमंदेवहूतमं अह्रुतमसिहविर्धानंदृꣳहस्वमाह्वार्मा
तेयज्ञपतिर्ह्वार्षीत् ५ विष्णुस्त्वाक्रमतामुरुवातायाप
हतꣳरक्षोयच्छंतांपंच देवस्यत्वासवितुःप्रसवेश्विनो
र्बाहुभ्यांपूष्णोहस्ताभ्याम् ६ अग्नयेजुष्टंगृह्णाम्यग्नी
षोमाभ्यांजुष्टंगृह्णामि भूतायत्वानारातयेस्वरभिवि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ख्येषम् ७ दृꣳहंतांदुर्याः पृथिव्यामुर्वंतरिक्षमन्वेमि
पृथिव्यास्त्वानाभौसादयाम्यदित्याउपस्थे अग्नेहव्य
ꣳरक्षस्व ८ ७ पवित्रेस्थोवैष्णव्योसवितुर्वःप्रसव
उत्पुनामि अच्छिद्रेणपवित्रेणसूर्यस्यरश्मिभिः
१ देवीरापोअग्रेगुवोअग्रेपुवः अग्रइममद्यय
ज्ञंनयतसुधातुं यज्ञपतिंदेवायुवम् २ युष्माइन्द्रो

वृणीतवृत्रतूर्येयूयमिंद्रमवृणीध्वंवृत्रतूर्येप्रोक्षिता
स्थ अग्नयेत्वाजुष्टंप्रोक्षाम्यग्नीषोमाभ्यांत्वाजुष्टं
प्रोक्षामि ३ दैव्यायकर्मणेशुंधध्वंदेवयज्यायै य
द्वोशुद्धाःपराजघ्नुरिदंवस्तच्छुंधामि ४ शर्मास्यवधू
तꣳरक्षोवधूताअरातयः अदित्यास्त्वगसिप्रतित्वा
दितिर्वेत्तु १ अद्रिरसिवानस्पत्योग्रावासिपृथुबु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ध्नः प्रतित्वादित्यास्त्वग्वेत्तु २ अग्नेस्तनूरसिवा
चोविसर्जनम् देववीतयेत्वागृण्हामि ३ बृहद्ग्रा
वासिवानस्पत्यः सइदंदेवेभ्यः हव्यꣳ शमीष्वसु
शमि शमीष्व हविष्कृदेहि ४ कुक्कुटोसि मधुजि
ह्व इषमूर्जमावद वयꣳ संघातेसंघातेजेष्म ५
वर्षवृद्धमसि प्रतित्वावर्षवृद्धंवेत्तु परापूतꣳर

क्षः प्रतिपूता अरातयः ६ अपहतꣳ रक्षोवायुर्वोविवि
नक्तु देवोवः सविताप्रतिगृभ्णातुहिरण्यपाणिरछिद्रे
णपाणिना ७ ७ धृष्टिरस्यपाग्नेअग्निमामादं
जहि निःष्क्रव्यादꣳ सेधादेवयजंवह ध्रुवमसिपृथि
वींदृꣳह १ ब्रह्मवनित्वाक्षत्रवनिसजातवन्युपद
धामिद्विषतोवधाय २ अग्नेब्रह्मगृभ्णीष्वधरुणम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

५

स्यन्तरिक्षं दृꣳह ब्रह्मवनि त्वा क्षत्रवनि सजातवन्यु
पदधामि द्विषतो वधाय धर्त्रमसि दिवं दृꣳह ब्रह्मवनि
त्वा क्षत्रवनि सजातवन्युपदधामि द्विषतो वधाय ३
विश्वाभ्यः स्त्वाशाभ्य उपदधामि द्विषतो वधाय चि
तस्थोर्ध्वचितो भृगूणामङ्गिरसां तपसा तप्यध्वं ४ त
शर्मास्यवधूतꣳ रक्षोऽवधूता॰ १ धिषणासिप

आदित्या

५

१०

र्वती प्रति त्वादित्यास्त्वग्वेत्तु दिवस्कम्भन्यसि धिष
णासि पार्वतेयी प्रति त्वा पर्वती वेत्तु २ धान्यमसि
धिनुहि देवान्धिनुहि यज्ञं धिनुहि यज्ञपतिम् धिनुमां हि ३
यज्ञन्यं ३ प्राणाय त्वोदानाय त्वा व्यानाय त्वा दीर्घा
मनु प्रसितिमायुषे धाम् देवो वः सविता प्रति गृह्णातु
हिरण्यपाणिरच्छिद्रेण पाणिना चक्षुषे त्वा महीं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

६ ११

नापयोसि ४ वेदोसि वेदयेनत्वं देववेद देवेभ्योवेद
भवः तेनमह्यंवेदोभव ५ ७ देवस्यत्वासवितुःप्रस
वेश्विनोर्बाहुभ्यांपूष्णोहस्ताभ्यां संवपामिसमाप
ओषधीभिः समोषधयोरसेन सं रेवतीर्जगती
भिःसंमधुमतीर्मधुमतीभिः पृच्यतां जनयत्यैत्वा
संयौमि १ इदमग्नेरिदमग्नीषोमयोरिषेत्वा घ ६

१२

र्मासिविश्वायुरुरुप्रथाउरुप्रथस्वोरुतेयज्ञपतिःप्रथ
ताम् २ अग्निष्टेत्वचंमाहिंसीदंतरितंरक्षोंतरिता
अरातयः देवस्त्वासविताश्रपयतुवर्षिष्ठेधिनाके ३
माभेर्मासंविक्थाअतमेरुर्यज्ञोतमेरुर्यजमानस्यप्र
जाभूयात् त्रितायत्वाद्वितायत्वैकतायत्वा ४ देवस्य
त्वासवितुःप्रसवेश्विनोर्बाहुभ्यांपूष्णोहस्ताभ्यां आ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

६ देध्यरक्षतं देवेभ्यः इंद्रस्य बाहुरसि दक्षिणः सहस्र १३
भृष्टिः शततेजाः वायुरसि तिग्मतेजा द्विषतो वधः
१ पृथिव्यै वर्मासि पृथिवि देवयजनि ओषध्यास्ते
मूलं मा हिंसिषं २ व्रजं गच्छ गोष्ठानं वर्षतु ते द्यौर्ब
धान देव सवितः परमस्यां पृथिव्यां शतेन पाशैः
योस्मान्द्वेष्टि यं च वयं द्विष्मस्तमतो मा मौक् ३ अ ६

१४
पाररुं वध्यासं पृथिव्यै देवयजनात् व्रजं गच्छ गोष्ठा
नं वर्षतु ते द्यौर्बधान देव सवितः परमस्यां पृथिव्यां
शतेन पाशैः योस्मान्द्वेष्टि यं च वयं द्विष्मस्तमतो
मा मौक् अररो दिवं मा पप्तो द्रप्सस्ते द्यां मा स्कन् व्र
जं गच्छ गोष्ठानं वर्षतु ते० योस्मान्द्वेष्टि० ४ गाय
त्रेण त्वा छंदसा परिगृह्णामि त्रैष्टुभेन त्वा छंदसा परि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

८

गच्छामिजागतेनत्वाछंदसापरिगृह्णामि सुक्ष्मा
चासिशिवाचासिस्योनाचासिसुषदाचासि ऊर्ज
स्वतीचासिपयस्वतीच ५ पुराक्रूरस्यविसृपोवि
रप्शिन्नुदादायपृथिवींजीवदानुम् यामैरयंश्चं
द्रमसिस्वधाभिः स्तांधीरासोअनुदिश्ययजंते छि
षतोवधोसि ६ प्रत्युष्टं रक्षः प्रत्युष्टा अरातयो ८

निष्टप्तं रक्षोनिष्टप्ता अरातयः अनिशितोसि
सपत्नक्षिद्वाजिनंत्वावाजेध्यायैसंमार्ज्मि प्रत्युष्ट
ं रक्षः प्रत्युष्टा अरातयोनिष्टप्तं रक्षोनिष्टप्ता अ
रातयः अनिशितासिसपत्नक्षिद्वाजिनींत्वावाजेध्या
यैसंमार्ज्मि ७ अदित्यैरास्नासीन्द्राण्यैसंनहनं वि
ष्णोर्वेष्योस्यूर्जेत्वादब्धेनत्वाचक्षुषावपश्यामि २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

९ ३ सवितुर्वः प्रसवउत्पुनाम्यछिद्रेणपवित्रेणसूर्य
अग्नेर्जिह्वासिसुभूर्देवेभ्यः धाम्नेधाम्नेमेभवयजुषेय
जुषे सवितुस्त्वाप्रसवउत्पुनाम्यछिद्रेणपवित्रेणसूर्य
स्यरश्मिभिः २ तेजोसिशुक्रमस्यमृतमसिधामना
मासि प्रियंदेवानामनाधृष्टंदेवयजनं यस्तेप्राणः
पशुषुप्रविष्टोदेवानांविष्ठामनुयोवितस्थे आत्म
न्वान्सोमघृतवान्हिभूत्वाग्निंगछस्वर्यजमानाय ९

विंद् १७ हरिः ॐ इतिप्रथमोध्यायः इषेत्वातिस्रः
२ धौरसिचतस्रः ४ अग्नेव्रतपतेअष्ट ८ पवित्रे
स्थचतस्रः ४ धृष्टिरसिचतस्रः ४ शर्मपंच ५
शर्मासि ७ देवस्यत्वाचतस्रः ४ द्वितीयोदेवस्यत्वा
षट् प्रत्युष्टंपंच ५ शुन्धनुवाकेषु पंचाशत् ५० इषेदेव
स्यसमाः पंचाशत् प्रथमोध्यायः समाप्तः हरिः ॐ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥१०॥

१९

कृष्णोस्याखरेष्ठोग्नये त्वा जुष्टं प्रोक्षामि वेदिरसि ब
र्हिषे त्वा जुष्टां प्रोक्षामि ॥ बर्हिरसि स्रुग्भ्यस्त्वा जुष्टं प्रो
क्षामि ॥१॥ अदित्यै व्युंदनमसि विष्णो स्तूपोसि ॥ ऊ
र्णम्रदसं त्वा स्तृणामि स्वासस्थां देवेभ्यः ॥२॥ भूप
तये स्वाहा । भुवनपतये स्वाहा भूतानां पतये स्वाहा
गंधर्वस्त्वा विश्वावसुः परिदधातु विश्वस्यारिष्ट्यै ॥१०॥

२०

॥३॥ यजमानस्य परिधिरस्यग्निरिड ईडितः ॥ इंद्रस्य
बाहुरसि दक्षिणो विश्वस्यारिष्ट्यै ॥ यजमानस्य परि
ध धिरस्यग्निरिड ईडितः ॥ मित्रावरुणौ त्वोत्तरतः प
रिधत्तां ध्रुवेण धर्मणा विश्वस्यारिष्ट्यै ॥ यजमानस्य ॰
॥४॥ वीतिहोत्रं त्वा कवे द्युमंतं समिधीमहि अग्ने बृ
हंतमध्वरे ॥५॥ समिदसि सूर्यस्त्वा पुरस्तात्पातु कस्या

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्विदं भस्त्रास्ते सवितुर्बाहूस्थः ६ ऊर्णम्रदसं त्वास्तृ
णामि स्वासस्थं देवेभ्यः आत्वा वसवो रुद्रा आदित्याः सं
दंतु ७ घृताच्यसि जुहूर्नामा सेदं प्रियेण धाम्ना प्रियं स
दसि सीद घृताच्यस्युपभृन्नाम सेदं प्रियेण धाम्ना प्रि
यं सदसि सीद घृताच्यसि ध्रुवा नाम सेदं प्रियेण धा
म्ना प्रियं सदसि सीद प्रियेण धाम्ना प्रियं सदसि सीद
८ ध्रुवा असदन्नृतस्य योनौ ता विष्णो पाहि पाहि य

ज्ञं पाहि यज्ञपतिं पाहि मां यज्ञन्यं ९ अग्ने वाजजिद्वा
जं त्वा सरिष्यन्तं वाजजितं संमार्ज्मि नमो देवेभ्यः स्व
धा पितृभ्यः सुयमे मे भूयास्तं १ अस्कन्नमद्य देवे
भ्यः संभ्रियासं अंघ्रिणा विष्णो मा त्वाव क्रमिषं २ व
सुमतीमग्ने ते छायामुपस्थेषं विष्णोस्स्थानमसि इतः
इन्द्रो वीर्यमकृणोदूर्ध्वोध्वर आस्थात् ३ अग्ने वेर्होत्रं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥१२॥ वेर्दूत्स्यं॥ अवतांत्वाद्यावापृथिवी अवस्तं द्यावापृथिवी॥ ४
स्विष्टकृद्देवेभ्यइंद्र आज्येन हविषा भूत्स्वाहा॥ संज्योतिषा
ज्योतिः॥ ५ अत्रपितरोमादयध्वंयथाभागमावृषाय
ध्वं॥ अमीमदंतपितरोयथाभागमावृषायिषत॥ ६ उ
५ पहूतापृथिवी मातोपमांपृथिवी माताह्वयतां॥ अग्नि
राग्नीध्रात्स्वाहा॥ उपहूतोद्यौष्पितोपमांद्यौष्पिताह्व ॥१२॥

यतां॥ अग्निराग्नी
[illegible] ध्रात्स्वाहा॥ ७ मयीदमिंद्र इंद्रियं द
धात्वस्मान्रायोमघवानः सचंतां॥ अस्माकं संत्वाशि
षः सत्यानः संत्वाशिषः॥ अग्नेवाजजिद्वाजंत्वाससृवां
संवाजजितंसंमार्ग्मि॥ ८ देवसवितरेतंत्वावृण त
तेबृहस्पतिंब्रह्माणम्॥ तदहंमनसेप्रब्रवीमि॥ ९ म
नोगायत्र्यैगायत्रीत्रिष्टुभेत्रिष्टुप्जगत्यैजगत्यनुष्टुभे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥१३॥ २५

अनु ष्टुप्प्रजापतयेप्रजापतिर्विश्वेभ्योदेवेभ्यः ॥२॥ बृ
हस्पतिर्देवानांब्रह्माहंमनुष्याणाम् ॥ भूर्भुवस्वर्न्निर
स्तःपाप्मेदमहंबृहस्पतेःसदसिसीदामि ॥३॥ मित्र
स्यत्वाचक्षुषाप्रतीक्षे देवस्यत्वासवितुःप्रसवेश्वि
नोर्बाहुभ्यांपूष्णोहस्ताभ्यां ॥ प्रतिगृह्णामिपृथिव्या
स्त्वानाभौसादयाम्यदित्याउपस्थे देवस्यत्वा० ॥४॥ ॥१२॥

२६

आददेग्नेष्ट्वास्येनप्राश्नामिबृहस्पतेर्मुखेन ॥ अंयोपस्वंत
देवतास्त्वाइदंश्रीमयंतु स्वाहा ॥ व्रतंजठरमिंद्रस्यगघ
घसिनामेमासंप्रक्ष्यासुर्धमेनाभेःसीद ॥६॥ इंद्रस्य
त्वाजठरेसादयामि ॥ प्रजापतेर्भागोस्यूर्जस्वान्पयस्वा
॥७॥ न् ॥ प्राणापानौमेपाहिसमानव्यानौमेपाह्युदानव्या
नौमेपाहि ऊर्गस्यूर्जंमयिधेह्यक्षितिरसिमामेक्षेष्ठा
अमुत्रामुष्मिँल्लोकइहच ॥८॥ एषातेअग्नेसमित्तयाव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥१६॥

ईस्वचाचप्यायस्व ॥ वर्धिषीमहिचवयमाचप्यासिषीमहि
॥ ९ ॥ एतत्तेदेवसवितर्यज्ञंप्राहुर्बृहस्पतयेब्रह्मणे ॥ तेन
यज्ञमवतेनयज्ञपतिंतेनमामव ॥ १० ॥ मनोज्योतिर्जुष
तामाज्यस्यबृहस्पतिर्यज्ञमिमंतनोतु ॥ अरिष्टंयज्ञं
समिमंदधातुविश्वेदेवासइहमादयंतामोंप्रतिष्ठ ॥ ११
॥ ७ ॥ अग्नीषोमयोरुज्जितिमनूज्जेषंवाजस्यमाप्र

॥१६॥

सवेनप्रोहामि ॥ अग्नीषोमौतमपनुदतांयोस्मान्द्वेष्टि
यंचवयंद्विष्मोवाजस्यैनंप्रसवेनापोहामि ॥ इन्द्राग्न्यो
रुज्जितिमनूज्जेषंवाजस्यमाप्रसवेनप्रोहामि ॥ इंद्राग्नी
तमपनुदतांयोस्मान्द्वेष्टियंचवयंद्विष्मोवाजस्यैनंप्रस
वेनापोहा ॥ १ ॥ वसुभ्यस्त्वा ॥ रुद्रेभ्यस्त्वादित्येभ्यस्त्वा ॥ सं
जानाथांद्यावापृथिवीमित्रावरुणौत्वावृष्ट्यावतां ॥ २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥१५॥ २८

व्यंतु वयो रिक्तो रिहाणा मरुतां पृषतीं गच्छ ॥ वशा पृश्निर्भू
त्वा दिवं गच्छ ततो नो वृष्टिमावह ॥ ३ ॥ चक्षुष्पा अग्नेसि चक्षु
र्मे पाहि ॥ यं परिधिं पर्यधत्था अग्ने देव पणिभिर्गुह्यमा
नः ॥ ४ ॥ तं त एतमनु जोषं भराम्येष नेत्त्वदपचेतयातै
अग्नेः प्रियं पाथोपीतम् ॥ ५ ॥ संस्रवभागा स्थेषा बृहं
तः प्रस्तरेष्ठाः परिधेयाश्च देवाः ॥ इमां वाचमभि विश्वे ॥१५॥

३०

गृणंत आसद्यास्मिन्बर्हिषि मादयध्वं ॥ स्वाहा वाट् ॥ घृता
ची स्थो धुर्यौ पातं ॥ सुम्ने स्थः सुम्ने मा धत्तं ॥ ६ ॥ अग्ने द
ब्धायोऽशीतम पाहि मा दिद्योः पाहि प्रसित्यै पाहि दुरिष्ट्यै
पाहि दुरद्मन्यै ॥ अविषं नः पितुं कृणु सुषदा योनौ स्वा
॥१॥ हा वाट् ॥ अग्नये संवेशपतये स्वाहा सरस्वत्यै यशोभगि
न्यै स्वाहा ॥ उलूखले मुसले यच्च शूर्पे आशिश्लेष दृष

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१६

दियस्कपाले २ उत्सुषोविप्रुषः संजुहोमि सत्याः संतुय
जमानस्यकामाः स्वाहा आप्यायतांध्रुवाहविषाघृते
नयज्ञंयज्ञंप्रतिदेवयद्भ्यः सूर्यायाऊधोअदित्याउप
स्थउरुधारापृथिवीयज्ञेअस्मिन् ३ देवागातुविदोगा
स तुमित्वागातुमित मनसस्पतइमंदेवयज्ञं स्वाहावातेधाः
४ संबर्हिरक्तां हविषाघृतेन समादित्यैर्वसुभिः सं

१६

31

32

मरुद्भिः समिंद्रोविश्वदेवेभिरक्तांदिव्यंनभोगछतुयत्स्वा
हा ५ कस्त्वाविमुंचति सत्वाविमुंचति कस्मैत्वाविमुंचतित
स्मैत्वाविमुंचति पोषायरक्षसांभागोसि ६ वेषोस्युपवेषो
ऽसिषतोग्नीवाऽउपवेविद्धि वेद्यांऽअग्नेसुभगधारयेह ७
ऋद्धाः कर्मण्याअनपायिनोयथासन् जुहोमित्वासुभग
सौभगायपुरुत्तमंपुरुहूतश्रवस्यन् ८ संवर्चसापय

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥१८॥ 33

सासंतनूभिरगन्महिमनसासंशिवेन॥ त्वष्टासुदत्रो
विदधातुरायोनुमार्ष्टुतन्वोयद्विलिष्टं॥ १॥ यज्ञांशंचतउ
पच॥ दिवेमेसंतिष्ठस्वांतरिक्षेमेसंतिष्ठस्व स्विष्टेमेसंति
ष्ठस्व॥ २॥ दिविविष्णुर्व्यक्रंस्तजागतेनछंदसाततोनि
र्भक्तः॥ योस्मान्द्वेष्टियंचवयंद्विष्मः॥ अंतरिक्षेविष्णुर्व्यक्रं
स्तत्रैष्टुभेनछंदसाततोनिर्भक्तः॥ योस्मान्द्वेष्टियंचव
॥१८॥

34

यंद्विष्मः॥ पृथिव्यांविष्णुर्व्यक्रंस्तगायत्रेणछंदसाततो
निर्भक्तः॥ योस्मान्॥ ३॥ अस्मादन्नादस्यैप्रतिष्ठायाअ
गन्मस्वः संज्योतिषाभूम॥ ४॥ स्वयंभूरसिश्रेष्ठोरश्मिर्व
र्चोदाअसिवर्चोमेदेहि॥ सूर्यस्यावृतमन्वावर्ते॥ ५॥ अग्ने
गृहपतेसुगृहपतिरहंत्वयागृहपत्याभूयासं॥ सुगृहपति
स्त्वंमयागृहपत्याभूयाः॥ ६॥ अस्थूरिणोगार्हपत्यानिसंतु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥१८॥ व्रतꣳ हिमाः॥ तिग्मेन नस्तेजसा सꣳ शिशाधि सूर्यस्या
वृतमन्वावर्त्ते ॥७॥ उरुविष्णोविक्रमस्वोरुक्षयाय नस्कृ
धि ॥ घृतंघृतयोने पिबप्रप्रयज्ञपतिंतिर ॥८॥ ततोसि
तंतुरस्यनुमा तनुहि ॥ अस्मिन्यज्ञे स्याꣳ साधु कृत्याया
मस्मिंनन्नेस्मिन्लोके ॥९॥ इदंमेकर्मेदंवीर्यंपुत्रोनुसं
तनोतु ॥ आग्नेव्रतपते व्रतमचारिषंतदशकंतन्मेराधि ॥
॥१८

॥१९॥ यिष्यत ॥३॥ नमोवः पितरः शोषायनमोवः पितरस्तपसे
नमोवः पितरोयज्जीवंतस्मैनमोवः पितरोरसाय ॥ नमो
वः पितरोघोरायमन्यवेस्वधायैवः पितरोनमः ॥ ए
तद्वः पितरोवासोगृहान्नः पितरोदत्त ॥४॥ उदायुषा
स्वायुषोसृजेन्यस्यधामभिः ॥ उदस्थाममृतां अनु
॥५॥ आधत्तपितरोगर्भंकुमारंपुष्करस्रजम् ॥ यथे
॥१९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

३६

इदं महं य एवास्मि स एवास्मि ॥ १ ॥ अग्नये कव्यवाहनाय
स्वाहा सोमाय पितृमते स्वाहा अपहता असुरा रक्षा
ꣳसि वेदिषदः ॥ १ ॥ ये रूपाणि प्रतिमुंचमाना असुराः सं
तः स्वधया चरंति परापुरो निपुरो ये भरंत्यग्निष्टान्लो
कात्प्रणुदात्यस्मात् ॥ २ ॥ अत्र पितरो मादयध्वं यथा भा
गमावृषायध्वं अमीमदंत पितरो यथा भागमावृषा

॥२०॥ ३८

यिषत ॥ द्वितीयोध्यायः समाप्तः ॥ छ ॥ छ ॥ हरिः ॐ ॥ समिधा
ग्निं दुवस्यत घृतैर्बोधयतातिथिम् ॥ आस्मिन् हव्या जु
होतन ॥ १ ॥ सुसमिद्धाय शोचिषे घृतं तीव्रं जुहोतन ॥ अ
२ ग्नये जातवेदसे ॥ तं त्वा समिद्भिरंगिरो घृतेन वर्धयाम
सि ॥ बृहच्छोचा यविष्ठ्य ॥ ३ ॥ उप त्वाग्ने हविष्मतीर्घृता
चीर्यंतु हर्यत ॥ जुषस्व समिधो मम ॥ छ ॥ भूर्भुवः स्वर्घो

।२०।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हपुरुषोसत्॥ ६॥ ऊर्जंवहंतीरमृतंघृतंपयः कीलालंप
रिस्रुतं॥ स्वधास्थतर्पयतमेपितॄन्॥ ७॥ ॐ इतिद्वि
तीयोध्यायः॥ ७॥ ७॥ कृष्णोसिनव॥ १॥ अग्नेवाजजि
त्॥ ९॥ देवसवितरेकादश॥ ११॥ अग्नीषोमयोः षट्॥ ६॥
अग्नेदब्धायोऽष्ट॥ ८॥ संवर्चसादश॥ १०॥ अग्नयेकव्य
वाहनायसप्त॥ ७॥ सप्तानुवाकेषुषष्टिः॥ ६०॥ कृ॥ इमंमे

रिवभूम्नाभूमिरिववरिम्णा॥ तस्यास्तेपृथिवि
देवयजनिपृष्ठेग्निमन्नादमन्नाद्यायादधे॥ ५
आयंगौः पृश्निरक्रमीदसदन्मातरंपुरः॥ पित
रंचप्रयंत्स्वः॥ ६॥ अंतश्चरतिरोचनास्यप्राणाद
पानती॥ व्यख्यन्महिषोदिवम्॥ ७॥ त्रिंशद्धामविरा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥२१॥ ४१

जतिवाक् पतंगाय धीयते प्रतिवरस्तोर हद्युभिः ॥ ८ ॥ अग्नि
ज्योतिषं स्वा वायुमतीं प्राणवतीं ॥ स्वर्ग्यां स्वर्गायोपद
धामि भास्वतीम् ॥ अग्निर्ज्योतिर्ज्योतिरग्निः ॥ ९ ॥ सूर्यज्यो
तिषं त्वा वायुमतीं प्राणवतीम् ॥ स्वर्ग्यां स्वर्गायोपदधामि स्वाहा
भास्वतीम् ॥ सूर्योज्योतिर्ज्योतिः सूर्यः स्वाहा ॥ १० ॥ सजू
र्देवेन सवित्रा सजू रात्र्येंद्रवत्या ॥ जुषाणो अग्निर्वेतु स्वा

॥२१॥

४२

हा ॥ सजूर्देवेन सवित्रा सजूरुषसेंद्रवत्या ॥ जुषाणः सू
र्यो वेतु स्वाहा ॥ १२ ॥ इह पुष्टिं पुष्टिपतिर्दधात्विह प्रजां रर
मयतु प्रजापतिः ॥ अग्नये गृहपतये रयिमते पुष्टिपत
ये स्वाहा ॥ अग्नयेऽन्नादायान्नपतये स्वाहा ॥ १३ ॥ अनमि
त्रं मेऽधराग नमित्रमुदक्ष्वधि इंद्रानमित्रं पश्चान्मेन
मित्रं पुरस्कृधि ॥ १४ ॥ इंद्रः पश्चादिंद्रः पुरस्तादिंद्रो अ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२२ ४३

स्नो अग्नि पातु विश्वतः इंद्रोजिघा॑ऽसतोमनाऽसिविषू

चीनाव्यस्यतात् १५ समिद्‌सिसमिद्धोमेअग्ने दीदि

हि समेद्धातेअग्नेदीघासम् १६ उपप्रयंतोअध्वरंम

त्रंवोचेमाग्नये आरेअस्मेचश्टेएवते १७ अग्निर्मू

र्द्धादिवः ककुत्पतिः पृथिव्याअयम् अपाऽरेताऽसिजि

न्वति १८ उभावामिंद्राग्नीआहुवध्या उभाराधसः २२

४४

सहमादयध्यै उभादातारा इषाऽरयीणामुभावाजस्य

सातयेहुवेवाम् १९ अयंतेयोनिर्ऋत्वियोयतोजातो

अरोचथाः तंजानन्नग्नआरोहाथानोवर्द्धयारयिम् २० ॥

अयमिहप्रथमोधायिधातृभिर्होतायजिष्ठोअध्वरेष्वी

ड्यः यमप्नवानोभृगवोविरुरुचुर्वनेषुचित्रंविभ्वं

विशेविशे २१ अस्यप्रत्नामनुद्युतऽशुक्रंदुदुह्रेअह्रयः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पयः सहस्रसाम्पोषमं तनूपा अग्नेसितन्वंमेपाह्यायुर्दा अ
ग्नेस्यायुर्मेदेहि वर्चोदा अग्नेसिवर्चोमेदेहि २४ अग्ने
यन्मेतन्वाऊनंतन्म आपृण इन्धानास्त्वाशतꣳहिमाद्यु
मंतꣳसमिधीमहि २५ वयस्वंतोवयस्कृतꣳसहस्वंतः
सहस्कृतम् अग्नेसपत्नदंभनमदब्धासोअदाभ्यं २५
चित्रावसोस्वस्तितेपारमशीय संत्वमग्नेसूर्यस्यव

र्चसागथाः समृषीणाꣳस्तुतेन २६ संप्रियेणधाम्नास
महमायुषासंवर्चसासंप्रजयासꣳरायस्पोषेणग्मिषीय
२७ ऊर्जस्थोर्जंवोभक्षीय रायस्पोषस्थ रायस्पोषंवोभक्षीय
१ अंधस्थांधोवोभक्षीय महस्थमहोवोभक्षीय [redacted] रेवती
स्येरिम रमध्वमस्मिन्योनावस्मिन्गोष्ठेस्मिँल्लोके ।।२८।। इहैवस्त
नोमापगात संहितासिविश्वरूपूर्जामाविशगौपत्येन ।।२९।।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२४

उपत्वाग्ने दिवे दिवे दोषावस्तर्धिया वयम् नमो भरंत ए
मसि ३० राजंतमध्वराणां गोपामृतस्य दीदिविम् वर्द्धं
मानं स्वे दमे ३१ स नः पितेव सूनवेग्ने सूपायनो भव
सचस्वा नः स्वस्तये ३२ ७ अग्ने त्वं नो अंतम उत त्रा
ता शिवो भवा वरूथ्यः वसुरग्निर्वसुश्रवा अच्छा नक्षि द्यु
मत्तमं रयिं दाः तं त्वा शोचिष्ठ दीदिवः सुम्नाय नूनमी २४

२५

णस्पते ३७ महि त्रीणामवोस्तु द्युक्षं मित्रस्यार्यम्णः
दुराधर्षं वरुणस्य ३८ नहि तेषाममा चन नाध्वसु वा
रणेषु ईशे रिपुरघशंसः ३९ ते हि पुत्रासो अदितेः
प्र जीवसे मर्त्याय ज्योतिर्यच्छंत्यजस्रं ४० कदा चन
स्तरीरसि नेंद्र सश्चसि दाशुषे उपोपेन्नु मघवं भूय इ
न्नु ते दानं देवस्य पृच्यते ४१ तत्सवितुर्वरेण्यं भर्गो २५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

महे सरिनभ्यः ३३ सनोबोधिश्रुधी हवमुरुष्या णो अघा
यतः समस्मात् इळए स्थदित एहि काम्य एहि मयिवः
कामधरणं भूयात् ३४ सोमानं स्वरणं कृणुहि ब्रह्मस
णस्पते कक्षीवंतं य औशिजः ३५ यो रेवान्यो अमी
वहा वसुवित्पुष्टिवर्द्धनः सनः सिषक्तु यस्तुरः ३६ मा
नः शंसो अररुषो धूर्तिः प्रणं मर्त्यस्य रक्षाणो ब्रह्म

स

देवस्य धीमहि धियो यो नः प्रचोदयात् ६२ परि ते
दूढभो रथोस्मां अश्नोतु विश्वतः येन रक्षसि दाशुषः
६३ समिद्धो मा सम मर्द्धय प्रजया च धनेन च भूर्भुवः स्वः
सुप्रजाः प्रजया भूयासम् सुवीरो वीरैः सुपोषः पोषैः
६४ नर्य प्रजां मे पाहि शंस्य पशून्मे पाहि आगन्म
विश्ववेदसमस्मभ्यं वसुवित्तमं ६५ अग्ने सम्राडभि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२६ द्युम्नमभिसहआयच्छस्व अयमग्निर्गृहपतिर्गार्हपत्यः ५१
प्रजाया वसुवित्तमः ४६ अग्ने गृहपते ऽभिद्युम्नमभि
सहआयच्छस्व गृहा मा बिभीत मा वेपध्वमूर्जं बिभ्र
त एमसि ४७ ऊर्जं बिभ्रद्वः सुमनाः सुमेधा गृहा
नैमि मनसा मोदमानः येषामध्येति प्रवसन्येषु सौ
मनसो बहुः ४८ गृहानुपह्वयामहे ते नो जानन्तु जानतः
२६

५२
उपहूता इह गाव उपहूता अजावयः ४९ अथो अन्नस्य
कीलाल उपहूतो गृहेषु नः क्षेमाय वः शान्त्यै प्रपद्ये शि
वं शग्मं शंयोः शंयोः ५० प्रघासिनो हवामहे मरुत
श्च रिशादसः करम्भेण सजोषसः ५१ यद्ग्रामे यदर
ण्ये यत्सभायां यदिन्द्रिये यदेनश्चकृमा वयमिदं तदव
यजामहे स्वाहा ५२ मो षु ण इन्द्र पृत्सु देवैरस्ति हि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२८ ष्मातेशुष्मिन्नवयाः महश्चिद्यस्यमील्हुषोयव्याहविष्म ५३
तोमरुतोवंदतेगीः ५३ अक्रन्कर्मकर्मकृतः सहवाचाम
योभुवा देवेभ्यः कर्मकृत्वास्तंप्रेतसचाभुवः ५४ अव
भृथनिचुंपुणनिचेरुरसिनिचुंपुण अवदेवैर्देवकृत
मेनोयासिषमवमर्त्यैर्मर्त्यकृतंपुरुराव्णोदेवरिषस्पा
हि ५५ पूर्णादर्विपरापतसुपूर्णापुनरापत वस्नेव
२८

५४
विक्रीणावहाइषमूर्जं शतक्रतो ५६ देहिमेददामिते
निमेधेहिनितेदधो निहारंनिहरामिमे निहारंनिह
रासिमेस्वाहा ५७ अक्षन्नमीमदंतह्यवप्रियाअधूषत
अस्तोषतस्वभानवोविप्रानविष्ठयामतीयोजान्विंद्र
तेहरी ५८ सुसंदृशंत्वावयंमघवन्वंदिषीमहि प्रनू
नंपूर्णवंधुरस्तुतोयासिवशांअनुयोजान्विंद्रतेहरी ५९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२८

५५

मनोन्वाहुवामहेनाराशꣳसेनस्तोमेन पितृणांचमन्मभिः

६० आनएतुमनःपुनः क्रत्वेदक्षायजीवसे ज्योक्चसूर्यं

दृशे ६१ पुनर्नःपितरोमनोददातुदैव्योजनः जीवंव्रा

तꣳसचेमहि ६२ वयꣳसोमव्रतेतवमनःस्तनूषुबिभ्र

तः प्रजावंतःसचेमहि ६३ एषतेरुद्रभागःसहस्वस्रां

बिकयातंजुषस्वस्वाहा एषतेरुद्रभागआखुस्तेपशुः ६४

२८

५६

अवरुद्रमदीमह्यवदेवंत्र्यंबकं यथानोवस्यसस्करद्यथा

नःश्रेयसःकरद्यथानोव्यवसाययात् ६५ भेषजमसिभे

षजंगवेश्वायपुरुषायभेषजम् सुखंमेषायमेष्यै ६६ त्र्यं

बकंयजामहेसुगंधिंपुष्टिवर्द्धनं उर्वारुकमिवबंधनान्मृत्यो

र्मुक्षीयमामृतात् ६७ त्र्यंबकंयजामहेसुगंधिंपतिवेदनम्

उर्वारुकमिवबंधनादितोमुक्षीयमामुतः ६८ एतेनरुद्रावसे

स

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२९ ॥ ५७

नपरोमृजनत्तोतीहि अवततधन्वापिनाकावसः कृ
त्तिवासा अहिंसन्नः शिवः इतोतीहि ६० वाजिनां
वाजो वजुभक्षो अस्मान्नेतः सित्कमश्यतं बलाय विश्वे
देवा अभियत्संनकृत्तुस्त्माधिनो जुषजयाधनेन
८० वाज्यहं वाजिनस्योपहूत उपहूतस्य भक्षया
मि वाजेवाजीभयासम ८१ सविता प्रसता ॥ २९

॥३०॥ ५८

ननानुवाकेषु तृतीयोध्यायः ॥ ७ ॥ ७ ॥ ॐम् ७ ॥ ७
एदमगन्मदेवयजनंपृथिव्यायत्र देवासो अजुषंत वि
श्वे ॥ ऋक्सामाभ्यां संतरंतो यजुर्भीरायस्पोषेण स
मिषामदेम ॥ १ इमा आपः शमुमे संतु देवीरोषधे त्रा
यस्वः स्वधितेमैनं हिंसीः आपो अस्मान्मातरः
शुंधयंतु घृतेन नो घृतप्वः पुनंतु २ विश्वं हिरि ॥३०॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४८

देव्य आपउंदंतु तेतनुं दीर्घायुत्वाय वर्चसे ॥२॥ कश्य
पस्य त्र्यायुषं जमदग्नेस्त्र्यायुषं ॥ यद्देवानां त्र्यायुषं त
न्नो अस्तु त्र्यायुषं ॥३॥ येन धाता बृहस्पतेरिंद्रस्य
चायुषे वपत् तेन ते वपामि ब्रह्मणा जीवातवे जी
वनाय दीर्घायुत्वाय बलाय वर्चसे सुप्रजास्त्वाय
चा सा अयोजीवश्शारदः शतं ॥४॥ हरिः ॐ ॥ ७

६०

प्रं प्रवहंति देवीरुद्दिदाभ्यः शुचिरा पूत एमि ॥ दीक्षातप
सोः स्तनूरसि तां त्वा शिवां शग्मां परिद्धे भद्रं वर्णं पु
ष्यन् ॥१॥ महीनां पयोसि । वर्चोदा असि वर्चो मे देहि
चे वृत्रस्य कनीनकासि चक्षुर्दा असि चक्षुर्मे देहि ॥ ७
चित्पतिर्मा पुनातु वाक्पतिर्मा पुनातु देवो मा सविता
स्य पुनात्वच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः तस्य ते प

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

३१ ६१

विश्वपते पवित्रपूतस्य यत्कामः पुनेतच्छकेयम् ॥ ५ ॥
आवो देवास ईमहे वामं प्रयत्यध्वरे आवो देवास आशि
षो यज्ञियासो हवामहे ६ स्वाहा यज्ञं मनसः स्वाहोरो
घा चा रंतरिक्षात् स्वाहा द्यावापृथिवीभ्यां स्वाहा वातादारभे ॥ ७ ॥
आकूत्यै प्रयुजेग्नये स्वाहा मेधायै मनसेग्नये स्वाहा दीक्षा
यै तपसेग्नये स्वाहा सरस्वत्यै पूष्णेग्नये स्वाहा ॥ आपो ३१ ॥

६२

देवीर्बृहतीर्विश्वशंभुवो द्यावापृथिवी उर्वंतरिक्ष बृहस्प
तये हविषा विधेम स्वाहा ॥ ८ ॥ विश्वो देवस्य नेतुर्मर्तो वु
रीत सख्यम् विश्वो राय इषुध्यति द्युम्नं वृणीत पुष्यसे
स्वाहा ॥ ९ ॥ ऋक्सामयोः शिल्पे स्थस्ते वामारभे ते मापा
तम् आस्य यज्ञस्योदृचः ॥ १० ॥ शर्मासि शर्म मे यच्छ न
गि मस्ते अस्तु मा मा हिंसीः ऊर्गस्यांगिरस्यूर्णम्रदा ऊर्जं मे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

३२ ॥ यच्छ ॥ ११ ॥ सोमस्य नीविरसि विष्णोः शर्मासि शर्म यज ६३
मानस्य इंद्रस्य योनिरसि सुसस्याः कृषीः स्कृधि ॥ १२ ॥
उच्छ्रयस्व वनस्पत ऊर्ध्वो मा पाह्यंहसः आस्य यज्ञस्यो
दृचः ॥ १३ ॥ व्रतं कृणुत व्रतं कृणुत व्रतं कृणुत अग्नि
र्ब्रह्माग्निर्यज्ञो वनस्पतिर्यज्ञियः ॥ १४ ॥ दैवीं धियं म
नामहे सुमृळीकामभिष्टये वर्चोदां नि-घ धायसꣳ ॥ ३२ ॥

६४
सुतीर्था नो असद्वशे ॥ १५ ॥ ये देवा मनोजाता मनोयुजो
दक्षक्रतवः ते नोऽवंतु ते नः पांतु तेभ्यः स्वाहा ॥ १६ ॥ श्वा
त्राः पीता भवत यूयमापो अस्माकमंतरुदरे सुशेवाः
ता अस्मभ्यमयक्ष्मा अनमीवा अनागसः स्वदंतु देवीर
मृता ऋतावृधः ॥ १७ ॥ इयं ते यज्ञिया तनूरपो मुंचामि
न प्रजाम् अंहोमुचः स्वाहाकृताः पृथिवीमाविशत

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

३३

पृथिव्यासंभव १८ अग्नेत्वꣳसुजागृहिवयꣳसुमंदिषीम
हि रक्षाणोअप्रयुछन्नबुधेनः पुनस्कृधि १९ पुनर्म
नः पुनरायुर्मआगात्पुनः श्चक्षुः पुनः श्रोत्रंमआगात्
पुनः प्राणः पुनरात्मामआगात् वैश्वानरो अदब्धस्त
नूपाअग्निर्मापातुदुरितादवद्यात् २० त्वमग्नेव्रत
पाअसिदेवआमर्त्येष्वा त्वंयज्ञेष्वीड्यः २१ रास्वे ३३

यत्सोमाभूयोभर देवोनः सविता वसोर्दाता वस्वदात् २२
एषातेशुक्रतनूरेतद्वर्चस्तयासंभवभ्राजंगछ जूरसिधृ
तामनसाजुष्टाविष्णवे २३ तस्यास्तेसत्यसवसः प्रसवे
तनुयंत्रमशीयस्वाहा चंद्रमसिशुक्रमस्यमृतमसिवैश्व
देवमसि २४ चिदसिमनासिधीरसिदक्षिणासिक्षत्रियो
सियज्ञियास्यदितिरस्युभयतः शीर्ष्णी सानः सुप्राचीसु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥३४

६७

प्रतीचीभव ॥ २५ ॥ मित्रस्त्वा परिददातु अभीत्यै पूषाध्वनस्पात्विं
द्रायाध्यक्षाय अनुत्वा माता मन्यतामनुपितानु भ्राता स
गर्भ्योनु सखा सयूथ्यः ॥ २६ ॥ सा देवि देवमच्छेहीन्द्राय सोमं
रुद्रस्त्वा वर्त्तयतु स्वस्ति सोम सखा पुनरेहि ॥ २७ ॥
स्त्वा। वस्व्यस्यदितिरस्यदित्यासि रुद्रासि चंद्रासि ॥ बृहस्पति
ष्ट्वा सुम्नेरम्णातु रुद्रो वसुभिराचके ॥ २८ ॥ अदित्यास्त्वा।

॥३४

६८

मूर्द्धन्नाजिघर्मि देवयजने पृथिव्याः ॥ इडायास्पदमसि
घृतवत्स्वाहा ॥ २९ ॥ अस्मे रमस्वास्मे ते बंधुः त्वे रायो अ
स्मे रायः ॥ ३० ॥ मा वयं रायस्पोषेण वियोष्म तोतो रायः ॥
समर्यो देव्या धिया संदृशा चक्षुषा मा म आयुः
प्रमोषीर्मो अहं तव वीरं विदेय तव देवि संदृशि ॥ ३१ ॥
एष ते गायत्रो भाग इति मे सोमाय ब्रूतादेष ते त्रैष्टुभो भा
भा

३५ ।। ३५

इतिमेसोमायब्रूतात् एषतेजागतोभागइतिमेसोमा
यब्रूतात्छंदोमानानाꣳसाम्राज्यंगछतादितिमसोमायब्रू
तात् २२ आस्माकोसिशुक्रस्तेग्रह्यः विचितस्त्वावि
चिंन्वंतु २३ अभित्यंदेवꣳसवितारमोण्योः कविक्रतु
मर्चामिसत्यसवꣳरत्नधामभिप्रियंमतिंकविं ऊर्ध्वायस्या
मतिर्भाअदिद्युतत्सवीमनिहिरण्यपाणिरमिमीतसु

क्रतुःकृपास्वः २४ प्रजाभ्यस्त्वाप्रजास्त्वानुप्राणंतु
प्रजास्त्वमनुप्राणिहि २५ चंद्रंत्वाचंद्रेणक्रीणामि
शुक्रꣳशुक्रेणामृतममृतेन सग्मेतेगोरस्मेतेचंद्रा
णि २६ तपसस्तनूरसिप्रजापतेर्वर्णः परमेणप
शुनाक्रीयसेसहस्रपोषंपुषेयं२७ मित्रोनएहिसुमि
त्रधइंद्रस्योरुमाविशदक्षिणम् उशन्नुशंतꣳस्योनः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

३६ श्री।

स्योनम् ३८ स्वानभ्राजां॥ रेबंभारेहस्तसुह 61
स्तकृशानो एतेवः सोमक्रयणास्तान्रक्षध्वम्मा
वोदभन् ३९ परिमाग्नेदुश्चरिताद्बाधस्वामा
सुचरितेभज उदायुषास्वायुषोदस्थाममृतां
अनु ४० प्रतिपन्थामपद्महिस्वस्तिगामनेह

62
सम् येनविश्वाः परिद्विषोवृणक्तिविन्दतेवसु
४१ अदित्यास्त्वगस्यदित्यैसद आसीद
अस्तभ्नाद्द्यामृषभोअन्तरिक्षममिमीतवरि
माणंपृथिव्याः आसीदद्विश्वाभुवनानिस
म्राड्विश्वेत्तानिवरुणस्यव्रतानि ४२ वनेषु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

व्यंतरिक्षन्ततानवाजमर्वत्सुपयउस्त्रियासु हृ
त्सुक्रतुंवरुणोविक्ष्वग्निन्दिविसूर्यमदधात्सोम
मद्रौ ७३ सूर्यस्यचक्षुरारोहाग्नेरक्ष्णः कनीन
कम् यत्रेतशेभिरीयसेभ्राजमानोविपश्चि
ता ७४ उस्रावेतंधूर्षाहौयुज्येथामनश्रू

अवीरहणौब्रह्मचोदनौ स्वस्तियजमान
स्यगृहान्गच्छतम् ७५ भद्रोमेसिप्रच्यवस्व
भुवस्पतेविश्वान्यभिधामानि मात्वापरिप
रिणोविदन्मात्वापरिपन्थिनोविदन्मात्वावृ
काअघायवोविदन् श्येनोभूत्वापरापतयज

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥सां॥

॥३८॥ मा नस्यग्रहा न्नाघस्त न्वौस ंस्वस्तनम् ४६
नमो मित्रस्याव रुण स्यच क्षसे महो देवा य
तदृतं सपर्य्यत ॥ दूरेदृशे दे वजाताय के
तवे दिवस्पुत्राय सूर्याय शंसत ४७ व
रुणस्यो त्तंभ्भ नाम सिव रुण स्य स्कंभसर्ज ॥ सं॥
॥३८॥

त

नीस्थः वरुणस्य ऋत सदन्य सिवरुणस्य ऋ
तसदनमसि वरुणस्य ऋतसदनमासीद ४८
याते धामानि हविषा यजंति ता ते विश्वा परि भू
रस्तु यज्ञम् गयस्फानः प्रतरणस्सुवीरो वी
रहा प्रचरा सोम दुर्यान् ४९ ७ ७ ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं० ॥ ३१ ॥ ८८

दशानुवाकेषुनवचत्वारिंशदृक् ॥ ७ ॥ इतिशुक्ल
यजुःकाण्वसंहितायांतुर्थोध्यायः ॥ ४ ॥ ७ ॥ हरिः
ॐ मू अग्नेस्तनूरसिविष्णवेत्वासोमस्यतनू
ध्य रसिविष्णवेत्वा । अतिथेरातिथ्यमसिविष्णवेत्वा
श्येनायत्वासोमभृतेविष्णवेत्वाग्नयेत्वारायै ३१

८९

स्पोषदेविष्णवेत्वा ॥ १ ॥ अग्नेर्जनित्रमसिवृ
षणौस्थः ॥ उर्वश्यस्यायुरसिपुरूरवाअसि
॥ गायत्रेणत्वाछंदसामंथामि त्रैष्टुभेनत्वाछं
दसामंथामिजागतेनत्वाछंदसामंथामि ॥ २ ॥
भवतन्नःसमनसौसचेतसावरेपसौ ॥ मा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ सं ॥
॥ ८५० ॥

७८

यज्ञꣳ हिꣳसिष्टंमा यज्ञपतिंजातवेदसो
शिवोभवतमद्यनः॥३॥ अग्नाअग्निश्चर
तिप्रविष्टऋषीणांपुत्रोअभिशस्तिपावा॥
सनःस्योनःसुयजायजेहदेवेभ्योहव्यꣳसदमप्रयु
छन्स्वाहा॥४॥ आपतयेत्वागृह्णामिपरितयेत्वागृह्णामि ॥ तनून ॥

॥८५०॥

८०

त्रेशाक्वरायशक्मन्नोजिष्ठाय॥५॥ अनाधृष्ट
मस्यनाधृष्यंदेवानामोजः अनभिशस्त्यभिश
स्तिपाअनभिशस्तेन्यम॥६॥ अंजसासत्यमु
पगेषꣳसुवितेमाधाः अग्नेव्रतपास्त्वेव्रतपाः
॥७॥ यातवतनूरियꣳसामयियाममतनूरेषा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं॰
४१

सा त्वयि सहनौव्रतपतेव्रतान्यनुमेदीक्षांदीक्षा
पतिर्म्मन्यतामनुतपस्तपस्पतिः ८ अंशुर
ंशुष्टेदेवसोमाप्यायतामिन्द्रायैकधनविदे
आतुभ्यमिन्द्रः प्यायतामात्वमिन्द्रायप्यायस्व
९ आप्याययास्मान्त्सखीन्त्सन्यामेधया स्व ४१

स्तितेदेवसोमसुत्यामुदृचमशीय १० एष्टारा
यः प्रेषेभगाय ऋतमृतवादिभ्योनमोदिवेनमः
पृथिव्यै ११ यातेअग्नेयः शयातनूर्वर्षिष्ठाग
ह्वरेष्ठा उग्रंवचोअपावधीत्वेषंवचोअपाव
धीत्स्वाहा यातेअग्नेरजः शयातनूर्वर्षिष्ठाग

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ सं० ५
॥ ५२ ॥

हरेष्ठा ॥ उग्रंवचोअपावधीत्वेषंवचोअपावधी
त्स्वाहा ॥ यातेअग्नेहरीशयातनूर्वर्षिष्ठागह्वरेष्ठा
उग्रंवचो० ॥ ७२ ॥ तप्तायनीमेसिवित्तायनीमे
सि ॥ अवतान्माव्यथितमवतान्मानाथितम् ॥ ७३ ॥
विदेरग्नेर्न्नभोनामाग्नेअङ्गिरआयुनानाम्नेहि ॥

॥ ५२ ॥

योस्यांपृथिव्यामसियत्तेनाधृष्टंनामयज्ञियंतेन
त्वादधे ॥ विदेरग्नेर्नभो० ॥ योद्वितीयस्यांपृथिव्या
मसियत्तेनाधृष्टंनामयज्ञियंतेनत्वादधे ॥ विदे० ॥
यस्तृतीयस्यांपृथिव्यामसियत्तेनाधृष्टंनामय
ज्ञियंतेनत्वादधे ॥ अनुत्वादेववीतयेसि ॥ सिंह्यसि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ सं ॥
॥ ४३ ॥

सपत्नसाहीदेवेभ्यः कल्पस्व सिꣳह्यसि सपत्नसा
हीदेवेभ्यः शुंधस्व सिꣳह्यसि सपत्नसाहीदेवे
भ्यः शुंभस्व ॥ १७ ॥ ७ ॥ इंद्रघोषस्त्वावसुभिः
पुरस्तात्पातुप्रचेतास्त्वारुद्रैः पश्चात्पातु ॥
मनोजवास्त्वापितृभिर्दक्षिणतः पातुविश्व ॥ ४३ ॥

कर्मात्वादित्यैरुत्तरतः पातु ॥ १८ ॥ इदमहंतप्तंवा
र्बहिर्धायज्ञान्निः सृजामि ॥ सिꣳह्यसिस्वाहा
सिꣳह्यस्यादित्यवनिः स्वाहा ॥ १९ ॥ सिꣳह्यसि
ब्रह्मवनिः क्षत्रवनिः स्वाहा सिꣳह्यसिसुप्रजा
वनीरायस्पोषवनिः स्वाहा ॥ सिꣳह्यस्यावहदे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं॰
४७ वान्यजमानाय स्वाहा भूतेभ्यस्त्वा १७ ध्रुवोसि
पृथिवीं दृꣳह ध्रुवक्षिदस्यन्तरिक्षं दृꣳह अच्युत
क्षिदसि दिवं दृꣳहाग्नेर्भस्मास्यग्नेः पुरीषमसि
१८ युंजते मन उत युंजते धियो विप्रा विप्रस्य
बृहतो विपश्चितः विहोत्रा दधे वयुनाविदेक इद ४७

८८
न्मही देवस्य सवितुः परिष्टुतिः १९ इदं विष्णुर्वि
चक्रमे त्रेधा निदधे पदम् समूढमस्य पाꣳसु
रे स्वाहा २० इरावती धेनुमती हि भूतꣳ सूयव
सिनी मनवे दशस्या व्यस्कभ्ना रोदसी विष्णव
ए ते दाधर्थ पृथिवीमभितो मयूखैः स्वाहा २१ दे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं०
६५

यश्रुतौदेवेभ्याघोषतम् प्राचीप्रेतमध्वरंक
ल्पयंतीऊर्ध्वंयज्ञंनयतंमाजिह्वरतं २२ स्वेगो
ष्ठमावदतंदेवीदुर्येआयुर्मानिर्वादिष्टंप्रजां
मानिर्वादिष्टं अत्ररमेथांवर्ष्मन्पृथिव्याः २३
विष्णोर्नुकंवीर्याणिप्रवोचंयःपार्थिवानिवि

६५

७०

ममेरजांसि योअस्कभायदुत्तरंसधस्थंवि
चक्रमाणस्त्रेधोरुगायोविष्णवेत्वा २४ दिवो
वाविष्णउतवापृथिव्यामहोवाविष्णउरोरंतरिक्षा
त् उभाहिहस्तावसुनापृणस्वाप्रयच्छदक्षिणा
दोतसव्याद्विष्णवेत्वा २५ प्रतद्विष्णुस्तवतेवी

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं.
७६

वीर्य्येण मृगो न भीमः कुचरो गिरिष्ठाः यस्योरुषु
त्रिषु विक्रमणेष्वधिक्षियंति भुवनानि विश्वा २६ नि
विष्णोरराटमसि विष्णोः श्नप्त्रे स्थो विष्णोः स्यूर
सि विष्णोर्ध्रुवोसि वैष्णवमसि विष्णवे त्वा ।
२७ देवस्य त्वा सवितुः प्रसवेश्विनोर्बाहुभ्यां

७६

पूष्णो हस्ताभ्यां आददे नार्यसीदमहं रक्षसो
ग्रीवा अपिकृंतामि बृहन्नसि बृहद्रवा बृहती
मिंद्राय वाचं वद रक्षोहणं वलगहनं वैष्ण
वीं २८ इदमहं तं वलगमुद्वपामि यन्नो निष्ट्यो
यममात्यो निचखान इदमहं तं वलगमुद्वपा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भ्रियन्नः समानोयमसमानोनिच्यखान इदं
महंतंवलगमुद्वपामियन्नः सबंधुर्यमसबंधु
र्निच्यखान इदमहंतंवलगमुद्वपामियन्नः
सजातोयमसजातोनिच्यखानोत्कृत्यांकिरा
मि २९ स्वराळसिसपत्नहासत्रराळस्यभि ५८

मातिहा जनराळसिरक्षोहासर्वराळस्यमि
त्रहा ३० रक्षोहणोवलगहनः प्रोक्षामिवैष्ण
वान्रक्षोहणोवलगहनोवनयामिवैष्णवा
न्रक्षोहणोवलगहनोवस्तृणामिवैष्णवा
न् ३१ रक्षोहणौवलगहनाउपदधामिवैष्ण

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं०
५८ वीरक्षोहणौ वलगहनौ पर्यूहामि वैष्णवी ॥ वैष्णवम ५८
सि वैष्णवा स्थ ॥ २२ ॥ देवस्य त्वा सवितुः प्रसवेश्वि
नोर्बाहुभ्यां पूष्णो हस्ताभ्याम् ॥ आददे नार्यसीद
महꣳ रक्षसो ग्रीवा अपि कृंतामि ॥ यवोसि यव
यास्मद्द्वेषो यवयारातीः ॥ दिवे त्वांतरिक्षाय त्वा

पृथिव्यै त्वा ॥ २३ ॥ शुंधंतां लोकाः पितृषदनाः पि
तृषदनमसि ॥ उद्दिवꣳ स्तभानांतरिक्षं पृण दृꣳ
ह स्व पृथिव्यां ॥ २४ ॥ द्युतानस्त्वा मारुतो मिनोतु
मित्रावरुणौ ध्रुवेण धर्मणा ॥ ब्रह्मवनि त्वा क्षत्र
वनि रायस्पोषवनि पर्यूहामि ॥ २५ ॥ ब्रह्म दृꣳह

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥सं॰॥
॥५९॥ त्रं दृंहायुर्दृंह प्रजां दृंह ॥ ध्रुवासि ध्रुवोस्मि
न्यजमान आयतने भूयात् ॥ घृतेन द्यावापृ
थिवी पूर्येथामिंद्रस्य छदिरसि विश्वजनस्य
छाया ॥ २८ परि त्वा गिर्वणो गिर इमा भवंतु
विश्वतः ॥ वृद्धायुमनु वृद्धयो जुष्टा भवंतु ॥५९॥

८७

स्य

जुष्टयः ॥ २९ ॥ इंद्रस्यूरसींद्रस्य ध्रुवोसि ॥ ऐंद्र
मसि वैश्वदेवमसि ॥ ३० ॥ विभूरसि प्रवाहणो
वन्हिरसि हव्यवाहनः ॥ श्वात्रोसि प्रचेतास्तुथो
सि विश्ववेदाः ॥ ३१ ॥ उशिगसि कविरंघारिर
सि बंभारिः ॥ अवस्यूरसि दुवस्वान्छुंध्यूरसि

८८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं॰ ९९

५० मार्जालीयः ६० ऋतधामासि स्वर्ज्योतिः समुद्रोसि
विश्वव्यचाः अजोस्येकपादहिरसि बुध्न्यः ६१
सम्राडसि कृशानुः परिषद्योसि पवमानः नभो
सि प्रतक्वा मृष्टोसि हव्यसूदनः ६२ समस्यो
सि विश्ववेदा अनातिरिक्तस्य प्रतिष्ठा अग्नयः ५०

१००

सगरस्थ

सगराः सगरेण नाम्ना रौद्रेणानीकेन पात माग्न
यः पिपृत माग्नयो नमो वोस्तु मा मा हिंसिष्ट ६३
ज्योतिरसि विश्वरूपं विश्वेषां देवानां समित्
त्वं सोम तनूकृद्भ्यो द्वेषोभ्योन्यकृतेभ्यः उरु यं
तासि वरूथं स्वाहा जुषाणो अप्तुराज्यस्य वेतु स्वा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ स० ॥
॥ ५२ ॥ हा ॥ ४४ ॥ अग्ने नय सुपथा राये अस्मान्विश्वा
नि देव वयुनानि विद्वान्। युयोध्यस्मज्जुहुरा
णमेनो भूयिष्ठां ते नम उक्तिं विधेम ॥ ४५ ॥ अय
न्नो अग्निर्वरिवस्कृणोत्वयम्मृधः पुर एतु प्रभिं
दन्। अयं वाजाञ्जयतु वाजसाताऽयं शत्रूं ॥ ५२ ॥

सुतावतः। उप ब्रह्माणि वाघतः ॥ ७३ ॥ इंद्रा याहि तू
तुजान उप ब्रह्माणि हरिवः। सुते दधिष्व नश्चनः
॥ ७४ ॥ अश्विना पिबतां मधु सरस्वत्या सजोषसा।
इंद्रः सुत्रामा वृत्रहा जुषंतां सोम्यं मधु ॥ ७५ ॥ ७ ॥
अष्टानुवाकेषु पंचसप्ततिः ॥ ७ ॥ इति शुक्लयजुर्वे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं·
३१ द संहितायां ह्वाविंशतितमोध्यायः ॥ हरिः ॐ ॥ इमम्मे
वरुणश्रुधीहवमद्याचमृडय । त्वामवस्युराचके १
तत्वायामिब्रह्मणावंदमानस्तदाशास्तेयजमा
नोहविर्भिः । अहेडमानोवरुणेहबोध्युरुशंस
मानआयुःप्रमोषीः ॥ २ ॥ त्वन्नोअग्नेवरुणस्यवि ३१

१०२

जं

ज यतुर्हृषाणः स्वाहा ॥ ३६ ॥ उरुविष्णोविक्रमस्वो
रुक्षयायनस्कृधि । घृतंघृतयोनेपिबप्रप्रयज्ञ
पतिंतिरस्वाहा ॥ ३७ ॥ देवसवितरेषतेसोम
स्तंरक्षस्वमात्वादभन् । एतत्त्वंदेवसौदेवोदे म
वाँउपागाः ॥ ३८ ॥ इदमहंमनुष्यान्सहरायस्पो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

से॰
५२ षेण स्वाहा निर्वरुणस्य पाशान्मुच्ये अग्ने व्रतपा
स्त्वे व्रतपाः ४९ या तव तनूरियᳬं सा मयि
यो मम तनूरेषा सा त्वयि सह नौ व्रतपते
व्रतान्यनु मे दीक्षां दीक्षापतिरमᳬंस्तानु
तपस्तपस्पतिः ५० उरु विष्णो० ५१ अत्य ५२

न्यां अगां नान्यां उपागां अर्वाक्त्वा परेभ्यः
परोवरेभ्यः ५२ तं त्वा जुषामहे देव वनस्पते
देवयज्यायै देवास्त्वा देवयज्यायै जुषंतां वि
ष्णवे त्वा ५३ ओषधे त्रायस्व स्वधिते मैनᳬं हिᳬं
सीः दिवं मा लेखीरंतरिक्षं मा हिᳬंसीः पृथि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥श्री॥ १०५

॥५३॥ व्यासंभव ॥४२॥ अयꣳहित्वास्वधितिस्तेतिजा
नः प्रणिनाय महते सौभगाय अतस्त्वंदेवव
नस्पते शतवल्शोविरोह सहस्रवल्शा विव
यꣳरुहेम ॥४३॥ ७ ॥ ७ ॥ इत्यनुवाकेषु पंचमोध्या
यः ॥७॥ इति शुक्लयजुर्वेदसंहितायां पंचमोध्यायः ॥५३॥

१०६

देवस्य त्वा सवितुः प्रसवेश्विनोर्बाहुभ्यां पूष्णो हस्ता
भ्यां ॥ आददे नार्यसीदमहꣳरक्षसां ग्रीवा अपि
कृंतामि ॥ यवोसि यवयास्मद्द्वेषो यवयातीः रा
दिवे त्वांतरिक्षाय त्वा पृथिव्यै त्वा ॥ शुंधंतां लोकाः
पितृषदनाः पितृषदनमसि ॥१॥ अग्रेणीरसि स्वा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ सं० ॥ १०७
॥ ५७ ॥ धेशाउन्वेतृणामेतस्य वित्ता दधिस्वास्थास्यति ॥ देव
वस्त्वासवितामध्वानक्तुसुपिप्पलाभ्यस्त्वौषधीभ्यः ॥
द्यामग्रेणास्पृक्ष आंतरिक्षंमध्येनाप्राः पृथिवी
मुपरेणादृंहीः ॥ २ ॥ यातेधामान्युश्मसिगमध्यैय
त्रगावोभूरिशृंगाअयासः ॥ अत्राहतदुरुगायस्य ॥ ५८ ॥

१०८
विष्णोः परमंपदमवभारिभूरि ॥ ३ ॥ ब्रह्मवनित्वाक्षत्र
वनिरायस्पोषवनिपर्यूहामि ॥ ब्रह्मदृंहक्षत्रंदृं
हायुर्दृंहप्रजांदृंह ॥ ४ ॥ विष्णोः कर्माणिपश्यतय
तोव्रतानिपस्पशे ॥ इंद्रस्ययुज्यः सखा ॥ ५ ॥ तद्वि
ष्णोः परमंपदंसदापश्यंतिसूरयः ॥ दिवीवच

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स०॥
॥५५॥ क्रूरा तत्तं ॥ ६ ॥ परिवीरसि परि त्वा दैवीर्विशो व्ययन्तां ॥
परीमं यजमानं रायो मनुष्याणां ॥ दिवः सूनुर
स्येष ते पृथिव्यां लोक आरण्यस्ते पशुः ॥ ७ ॥ उपा
वीरस्युप देवान् दैवीर्विशः प्रागुरुशिजो वह्नित
मान् । देव त्वष्टर्वसु रम हव्या ते स्वदन्तां ॥ ८ ॥ रे ॥५५॥

वतीरमध्वं बृहस्पते धारया वसूनि ॥ ऋतस्य
त्वा देव हविः पाशेन प्रतिमुञ्चामि धर्षा मानु
षः ॥ देवस्य त्वा ॥ १० ॥ अग्नीषोमाभ्यां जुष्टं नियुन
ज्मि ॥ अद्भ्यस्त्वौषधीभ्यः प्रोक्षाम्यनु त्वा माता म
न्यतामनु पिता नु भ्राता सगर्भ्योनु सखा सयूथ्यः ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ सं० ॥ १११
॥ ५६ ॥ अग्नीषोमाभ्यांत्वाजुष्टं प्रोक्षामि ॥ १० ॥ अपांपेरुर
स्यापोदेवीः स्वदंतु स्वात्तंचित्सद्देवहविः संते
प्राणोवातेनगच्छतां समंगानियजत्रैः संयजमा
नआशिषा ॥ १२ ॥ घृतेनाक्तौपशुंस्त्रायेथां रेवति
यजमाने प्रियंधाआविश ॥ १३ ॥ उरोरंतरिक्षा ॥ ५६

११२
सजूर्देवेनवातेन ॥ अस्य हविषस्त्मनायजसम
स्यतन्वाभव ॥ १४ ॥ वर्षोवर्षीयसियज्ञेयज्ञपतिंधाः ॥
स्वाहादेवेभ्योदेवेभ्यस्वाहा ॥ माहिर्भूर्मापृदाकुः ॥ १५ ॥
नमस्तआतानानर्वाप्रेहि ॥ घृतस्यकुल्याउपऋत
स्यपथ्याउप ॥ १६ ॥ देवीरापःशुद्धावोढ्वंसुपरिविष्टा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥सं०॥
॥५७॥

देवेभ्यः॥ सुपरिविष्टा वयं परिवेष्टारो भूयास्म ॥ १७ ॥
वाचं ते शुंधामि प्राणं ते शुंधामि चक्षुस्ते शुंधा
मि श्रोत्रं ते शुंधामि॥ नाभिं ते शुंधामि मेढ्रं ते शुं
धामि पायुं ते शुंधामि चरित्रांस्ते शुंधामि ॥ १८ ॥
मनस्त आप्यायतां वाक्त आप्यायतां प्राणस्त ॥५७॥

आप्यायतां चक्षुस्त आप्यायतां श्रोत्रं त आप्या
यतां॥ यत्ते क्रूरं यदास्थितं तत्त आप्यायतां तत्ते नि
ष्ट्यायतां तत्ते शुध्यतु शमहोभ्यः॥ १९ ॥ ओषधे त्रा
यस्व स्वधिते मैनं हिंसीः॥ रक्षसां भागोसि नि
रस्तं रक्षः॥ २० ॥ इदमहं रक्षोभितिष्ठामीदमहं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं
५८ रक्षोवबाधे इदमहं रक्षो धमं तमो नयामि २१
घृतेन द्यावापृथिवी प्रोर्णुवाथां वायो वेस्तोकानां
जुषाणो अग्निराज्यस्य वेतु स्वाहा स्वाहा कृतेऊ
र्ध्वं नभसं मारुतं गच्छतम् २२ संते मनो मनसा
सं प्राणः प्राणेन गच्छतां रेडस्यग्निष्ट्वा श्रीणा ५८

त्वापस्त्वा समरिणन् २३ घृतस्य त्वाभ्राज्यै पृष्ठो
रध्वं स्वाहाजुष्मणो व्यथिषत प्रयुतं द्वेषः २४ घृतं
घृतपावानः पिबत वसां वसापावानः पिबत अं
तरिक्षस्य हविरसि स्वाहा २५ दिशः प्रदिश आ
दिशो विदिश उद्दिशो दिग्भ्यः स्वाहा ऐंद्रः प्राणो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं ॥ ११८

॥५१॥ अङ्गे अङ्गे निधीतये द्रुउद्गानो अङ्गे अङ्गे निदीधे
॥२६॥ देवत्वष्टर्भूरितेसꣳसमेतुसलक्ष्मायद्विषु
रूपंभवाति देवत्रायंतमवसेसखायोनुत्वामा
तापितरोमदंतु ॥२७॥ ७ ॥ समुद्रंगछस्वाहादेव
ꣳसवितारंगछस्वाहा अंतरिक्षंगछस्वाहामि ॥५१॥

त्रावरुणौगछस्वाहा अहोरात्रेगछस्वाहाछं
दाꣳसिगछस्वाहा द्यावापृथिवीगछस्वाँसोमं हा
गछस्वाहा यज्ञंगछस्वाहानभोदिव्यंगछस्वा
हा अग्निंवैश्वानरंगछस्वाहा मनोमेहार्दियछ ॥ २९
दिवंतेधूमोगछत्वंतरिक्षंज्योतिः पृथिवीभ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ सं. ॥
॥ ६ ॥ स्मनाप्रणस्वाहा २० मापोमौषधीर्हिंसीर्द्धाम्नोधा
म्नोराजंस्ततोवरुणनोमुंच यदाहुरघ्न्याइति
वरुणेतिशपामहेततोवरुणनोमुंच २ सुमि
त्रियानआपओषधयःसंतुदुर्मित्रियास्तस्मै
संतु योस्मांद्वेष्टियंचवयंद्विष्मः २१ इदमापः ॥ ६ ॥

प्रवहतयत्किंचदुरितंमयि यद्वाहमभिदुद्रोहय
द्वाशेपउतानृतम् २२ हविष्मतीरिमाआपोह
विष्मांआविवासति हविष्मांदेवोअध्वरोहवि
ष्मांअस्तुसूर्यः २३ अग्नेर्वोपन्नगृहस्यसद
सिसादयामि इंद्राग्न्योर्भागधेयीस्थमित्राव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं
६२ रुणयो र्भागधेयीस्थ ॥ विश्वेषां देवानां भागधेयी
स्थ ॥ २४ ॥ अमूर्या उप सूर्ये याभिर्वा सूर्यः सह
ता नो हिन्वंत्वध्वरं ॥ २५ ॥ हृदे त्वा मनसे त्वा दिवे त्वा सूर्या
य त्वा ऊर्ध्वो अध्वरं दिवि देवेषु होत्रा यच्छ ॥ २६ ॥
सोम राजन् विश्वास्त्वं प्रजा उपावरोह । विश्वास्त्वां ६२

१२१

प्रजा उपावरोहंतु ॥ २७ ॥ शृणोत्वग्निः समिधा हवं मे
शृण्वंत्वापो धिषणाश्च देवीः ॥ श्रोता ग्रावाणो वि
दुषो न यज्ञं शृणोतु देवः सविता हवं मे स्वाहा ॥ २८ ॥
देवीरापो अपान्नपाद्यो व ऊर्मिर्हविष्यः ॥ इंद्रियावा
न्मदिंतमः ॥ २९ ॥ तं देवेभ्यो देवत्रा दत्त शुक्रपेभ्यः ॥

१२२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं ६२

येषांभागस्थस्वाहा ४० कार्षिरसिसमुद्रस्यत्वाक्षि
त्याउन्नयामि समापोअद्भिरग्मतसमोषधीभि
रोषधीः यमग्नेपृत्सुमर्त्यमवावाजेषुयंजुनाः
सयंताशश्वतीरिषःस्वाहा ४१ देवस्यत्वासवि
तुःप्रसवेश्विनोर्बाहुभ्यांपूष्णोहस्ताभ्यां आद

६२ १२३

१२४

देरावासिगभीरमिममध्वरंकृधींद्रायसुषूतमं
उत्तमेनपविनोर्जस्वंतंमधुमंतंपयस्वंतं निग्रा
भ्यास्थदेवश्रुतस्तर्पयतमा ४३ मनोमेतर्पयत
वाचंमेतर्पयतप्राणंमेतर्पयतचक्षुर्मेतर्पयतश्रो
त्रंमेतर्पयत आत्मानंमेतर्पयतप्रजामेतर्पयत

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥सं०॥
॥६३॥ प्रश्नन्मे तर्पयत गणा न्मे तर्पयत गणा मे मा वितृष
न् ४४ इंद्राय त्वा वसुमते रुद्रवते इन्द्राय त्वादि
त्यवते इंद्राय त्वाभिमातिघ्ने श्येनाय त्वा सोमभृ
तेग्नये त्वा रायस्पोषदे ४५ यत्ते सोम दिवि ज्योति
र्यत्पृथिव्यां यदुरा अंतरिक्षे॥ तेनास्मै यजमाना ॥६३॥

योरु राये कृध्यधि दात्रे वोचः॥ ४६॥ श्वात्रा स्थ वृ
त्रतुरो राधोगूर्त्ता अमृतस्य पत्नीः॥ ता देवीर्देवत्रे
मं यज्ञं नयतोपहूताः सोमस्य पिबत॥ ४७॥ मा भे
र्मा संविक्था ऊर्ज्जं धत्स्व धिषणे वीड्वी सती वीड
येथामूर्जं दधाथाम्॥ पाप्मा हतो न सोमः॥ ४८॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥सं०॥ १२७
॥६७॥ प्रागपागुदगधराक्सर्वतःस्त्वादिशआधावंतु
अंबनिष्परसमरीर्विदाम् ४९ त्वमंगप्रशंशिषो
देवःशविष्ठमर्त्यम् नत्वदन्योमघवन्नस्तिमर्डि
तेंद्रब्रवीमितेवचः ॥५०॥ अष्टानुवाकेषुपंचात्र ॥
इतिशुक्लयजुर्वेदसंहितायांषष्ठोध्यायः ॥६॥
६७

१२८

हरिःॐम् ॥ वाचस्पतयेपवस्ववृष्णोअंशुभ्यां
गभस्तिपूतः देवोदेवेभ्यःपवस्वयेषांभागोसि
मधुमतीर्नइषस्कृधि ॥१॥ यत्तेसोमादाभ्यंनामजा
गृवितस्मैतेसोमसोमायस्वाहा स्वाहोर्वंतरिक्ष
मन्वेमिस्वांकृतोसिविश्वेभ्यइंद्रियेभ्योदिव्येभ्यः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ सं० ॥
॥ ६५ ॥

पार्थिवेभ्यः॥२॥ मनस्त्वाष्टुस्वाहात्वास्वभवः सूर्या
य देवेभ्यस्त्वामरीचिपेभ्यो देवांशो यस्मैत्वेडे
तत्सत्यमुपरिप्रुताभंगेन हतासौ फट् प्राणाय त्वा
व्यानाय त्वा ॥३॥ उपयामगृहीतोस्यंतर्यछमघव
न्पाहि सोमं ॥ उरुष्यरायो वेषोयजस्व ॥४॥ अंत

॥ ६६ ॥

स्ते द्यावापृथिवी दधाम्यंतर्दधाम्युर्वंतरिक्षम्
सजूर्देवेभिरवरैः परैश्चांतर्यामे मघवन्माद
यस्व ॥ स्वाहोर्वंतरिक्षमन्वेमि स्वांकृतोसि विश्वे
भ्य इंद्रियेभ्यो दिव्येभ्यः पार्थिवेभ्यः॥ मनस्त्वाष्टुस्वा
हात्वास्वभवः सूर्याय ॥ देवेभ्यः स्वामरीचिपेभ्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं.
६६

हानाय त्वा ५ आवायो भूषश्शुचिपा उप नः स
हस्रं ते नियुतो विश्ववार उपो ते अंधो मद्यमया
मि यस्य देव दधिषे पूर्वपेयं वायवे त्वा ६ इन्द्र
वायू इमे सुता उप प्रयोभिरागतं इंदवो वामु
शंति हि उपयामगृहीतोसि वायव इंद्रवायु ६६

१३१

१३२

भ्यां त्वैष ते योनिः सजोषोभ्यां त्वा ७ अयं वां
मित्रावरुणा सुतः सोम ऋतावृधा ममेदिह श्रु
तꣳ हवम् ॥ उपयामगृहीतोसि मित्रावरुणाभ्यां
त्वा ८ राया वयꣳ ससवाꣳसो मदेम हव्येन देवा
यवसेन गावः तां धेनुं मित्रावरुणा युवन्नो वि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स॰
६८ श्वारोधत्तमनेपस्फुरंतीं एषतेयोनिर्ऋतायुभ्यां
त्वा ९ यावांकशामधुमत्यश्विनासूनृतावती
तयायज्ञंमिमिक्षतं उपयामगृहीतोस्यश्विभ्यां
त्वैषतेयोनिर्माध्वीभ्यांत्वा १० तंप्रत्नथापूर्वथा
विश्वथेमथाज्येष्ठतातिंबर्हिषदꣳस्वर्विदं प्रती ६८

चीनंवृजनंदोहसेधुनिमाशुंजयंतमनुयासुवर्द्ध स
से उपयामगृहीतोसिशंडायत्वा ११ एषतेयो
निर्वीरतांपाह्यपमृष्टःशंडोदेवास्त्वाशुक्रपाः
प्रणयंत्वनाधृष्टासि सुवीरोवीरान्प्रजनयन्प
रीह्यभिरायस्पोषेणयजमानं संजग्मानोदिवा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं॰
६८ पृथिव्याः शुक्रः शुक्रशोचिषा निरस्तः शंडः शुक्र
स्याधिष्ठानमसि १२ अच्छिन्नस्य ते देव सोम॰ रा सुवीर्यस्य
यस्पोषस्य ददितारः स्याम सा प्रथमा संस्कृति
र्विश्ववारा स प्रथमो वरुणो मित्रो अग्निः १३
स प्रथमो बृहस्पतिश्चिकित्वांस्तस्मा इन्द्राय सु ॥६८॥

तमाजुहोत स्वाहा तृंपंतु होत्रा मध्वो याः स्विष्टं या सु
य स्सुभृतं स्वाहा १४ अयं वेनश्चोदयत्पृश्निग
र्भा ज्योतिर्जरायू रजसो विमाने इममपां संग
मे सूर्यस्य शिशुं न विप्रा मतिभी रिहंति उपयाम
गृहीतोसि मर्काय त्वा १५ मनो न येषु हवनेषु ति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१३०

सं॰ ॥
६९ ॥

ग्मंविपंद्राच्यावनुथोद्वंता आभः शार्याभिस्स्फ्यविन्न
म्णोअस्याश्रीणीतादिशंगभस्तौ ॥२६॥ एषतेयोनिः
प्रजाःपाह्यमृक्षोमर्कोदेवास्यामंथिपाःप्रणयंच
नोध्वप्रासि सुप्रजाःप्रजाःप्रजनयंन्परीह्यभिराय
स्पोषेणयजमानम् संजग्मानोदिवापृथिव्यामंथी
पे

॥६९॥

१३०

मंथिद्रोण्विषाग्निरस्तोमर्कोमंथिनोधिष्ठानमसि
॥२७॥ अच्छिन्नस्यतेदेवसोमसुवीर्यस्यरायस्पोष
स्यदद्दितारस्याम साप्रथमासंस्कृतिर्विश्ववा
रासप्रथमोवरुणोमित्रोअग्निः ॥२८॥ सप्रथमोबृ
हस्पतिश्चिकित्वांस्तस्माइन्द्रायसुतमाजुहोतस्वा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं०
७०

हा त्वंपेतुहोत्रामधोर्यत्स्विष्टंयत्सुभृतंयत्स्वाहा १९
येदेवासोदिव्येकादशास्थपृथिव्यामध्येकादशास्थ अ
प्सुक्षितोमहिनैकादशास्थतेदेवासोयज्ञमिमंजुषध्वं
२० ७ उपयामगृहीतोस्याग्रयणोसिस्वाग्रयणः
पाहियज्ञंपाहियज्ञपतिं २१ विष्णुस्त्वामिंद्रियेणपा

७०

तुविष्णुंत्वंपाह्यभिसवनानिपाहि सोमःपवतेसो
मःपवतेसोमःपवते २२ अस्मैब्रह्मणेपवतेस्मैक्ष
त्रायपवतेस्मैसुन्वतेयजमानायपवते इषऊर्ज्जेप
वतेद्भ्यओषधीभ्यःपवतेद्यावापृथिवीभ्यांपवतेसु
भूतायपवतेब्रह्मवर्चसायपवते विश्वेभ्यस्त्वादेवेभ्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥स॰॥ १२१

॥७१॥

एषतेयोनिर्विश्वेभ्यस्त्वादेवेभ्यः॥२३॥उपयामगृ

हीतोसींद्रायत्वाबृहद्वतेवयस्वतउक्थायुवंगृह्णा स्व

मि यत्तइंद्रबृहद्वयस्तस्मैत्वाविष्णवेत्वैषतेयोनि

रुक्थेभ्यस्त्वा॥२४॥देवेभ्यस्त्वादेवायुवंगृह्णामिय

ज्ञस्यायुषेमित्रावरुणाभ्यांत्वादेवायुवंगृह्णामि ॥७१॥

१४२

यज्ञस्यायुषे॥इंद्रायत्वादेवायुवंगृह्णामियज्ञस्या

युषइन्द्राग्निभ्यांत्वादेवायुवंगृह्णामियज्ञस्यायुषे॥

इंद्रायत्वादेवायुवंगृह्णामियज्ञस्यायुषइंद्रावरु

णाभ्यांत्वादेवायुवंगृह्णामियज्ञस्यायुषे॥इंद्राबृह

स्पतिभ्यांत्वादेवायुवंगृह्णामियज्ञस्यायुषइंद्रा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं० ॥
७२

विष्णुभ्यां त्वा देवायुवं गृह्णामि यज्ञस्यायुषे २५
मूर्द्धानं दिवो अरतिं पृथिव्या वैश्वानरमृत आ
जातमग्निं कविꣳसम्राजमतिथिं जनानामा
सन्न्वा पात्रं जनयंदेवाः २६ उपयामगृहीतो
सि ध्रुवोसि ध्रुवक्षितिर्ध्रुवाणां ध्रुवतमोच्युता ॥७२

त

१४३

१४४

नामच्युतक्षित्तमः ॥ एष ते योनिर्वैश्वानराय
त्वा ॥ २७ ॥ ध्रुवं ध्रुवेण मनसा वाचा सोममवन
यामि ॥ अथा न इंद्र इद्विशोसपत्नाः समनस
स्करत् ॥ २८ ॥ यस्ते द्रप्सस्कंदति यस्ते अꣳशुर्ग्रा
वच्युतो धिषणयोरुपस्थात् अध्वर्योर्वा परि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ले॰॥ ॥७३॥ वायः पवित्रात्ते तेजुतोमि मनसावषट्कृत ५ १२५
स्वाहा देवानामुत्क्रमणमसि ॥२९॥ उपयामगृही
तोसि मधवेत्वोपयामगृहीतोसि माधवायत्वा
उपयामगृहीतोसि शुक्रायत्वोपयामगृहीतोसि
शुचयेत्वा उपयामगृहीतोसि नभसेत्वोपया ॥७३॥

१२६
मगृहीतोसि नभस्यायत्वा उपयामगृहीतोसीषे
त्वोपयामगृहीतोस्यूर्जेत्वा उपयामगृहीतोसि
सहसेत्वोपयामगृहीतोसि सहस्यायत्वा उपया
मगृहीतोसि तपसेत्वोपयामगृहीतोसि तपस्या
यत्वा उपयामगृहीतोस्यंहसस्पतयेत्वा ॥३०॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं.
७५

म

इंद्राग्नी आगतꣳ सुतं गीर्भिर्नभो वरेण्यं अस्य
पातं धियेषिता उपयामगृहीतोसींद्राग्निभ्यां त्वै
षते योनिरिंद्राग्निभ्यां त्वा ३१ आघाये अग्नि
मिंधते स्तृणंति बर्हिरानुषक् येषामिंद्रो युवा य०
सखा उपयामगृहीतोस्यग्नींद्राभ्यां त्वैषते यो ७५

निरग्नींद्राभ्यां त्वा ३२ ओमासश्चर्षणीधृतो
विश्वेदेवास आगत दाश्वाꣳसो दाशुषः सुतम्
उपयामगृहीतोसि विश्वेभ्यस्त्वा देवेभ्य एषते यो
निर्विश्वेभ्यस्त्वा देवेभ्यः ३३ विश्वेदेवास आग
त शृणुता मइमꣳ हवम् एदं बर्हिर्निषीदत उप

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ सं ॥
॥७५॥

यामगृहीतोसि विश्वेभ्यस्त्वा देवेभ्य एष ते योनिर्वि १४९
श्वेभ्यस्त्वा देवेभ्यः ॥३४॥ इन्द्र मरुत्व इह पाहि सोमं ह
यथा शार्याते अपिबः सुतस्य तव प्रणीती तव
शूर शर्मन्ना विवासंति कवयः सुयज्ञाः उपयाम
गृहीतोसीन्द्राय त्वा मरुत्वत एष ते यो^रिन्द्राय त्वाम ॥७५॥
नि

१५०

रुत्वते ॥३५॥ मरुत्वंतं वृषभं वावृधानमकवारिं
दिव्यं शासमिन्द्रम् विश्वासाहमवसे नूतना
योग्रं सहोदामिह तं हुवेम उपयामगृहीतो
सीन्द्राय त्वा मरुत्वते उपयामगृहीतोसि मरुतां
मोजसे त्वा ॥३६॥ सजोषा इन्द्र सगणो मरुद्भिः सो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं॰ १५१
७६

संपिबवृत्रहाशूरविद्वान् जहिशत्रूं रपमृधो
नुदस्वाथाभयंकृणुहिविश्वतोनः उपयामगृ०
३७ महांइन्द्रोनृवदाचर्षणिप्राउतद्विबर्हाअमि
नःसहोभिः अस्मद्र्यग्वावृधेवीर्यायोरुः पृथुः
सुकृतः कर्तृभिर्भूत् उपयामगृहीतोसिमहेन्द्र ७६

१५२

यत्वैषतेयोनिर्महेन्द्रायत्वा ३८ महांइन्द्रोयःओ
जसापर्जन्योवृष्टिमांइव स्तोमैर्वत्सस्यवावृधे
उपयामगृहीतोसिमहेन्द्राय॰ ३९ ॥ ॥
द्वाविंशतिरनुवाकेषुचत्वारिंशत ॥ इतिशुक्ल
यजुर्वेदसंहितायांसप्तमोध्यायः ॥ हरिःॐ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कदाचनस्तरीरसि नेन्द्र सश्चसि दाशुषे । उपोपे
न्नु मघवन्भूय इन्नु ते दानं देवस्य पृच्यत आदि
त्येभ्यस्त्वा १ कदाचन प्रयुच्छस्युभे निपासि ज
न्मनी तुरीयादित्य सवनं त इंद्रियमातस्थावमृ
तं दिव्यादित्येभ्यस्त्वा २ यज्ञो देवानां प्रत्ये ८८

ति सुम्नमादित्यासो भवता मृडयन्तः । आ वो
ऽर्वाची सुमतिर्ववृत्याद् अंहोश्चिद्या वरिवो वि
त्तरासदादित्येभ्यस्त्वा विवस्वां आदित्यैष ते सो
मपीथस्तस्मिन्मत्स्व ३ श्रदस्मै नरो वचसे
दधातनयदाशीर्दा दंपती वाममश्नुतः । पुमा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं

७८ सुत्रोज्जायतेविन्दतेवस्वधाविश्वाहारपएध
तेगृहे ६ वाममद्यसवितर्वाममुश्वोदिवेदिवे
वाममस्मभ्यꣳसावीः वामस्यहिक्षयस्यदे
वभूरेरयाधियावामभाजस्याम ७ उपया
मगृहीतोऽसिसावित्रोऽसिचनोधाश्चनोम १५५

यिधेहि जिन्वयज्ञंजिन्वयज्ञपतिंभगायसवि १५६
त्रेया ८ उपयामगृहीतोऽसिसुशर्मोऽसिसुप्रति
ष्ठानोबृहदुक्षायनमः विश्वेभ्यस्त्वादेवेभ्यए
षतेयोनिर्विश्वेभ्यस्त्वादेवेभ्यः ९ उपयाम
गृहीतोऽसिबृहस्पतिसुतस्यतेदेवसोम इंद

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं०
८९

इंद्रियावतः पत्नीवतो ग्रहांॠध्यासं ८ अहं
परस्तादहमवस्ताद्यदंतरिक्षं तदुमेपितास
भूत् ॥ अहंसूर्यमुभयतोददर्शाहंदेवानांपरमंगुहा
यत् ९ अग्नेवाक्पत्निसजूर्देवेनत्वष्ट्रा सो
मंपिबस्वाहा १० प्रजापतिर्वृषासिरेतोधा ८९

रेतोमयिधेहि प्रजापतेस्तेवृष्णोरेतोधसोरेतो
धामशीय ११ उपयामगृहीतोसिहरिरसिहारि
योजनोहरिभ्यांत्वा हर्योर्धानास्थसहसोमाइं
द्राय १२ यस्तेदेवसोमाश्वसनिर्भक्षोयोगो
सनिःतस्यतइष्टयजुषस्तुतस्तोमस्यशस्तो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं॰ ८ १५९

क्षयस्योपहूतउपहूतस्यभक्षयामि ॥ ३३ ॥ युक्ष्वा
हिकेशिनाहरीवृषणाकक्ष्यप्रा अथानइंद्रसो
मपागिरामुपश्रुतिंचर उपयामगृहीतोसीं
द्रायत्वाषोळशिनएषतेयोनिरिंद्रायत्वाषोळ
शिने ॥ ३४ ॥ आतिष्ठवृत्रहंरथंयुक्तातेब्रह्म ८०

१६०

णाहरी अर्वाचीनंसुतेमनोग्रावाकृणोतुव
ग्नुना उपयामगृहीतोसींद्रायत्वाषोळशिन
ए ॥ ३५ ॥ इंद्रमिद्धरीवहतोप्रतिधृष्टशवसं
ऋषीणांचस्तुतीरुपयज्ञंचमानुषाणां उपया
मगृहीतोसींद्रायत्वाषोळ ॥ ३६ ॥ यस्मान्नजा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ सं ॥
॥ ८१ ॥

तः परो अन्यो अस्ति य आविवेश भुवनानि वि
श्वा प्रजापतिः प्रजया संरराणस्त्रीणि ज्योतीं
षि सचते स षोडशी १७ इंद्रश्च सम्राड् वरुण
श्च राजा तौ ते भक्षं चक्रतुरग्र एतम् तयोरहम
नु भक्षं भक्षयामि वाग्देवी जुषाणा सोमस्य तृप्य ॥ ८१ ॥

तु सह प्राणेन स्वाहा ॥ १८ ॥ अग्न आयूंषि पवस आ
सुवोर्ज्जमिषं च नः ॥ आरे बाधस्व दुछुनां ॥ उपयामगृ
हीतोस्यग्नये त्वा वर्च्चस एष ते योनिरग्नये त्वा वर्च्चसे
अग्ने वर्च्चस्विन् वर्च्चस्वांस्त्वं देवेष्वसि वर्च्चस्वानहं मनु
ष्येषु भूयासम् ॥ १९ ॥ अग्ने पवस्व स्वपा अस्मे वर्च्चः सु
वीर्यम् ॥ दधद्रयिं मयि पोषम् ॥ उपयामगृहीतोस्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं०
८२

ग्नयेत्वावर्चसएषतेयोनिरग्नयेत्वावर्चसे अग्ने
वर्चस्विन्वर्चस्वांस्त्वंदेवेष्वसि वर्चस्वानहंमनुष्ये
षुभूयासम् ३८ उत्तिष्ठन्नोजसासहपीत्वीशिप्रेअवे
पयः सोममिंद्रचमूसुतम् उपयामगृहीतोसींद्रा
यत्वौजसएषतेयोनिरिंद्रायत्वौजसे इंद्रौजस्विन्नो
जस्वांस्त्वंदेवेष्वसि ओजस्वानहंमनुष्येषुभूयासं ३९ ८२

१६३

१६४

अदृश्रमस्यकेतवोविरश्मयोजनांअनु भ्राजंतोअ
ग्नयोयथा उपयामगृहीतोसिसूर्यायत्वाभ्राजएष
तेयोनिःसूर्यायत्वाभ्राजे सूर्यभ्राजस्विन्भ्राजस्वां
स्त्वंदेवेष्वसि भ्राजस्वानहंमनुष्येषुभूयासं ४०
उदुत्यंजातवेदसंदेवंवहंतिकेतवः दृशेविश्वायसू

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं० ८३

र्यम् उपयामगृहीतोसिसूर्यायत्वाभ्राजएषतेयोनिः
सूर्यायत्वाभ्राजे सूर्यभ्राजस्वन्भ्राजस्वाः स्त्वंदेवेष
सि भ्राजस्वानहंमनुष्येषुभूयासम् ४२ चित्रंदेवा
नामुदगादनीकंचक्षुर्मित्रस्यवरुणस्याग्नेः आप्रा
द्यावापृथिवीअंतरिक्षंसूर्यआत्माजगतस्तस्थुष
श्च उपयामगृहीतोसिसूर्या० सूर्यभ्राजस्वन्नत्वा०

भ्राजस्वानहं० ॥२४॥ विनइंद्रमृधोजहिनीचायच्छपृ
तन्यतः योअस्मांअभिदासत्यधरंगमयातमः उ
पयामगृहीतोसींद्रायत्वाविमृधएषतेयोनिरिंद्राय
त्वाविमृधे ॥२५॥ वाचस्पतिंविश्वकर्माणमूतयेमनोजु
वंवाजेअद्याहुवेम सनोविश्वानिहवनानिजोष
द्विश्वशंभूरवसेसाधुकर्मा उपयामगृहीतोसींद्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं. ८४

पृथिवीमुतद्यां

पत्याविश्वकर्मणएषतेयोनिरिंद्रायत्वाविश्व
कर्मणे २६ विश्वकर्मन्हविषावावृधानः स्व
यंयजस्व मुह्यंत्वन्येअभितःस
पत्नाइहास्माकंमघवासूरिरस्तु उपयामगृ ८४

हीतोसींद्रायत्वाविश्व० २७ विश्वकर्मन्हविषा
वर्द्धनेनत्रातारमिंद्रमकृणोरवध्यम् तस्मैवि
शः समनमंतपूर्वीरयमुग्रोविहव्योयथास
त् उपयामगृहीतो० २८ उपयामगृहीतोस्य
ग्नयेत्वागायत्रछंदसंगृण्हामीन्द्रायत्वात्रिष्टु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स॰
८९

प्छंदसंगृण्हामि विश्वेभ्यस्त्वादेवेभ्योजगछंद
संगृण्हाम्यनुष्टुप्तेभिगरः २९ प्रेष्णीनांत्वाप
त्मन्नाधूनोमिकुकूननानांत्वापत्मन्नाधूनो
मिभंदनानांत्वापत्मन्नाधूनोमिमदिंतमानां
त्वापत्मन्नाधूनोमि ॥ शुक्रंत्वाशुक्रआधूनो ८९

भ्यन्हौरूपेसूर्यस्यरश्मिषु ॥ ३० ॥ ककुहंरूपंवृषभ
स्यरोचतेबृहत्सोमः सोमस्यपुरोगाः शुक्रः शुक्रस्य
पुरोगाः ॥ यत्तेसोमादाभ्यन्नामजागृवितस्मैत्वागृ
ण्हामि तस्मैतेसोमसोमायस्वाहा ३१ उशिक्त्वंदेव
सोमाग्नेः प्रियंपाथोपीहिवशीत्वंदेवसोमेंद्रस्यप्रि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं०
८६ यंपाथोपीहि अस्मात्सखात्वंदेवसोमविश्वेषांदेवानां १६१
प्रियंपाथोपीहि ३२ ७ इतियजुर्वेदसंहितायांअ
ष्टमोध्यायः ७ हरिःॐमू ७ प्राणायमेवर्चोदाव
र्चसेपवस्व व्यानायमेवर्चोदावर्चसेपवस्व उदा
नायमेवर्चोविर्चसेपवस्ववाचेमेवर्चोदावर्चसेपव
दा ८६

१६२
स्व १ क्रतूदक्षाभ्यांमेवर्चोदावर्चसेपवस्वश्रोत्राय
मेवर्चोदावर्चसेपवस्व चक्षुर्भ्यांमेवर्चोदसौवर्चसे
पवेथाम् २ आत्मनेमेवर्चोदावर्चसेपवस्वौजसे
मेवर्चोदावर्चसेपवस्वायुषेमेवर्चोदावर्चसेपव
स्व विश्वाभ्योमेप्रजाभ्योवर्चोदसौवर्चसेपवेथाम् ३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं०
८७

१०३

कोसि कतमोसि कस्यासि को नामासि ॥ यस्य ते नामाम
न्महि यं त्वा सोमे नातीतृपाम ॥ ४ ॥ भूर्भुवः स्वः सुप्रजाः
प्रजया भूयासम् ॥ सुवीरो वीरैः सुपोषः पोषैः ॥ ५ ॥ उ
दुत्यं जातवेदसं देवं वहंति केतवः ॥ दृशे विश्वाय सूर्यम्
॥ ६ ॥ चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुण

॥ ८७ ॥

१०४

स्याग्नेः ॥ आप्रा द्यावापृथिवी अंतरिक्षं सूर्य आत्मा ज
गतः स्तस्थुषश्च ॥ ७ ॥ अग्ने नय सुपथा राये अस्मान्
विश्वानि देव वयुनानि विद्वान् ॥ युयोध्यस्मज्जुहुराण
मेनो भूयिष्ठां ते नम उक्तिं विधेम ॥ ८ ॥ अयन्नो अग्नि
र्वरिवस्कृणोत्वयं मृधः पुर एतु प्रभिंदन् ॥ अयं वाजा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ज्जयतु वाजसातावयं॰ इमाऽऊर्ज्जयतु जहेषाण॰ स्वाहा ९
रूपेण वो रूपमभ्यागां तुथो वो विश्ववेदा विभजतु ॠत
स्य पथा प्रेत चंद्रदक्षिणा॰ १० विस्व॰ पश्यव्यंतरिक्षं य
तस्व सदस्यैः ब्राह्मणमद्य विदेयं पितृमंतं पैतृमत्यमृषि
मार्षेयं॰ सुधातुदक्षिणम् ११ अस्मद्राता देवत्रा गच्छ

प्रदातारमाविशत अग्नये त्वा मह्यं वरुणो ददातु सोऽमृत
त्वमश्यात् १२ आयुर्दात्र एधि मयो मह्यं प्रतिग्रहीत्रे
रुद्राय त्वा मह्यं वरुणो ददातु सोऽमृतत्वम[illegible]त् प्राणो दा
त्र एधि मयो मह्यं प्रतिग्रहीत्रे बृहस्पतये त्वा मह्यं वरुणो
ददातु सोऽमृतत्वमश्यात् त्वग्दात्र एधि मयो मह्यं प्रति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ स ॥
॥ ८९ ॥

रूपा

ग्रहीत्रे यमायत्वामश्चं वरुणो ददातु सोमृतत्वम शीय
वयो दात्र एधि मयो मह्यं प्रतिग्रहीत्रे १३ कोदात्कस्मा अ
दात्कामोदात्कामायादात् कामो दाता कामः प्रतिग्रही
ता कामैतत्ते नवं कामसूनता भुनजामहे १४ समिंद्रणो
मनसानेषि गोभिः सं सूरिभिर्मघवन्त्सं स्वस्त्या

॥ ८९ ॥

सं ब्रह्मणा देवकृतं यदस्ति सं देवानां सुमतौ यज्ञियाना
म् १५ सं वर्चसा पयसा सं तनूभिरगन्महि मनसा सं
शिवेन त्वष्टा सुदत्रो विदधातु रायोनुमार्ष्टु तन्वो यद्वि
लिष्टम् १६ धाता रातिः सवितेदं जुषंतां प्रजापतिर्नि
धिपा देवो अग्निः त्वष्टा विष्णुः प्रजया संरराणा यज

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं॰ ग
९०

माँनायद्रविणंदधातु १७ सुगावोदेवाः सदनाअ
कर्मँआजग्मेदꣳसवनंजुषाणाः भरमाणावहमा
नाहवीꣳष्यस्मेधत्तवसवोवसूनि १८ यांꣳआव
हउशतोदेवदेवाꣳस्तान्प्रेरयस्वेअग्नेसधस्थे ज
क्षिवाꣳसः पपिवाꣳसश्चविश्वेसुंघर्मꣳस्वराति ॥९०॥

ष्ठतानु १९ वयꣳहित्वाप्रयतियज्ञेअस्मिन्नग्नेहोतार
मवृणीमहीह ऋधगयाऋधगुताशमिष्ठाः प्रजानन्य
ज्ञमुपयाहिविद्वान् २० देवागातुविदोगातुंवित्वागा
तुमित मनसस्पतइमंदेवयज्ञꣳस्वाहावातेधाः २१
यज्ञयज्ञंगच्छयज्ञपतिंगच्छस्वांयोनिंगच्छस्वाहा एषते

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं.
९१

यज्ञोयज्ञपतेसहसूक्तवाकः सर्ववीरस्तंजुषस्वस्वाहा
माहिर्भूर्मापृदाकुः २२ उरुंहिराजावरुणश्चकारसू
र्यायपन्थामन्वेतवाउ अपदेपादाप्रतिधातवेकरुता
पवक्ताहृदयाविधश्चित् नमोवरुणायाभिष्ठितोव
रुणस्यपाशः २३ अग्नेरनीकमपआविवेशापान्न

९१

पात्प्रतिरक्षन्नसुर्यम् दमेदमेसमिधंयक्ष्यग्नेप्रति
तेजिव्हाघृतमुच्चरण्यत्स्वाहा २४ समुद्रेतेहृदय
मप्स्वंतःसंत्वाविशंत्वोषधीरुतापः यज्ञस्यत्वाय
ज्ञपतेसूक्तोक्तौनमोवाकेविधेमयत्स्वाहा २५ दे
वीरापएषवोगर्भस्तंसुप्रीतंसुभृतंबिभृत दे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं॰
९२

वसोमे पते ह्लानः परिश्चवसिन्नांचवसि अवभृथनि
चुंपुणनिचेरुरसिनिचुंपुण अवदेवैर्देवकृतमेनो
यासिषमवमर्त्यैमर्त्यकृतंपुरुराव्णोदेवरिषस्पाहि
देवानांसमिदसि २७ एजतुदशमास्योग
र्भोजरायुणासह यथायंवायुरेजतियथासमु ९२

द्रएजत्येवायंदशमास्योअस्रज्जरायुणासह २८
यस्यास्तेयज्ञियोगर्भोयस्यायोनिर्हिरण्ययी
अङ्गान्यहुतायस्यतंमात्रासमजीगमंस्वाहा
२९ पुरुदस्मोविषुरूपइंदुरंतर्महिमानमान
ञ्जधीरः एकपदींद्विपदींत्रिपदींचतुष्पदीमष्टा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

९३ यदीं भुवनानुप्रथंताः स्वाहा २९ मरुतोयस्यहिक्ष
येपाथादिवोविमहसः ससुगोपातमोजनः ३०
महीद्यौः पृथिवीचनइमंयज्ञंमिमिक्षतां पिपृतां
नोभरीमभिः ३१ आजिघ्रकलशंमह्यात्वाविशं
त्विंदवः पुनरूर्जानिवर्त्तस्वसानः सहस्रंधुक्ष्वो ९३
रु

रुधारापयस्वतीपुनर्मीविशताद्रयिः ॥३२॥ हव्येकाम्य
इळेरंतेचंद्रेज्योतेदितेसरस्वतिमहिविश्रुति ॥ए
तातेअघ्न्येनामानिदेवेषुमासुकृतंब्रूतात् ॥३३॥
इहरतिरिहरमध्वमिहधृतिरिहस्वधृतिस्वाहा ॥
उपसृजन्धरुणंमात्रेधरुणोमातरंधयन्रायस्पो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ सं० ॥
॥९४॥

षमस्मासुदीधरत्स्वाहा ॥३४॥ अगन्मज्योतिरमृ-
ताअभूमदिवंपृथिव्याअध्यारुहाम ॥ अविदाम
देवान्स्वर्ज्योतिः ॥ ३५ ॥ युवंतमिंद्रापर्वतापुरोयु
धायोनःपृतन्यादपतन्तमिद्धतंवज्रेणतन्तमिद्ध
तम् ॥ दूरेचत्तायछन्त्सद्गहनंयदिनक्षदस्माकं ॥९८॥

ंशत्रून्परिशूरविश्वतोदर्मादर्षीष्टविश्वतः ३६
भूर्भुवःस्वःसुप्रजाःप्रजाभिःस्याम सुवीरोवीरैः
सुपोषःपोषैः ॥ ३७ परमेष्ठ्यभिधीतःप्रजापतिर्वा
चिव्याहृतायामंधोअछेतःसवितासन्याम् विश्व
कर्मादीक्षायांपूषासोमक्रयण्याम् ३८ इंद्रश्चमरु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं०
९९

तश्च क्रयायोपोत्थितः असुरः पण्यमानो मित्रः क्री
तः ३९ विष्णुः शिपिविष्टऊरावासन्नो विष्णुर्नर
धिषः प्रोह्यमाणः सोम आगतो वरुण आसन्द्यामा
सन्नः ४० अग्निराग्नीध्र इंद्रो हविर्धाने अथर्वो
पावह्रियमाणो विश्वेदेवा अंशुषुन्युप्यमानेषु ४१

९९

विष्णुराप्रीतपा आप्याय्यमानो यमः सूयमानो विष्णुः
संभ्रियमाणः वायुः पूयमानः शुक्रः पूतः ४२ शुक्रः
क्षीरश्रीर्मंथी सक्तुश्रीः विश्वेदेवाश्चमसेषून्नीतोसु
र्होमायोद्यतः ४३ रुद्रो हूयमानो वातोभ्यावृत्तो नृ
चक्षाः प्रतिख्यातो भक्षः पीतः पितरो नाराशंसा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मं
६६

स्लाघमानः सिंधुरवभ्रथायोद्यतः समुद्रोभ्यवह्रियमा
णः सलिलःप्रप्लुतः ॥ ६४ ॥ ययोरोजसास्कभितारजा
ᳪसिवीर्येभिर्वीरतमाशविष्ठा यापत्येतेअप्रतीतासह
होभिर्विष्णूअगन्वरुणापूर्वहूतौ ॥ ६५ ॥ देवान्दिवमगन्य
ज्ञस्ततोमाद्रविणमष्टुमनुष्यानंतरिक्षमगन्यज्ञस्ततो
६६

माद्रविणमष्टु पितॄन्पृथिवीमगन्यज्ञस्ततोमाद्रवि
णमष्टुयंकंचलोकमगन्यज्ञस्ततोमेभद्रमभूत् ॥
६६ ॥ इतियजुर्वेदसंहितायांनवमोध्यायः ॥
हरिःॐ देवसवितःप्रसुवयज्ञंप्रसुवेमंभगाय
दिव्योगंधर्वःकेतपाःकेतन्नःपुनातुवाचस्पतिर्न्नो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

(२.७)

अघवाजं॑स्वदतु १ ध्रुवसदं त्वा नृषदं मनःसदम् उपया
मगृहीतोसीन्द्राय त्वा जुष्टं गृह्णाम्येष ते योनिरिन्द्राय त्वा जु
ष्टतमम् २ अप्सुषदं त्वा घृतसदं व्योमसदम् उपयामगृही०
जुष्टं गृह्णाम्येष ते० तमम् पृथिविसदं त्वांतरिक्षसदं दिवि
षदं देवसदं नाकसदम् उपयामगृहीतोसीन्द्राय त्वा जुष्टं० (२.८)

३ अपां रसमुद्वयसं सूर्ये सन्तं समाहितम् अपां रस
स्य यो रसस्तं वो गृह्णाम्युत्तमम् उपयामगृहीतोसीन्द्राय
त्वा जुष्टं गृ० ४ ग्रहा ऊर्जाहुतयो व्यन्तो विप्राय मतिं
तेषां विशिप्रियाणां वोहमिषमूर्जं समग्रभम् उपया
मगृहीतो० ५ सम्पृचस्थ सं मा भद्रेण पृङ्क्त विपृचस्थ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विमापापेन॰६३ ८ प्रथमोनुवाकः इंद्रस्यवज्रोसिवाज
सास्त्वयायंवाजंसेत् वाजस्यनुप्रसवेमातरंमहीमदि
तिंनामवचसाकरामहे यस्यामिदंविश्वंभुवनमाविवे
शतस्यान्नोदेवःसविताधर्मसाविषत् १ देवीरापोअ
पान्नपाद्योवऊर्मिःप्रतर्त्तिः ककुन्मान्वाजसास्तेना

यंवाजंसेत २ अप्स्वंतरमृतमप्सुभेषजमपामुतप्र
शस्तिभिः अश्वाभवतवाजिनः ३ वातोवावामनोवा
गंधर्वाःसप्तविंशतिः तेअग्रेश्वमयुंजंस्तेअस्मि
जवमादधुः ४ वातरंहाभववाजिन्युज्यमानइंद्र
स्येवदक्षिणःश्रियेधि युंजंतुत्वामरुतोविश्ववेदसआ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं॰
॥ ६६ ॥

१९७

तेत्वष्टापत्सुजवंदधातु ५ जवोयस्तेवाजिंनिहितोगुहा
यःश्येनेपरीत्तोअचरच्चवाते तेननोवाजिन्बलवान्
लेनवाजजिच्चभवसमनेचपारयिष्णुः ६ वाजिनोवा
जजितोवाजंसरिष्यंतः बृहस्पतेर्भागमवजिघ्र ७
द्वितीयोनुवाकः देवस्यवयंसवितुःसवेसत्यसवसः

१९८

बृहस्पतेरुत्तमंनाकंरुहेमेंद्रस्योत्तमंन्नाकंरुहेम दे
वस्यवयंसवितुःसवेसत्यसवसः बृहस्पतेरुत्तमन्ना
कमरुहामेंद्रस्योत्तमन्नाकमरुहाम १ बृहस्पतेवाजं
जयबृहस्पतयेवाचंवदत बृहस्पतिंवाजंजापयत
२ इंद्रवाजंजयेंद्रायवाचंवदत इंद्रंवाजंजापयत २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं.
१००

१९९

एषावस्सासत्यासंवागभूद्ययाबृहस्पतिंवाजमजी
जपत अजीजपतबृहस्पतिंवाजंवनस्पतयोविमुच्य
ध्वं ४ देवस्यवयं० बृहस्पतेर्वाजंजितोवाजंजेष्म
५ वाजिनोवाजंजयताध्वनस्कभ्नंतः योजनामि
मानाःकाष्ठांगच्छत ६ एषस्यवाजीक्षिपणिंतुर

१००

२००

एषतिग्रीवायांबद्धोअपिकक्षआसनि क्रतुंदधि
क्राअनुसंतवीत्वत्पथामंकांस्यन्वापनीफणत् ७
उततस्मास्यद्रवतस्तुरण्यतः पर्णन्नवेरनुवातिप्र
गर्द्धिनः श्येनस्येवध्रजतोअंकसंपरिदधिक्राव्णः
सहोर्ज्जातरित्रतः ८ शन्नोभवंतुवाजिनोहवेषु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२०१

देवतातमितद्रवः स्वर्काः जंभयंतोहिंवृकंरक्षांसि
सनेम्यस्मद्युयवन्नमीवाः ९ तेनोअर्वतोहवनश्रु
तोहवंविश्वेशृण्वंतुवाजिनोमितद्रवः सहस्रसामे
धसातासनिष्यवोमहोयेधनंसमिथेषुजभ्रिरे १०
वाजेवाजेवतवाजिनोनोधनेषुविप्राअमृताऋतज्ञाः ७

२०२

अस्यमध्वःपिबतमादयध्वंतृप्तायातपथिभिर्देवयानैः
११ आमा। वाजस्यप्रसवोजगम्यादेमेद्यावापृथि
वीविश्वरूपे आमागंतांपितरामातरायुवमामासोमो
अमृतत्वायगम्यात् १२ वाजिनोवाजजितोवाजं
ससृवांसः बृहस्पतेर्भागमवजिघ्रतनिमृजानाः

॥१३॥ तृतीयोऽनुवाकः ॥ आपयेस्वाहास्वापयेस्वाहा
पिज्जायस्वाहाऋतवेस्वा [illegible] हा वसवेस्वाहाऽहर्पतये
स्वाहा अन्हेमुग्धायस्वाहामुग्धायवैन१ँशिनाय
स्वाहाविन१ँशिनआंत्यायनायस्वाहांत्यायभौव
नायस्वाहाभुवनपतयेस्वाहाऽधिपतयेस्वाहा ॥१॥
स्य

आयुर्यज्ञेनकल्पतांप्राणोयज्ञेनकल्पतांचक्षुर्य
ज्ञेनकल्पतां१ँश्रोत्रंयज्ञेनकल्पताम् पृष्ठंयज्ञेनक
ल्पतांयज्ञोयज्ञेनकल्पतां ॥२॥ जायएहिसुवोरोहाव
प्रजापतेःप्रजाअभूमस्वर्देवाअगन्मामृताअभू
म ॥३॥ अस्मेवोअस्त्विंद्रियमस्मेनृम्णमुतक्रतुः ॥ अ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं॰ ३

१०५

स्मे वर्च्चोऽसि संतुव ॥ ४ ॥ नमोमात्रे पृथिव्याइयंते रा
ड्यंतासियमनः ॥ ध्रुवोऽसिधरुणः कृष्ये क्षेमायरय्येपो
षाय ॥ ५ ॥ चतुर्थोनुवाकः ॥ वाजस्येमंप्रसवः सुषुवेग्रे
सोमꣳराजानमोषधीष्वप्सु ॥ ताअस्मभ्यंमधुमतीर्भ
वंतुवयꣳराष्ट्रेजागृयापुरोहिताः ॥ १ ॥ वाजस्येदंप्रसव

५३

१०६

आबभूवेमाचविश्वाभुवनानिसर्वतः सनेमिराजापरि
यातिविद्वान्प्रजांपुष्टिंवर्द्धयमानोअस्मे ॥ २ ॥ वाजस्येमां
प्रसवः शिश्रियेदिवमिमाचविश्वाभुवनानिसम्राट् ॥ अ
दित्संतंदापयतिप्रजानन्सनोरयिꣳसर्ववीरंनियच्छतु ॥ ३ ॥
अग्नेअच्छावदेहनः प्रतिनः सुमनाभव ॥ प्रनोयच्छसहस्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं० ५

२०७

ज्जित्वंऽहिधनदा असि ४ सोमंऽराजानमवसेऽग्नि
मन्वारभामहे आदित्यं विष्णुंऽसूर्यं ब्रह्माणं च बृ
हस्पतिम् ५ प्रेनायछत्वर्यमा प्र पूषा प्र सरस्वती
प्र वाग्देवी ददातु नः ६ अर्यमणं बृहस्पतिमिंद्रं दा
नाय चोदय वाचं विष्णुंऽसरस्वतीऽसवितारं च ५

२०८

वाजिनम् देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां
पूष्णो हस्ताभ्यां ७ सरस्वत्यै वाचो यंतुर्यंत्रियें दधा
मि बृहस्पतेष्ट्वा साम्राज्येनाभिषिंचामींद्रस्य त्वा
साम्राज्येनाभिषिंचाग्मि ८ पंचमोऽनुवाकः अ
ग्निरेकाक्षरेण प्राणमुदजयत्तमुज्जेषमश्विनो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं० ५

घ्यक्षरेण द्विपदो मनुष्यानुदजयतांतानुज्जेषम् वि
ष्णुस्त्र्यक्षरेण त्रीन्निमांल्लोकानुदयत्तानुज्जेषं ३ सो
मश्चतुरक्षरेण चतुष्पदः पशूनुदजयत्तानुज्जेषं ४
पूषा पंचाक्षरेण। पंचऋतूनुदजयत्तानुज्जेष ५
सविता षडक्षरेण षडृतूनुदजयत्तानुज्जेषं मरु

॥५॥

तः सप्ताक्षरेण सप्तग्राम्यान्पशूनुदजयंस्तानुज्जे
षं बृहस्पतिरष्टाक्षरेण गायत्रीमुदजयत्तामुज्जे
षम् २ मित्रो नवाक्षरेण। त्रिवृतं स्तोममुदजयत्त
मुज्जेषं वरुणो दशाक्षरेण विराजमुदजयत्तामुज्जे
षम् इंद्र एकादशाक्षरेण त्रिष्टुभमुदजयत्तामुज्जे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥सं॥ ॥६॥

षंविश्वेदेवाद्वादशाक्षरेणजगतीमुदजयꣳस्तामुज्जे
षम्।३ वसवस्त्रयोदशाक्षरेण।त्रयोदशꣳस्तोममुद
जयꣳस्तमुज्जेष ꣳरुद्राश्चतुर्दशाक्षरेणचतुर्दशꣳस्तो
ममुदजयꣳस्तमुज्जेषम् आदित्याःपंचदशाक्षरेण
पंचदशꣳस्तोममुदजयꣳस्तमुज्जेषमदितिःषोड ॥६॥

॥सं०॥ ॥७॥

शाक्षरेणषोडशꣳस्तोममुदजयत्तमुज्जेषम् प्रजाप
तिःसप्तदशाक्षरेणसप्तदशꣳस्तोममुदजयत्तमुज्जे
षम्॥४॥७॥ इतिश्रीयजुर्वेदसंहितायांदशमोध्या
यः॥षष्ठमोनुवाकः॥कंडिकासंख्या॥४३॥७॥
॥७॥ ॥७॥ ॥७॥ ॥७॥ ॥७॥ श्रीराम ॥७॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ इतिप्रथमदशाङ्कसमाप्तः ॥ ७ ॥

॥ अथद्वितीयदशाङ्कप्रारंभः ॥ ७ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥सं०॥
॥१॥

तं

श्रीगणेशाय नमः हरिः ॐ म् एषतेनिर्ऋते भागस्तं
स्व जुषस्वाहाग्निनेत्रेभ्योदेवेभ्यः पुरःसद्भ्यस्स्वाहा यमने
त्रेभ्योदेवेभ्योदक्षिणसद्भ्यः स्वाहा विश्वदेवनेत्रेभ्यो
देवेभ्यः पश्चात्सद्भ्यः स्वाहा मित्रावरुणनेत्रेभ्योवाम
रुन्नेत्रेभ्योवादेवेभ्यउत्तरसद्भ्यः स्वाहा सोमनेत्रे ॥१॥

स

भ्योदेवेभ्यउपरिस द्भ्योदुवस्वद्भ्यः स्वाहा ॥ १ ॥ येदेवा
अग्निनेत्राः पुरःसदस्तेभ्यः स्वाहा येदेवायमनेत्रादृ
क्षिणसदस्तेभ्यः स्वाहा येदेवाविश्वदेवनेत्राः पश्चा
त्सदस्तेभ्यः स्वाहा येदेवामित्रावरुणनेत्रावामरुन्ने
त्रावोत्तरसदस्तेभ्यः स्वाहा येदेवाः सोमनेत्राउ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

से
२

स

परिषद्योहुत्वस्वं तेभ्यः स्वाहा ॥ २ ॥ अग्ने सहस्व पृत
ना अभिमातीरपास्य ॥ दुष्टरस्तरन्नरातीर्वर्च्चोधाय
ज्ञवाहसि ॥ देवस्यत्वा सवितुः प्रसवेश्विनोर्बाहुभ्यां पू
ष्णोहस्ताभ्याम ॥ ३ ॥ उपांशोर्वीर्य्येणजुहोमिहतं
रक्षः स्वाहा ॥ रक्षसांत्वावधाय वधिष्मरक्षोमुष्यत्वा ॥ २ ॥

२१५

२१६

वधायामुमवधिष्म ॥ जुषाणोप्तुराज्यस्यवेतुस्वाहा ॥ ४ ॥
प्रथमोनुवाकः ॥ अपोदेवामधुमतीरगृभ्णन्नूर्ज्ज
स्वतीराजस्वश्चितानाः ॥ याभिर्म्मित्रावरुणावभ्य
षिंचन्याभिरिंद्रमनयन्नत्यरातीः ॥ १ ॥ वृष्णऊर्मि
रसिराष्ट्रदाराष्ट्रम्मेदेहि स्वाहा वृष्णऊर्म्मिरसिराष्ट्र

॥सं०॥
॥३॥ ३१५

दाराष्ट्रममुष्मैदेहि वृषसेनोसिराष्ट्रदाराष्ट्रंमेदेहिस्वा
हावृषसेनोसिराष्ट्रदाराष्ट्रममुष्मैदेहि २ अर्थेतस्थ
राष्ट्रदाराष्ट्रंमेदत्तस्वाहार्थेतस्थराष्ट्रदाराष्ट्रममुष्मै
दत्त ओजस्वतीस्थराष्ट्रदाराष्ट्रंमेदत्तस्वाहौज
स्वतीस्थराष्ट्रदाराष्ट्रममुष्मैदत्त आपःपरिवाहिणी ॥३॥

३१६

स्थराष्ट्रदाराष्ट्रंमेदत्तस्वाहापःपरिवाहिणीस्थराष्ट्रदारा
ष्ट्रममुष्मैदत्त अपांपतिरसिराष्ट्रदाराष्ट्रंमेदेहिस्वाहा
पांपतिरसिराष्ट्रदाराष्ट्रममुष्मैदेहि अपांगर्भोसिरा
ष्ट्रदाराष्ट्रंमेदेहिस्वाहापांगर्भोसिराष्ट्रदाराष्ट्रममुष्मै
देहि सूर्य्यवर्च्चसस्थराष्ट्रदाराष्ट्रंमेदत्तस्वाहासूर्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ से० ॥
॥ ७ ॥

वर्च्चसस्थराष्ट्रदाराष्ट्रममुष्मैदत्त ॥ सूर्य्यत्वचसस्थराष्ट्रदा २१९
राष्ट्रंमेदत्तस्वाहासूर्यत्वचसस्थराष्ट्रदाराष्ट्रममुष्मैदत्त ॥
हा व्रजक्षितस्थराष्ट्र राष्ट्रमेदत्तस्वाहाव्रजक्षितस्थरा
ष्ट्रदाराष्ट्रममुष्मैदत्त ॥ वाशास्थराष्ट्रदाराष्ट्रंमेदत्तस्वा
हावाशास्थराष्ट्रदाराष्ट्रममुष्मैदत्त ॥ मान्दास्थराष्ट्र

हा
दाराष्ट्रंमेदत्तस्वामान्दास्थराष्ट्रदाराष्ट्रममुष्मैदत्त ॥ शक्वरी २२०
स्थराष्ट्रदाराष्ट्रंमेदत्तस्वाहाशक्वरीस्थराष्ट्रदाराष्ट्रममुष्मै
दत्त ॥ जनभृतस्थराष्ट्रदाराष्ट्रंमेदत्तस्वाहाजनभृतस्थरा
ष्ट्रदाराष्ट्रममुष्मैदत्त ॥ विश्वभृतस्थराष्ट्रदाराष्ट्रंमेदत्तस्वा
हाविश्वभृतस्थराष्ट्रदाराष्ट्रममुष्मैदत्त ॥ शविष्ठास्थराष्ट्रदा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं·
५

राष्ट्रंमेदत्तस्वाहौजस्वस्थराष्ट्रदाराष्ट्रममुष्मैदत्त आपः हीता
२२१
स्वराज्ञीस्थराष्ट्रदाराष्ट्रममुष्मैदत्त १ संमधुमतीर्मधु म
मतीभिःसृज्यंतांमहिक्षत्रंक्षत्रियायवन्वानाः अ
नाधृष्टाःसीदतसहौजसामहिक्षत्रंक्षत्रियायदधतीः ध
२ द्वितीयोनुवाकः सवितात्वाप्रसवानांसुवताम ५

२२२

ग्निर्गृहपतीनांसोमोवनस्पतीनाम् बृहस्पतिर्वाचइंद्रो
ज्यैष्ठ्यायरुद्रःपशुभ्योमित्रःसत्योवरुणोधर्मपतीनाम्
इमंदेवा असपत्नंसुवध्वंमहतेक्षत्रायमहतेज्यैष्ठ्याय
इममसुममुष्यपुत्रममुष्याःपुत्रमस्यैविशे २ एषवःकुर
वोराजैषवःपंचालाराजा सोमोस्माकंब्राह्मणानांरा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ सं. ॥
॥ ६ ॥

223

जा ॥ २ ॥ तृतीयोनुवाकः ॥ सोमस्य त्विषि ॥ रस्यग्नये स्वाहा सो
माय स्वाहा सवित्रे स्वाहा सरस्वत्यै स्वाहा ॥ पूष्णे स्वाहा बृहस्पत
ये स्वाहा ॥ १ ॥ इंद्राय स्वाहा ॥ घोषाय स्वाहा श्लोकाय स्वाहा अंशा
य स्वाहा भगाय स्वाहा अर्यम्णे स्वाहा ॥ सवितुर्वः प्रसव उत्पु
नाम्यच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः ॥ अनिभृष्टमसि

॥ ६ ॥

284

वाचो बंधुः स्तपोजाः सोमस्य दात्रमसि स्वाहा राजस्वः ॥ २ ॥
सधमादो द्युम्निनीराप एता अनाधृष्टा अपस्यो वसानाः
पस्त्यासु चक्रे वरुणः सधस्थमपां शिशुर्मातृतमास्वं
तः ॥ ३ ॥ क्षत्रस्योल्बमसि क्षत्रस्य जराय्वसि क्षत्रस्य नाभि
रसि क्षत्रस्य योनिरसि ॥ इंद्रस्य वार्त्रघ्नमसि त्वया यं वृत्रं वध्या

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मित्रस्यासिवरुणस्यासि ४ रुजासिध्रुवासिक्षुपासि पाते
नंप्राचंप्र[illegible]संचंपातेनंतिर्यंचंदिग्भ्यःपात ५ आविर्मर्या
आवित्तोअग्निर्गृहपतिराविंत्तइंद्रोवृद्धश्रवाआवित्तःपू
षाविश्ववेदाआवित्तोमित्रावरुणोधृतव्रतो आवित्तेद्या
वापृथिवीविश्वशंभूआवित्तादितिरुरुशर्मा ६ चतुर्थोनु०

अवेष्टादंदशूकाः प्राचीमारोहगायत्रीत्वावतु रथंतरं
सामत्रिवृत्स्तोमोवसंतऋतुर्ब्रह्मद्रविणम् १ दक्षिणामा
रोह त्रिष्टुप्त्वावतु बृहत्साम पंचदशस्तोमोग्रीष्मऋतुःक्ष
त्रंद्रविणम् २ प्रतीचीमारोह जगतीत्वावतु वैरूपं सा
मसप्तदशस्तोमोवर्षाऋतुर्विड्द्रविणम् ३ उदीचीमारोह

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नुष्टुप्त्वावतु वैराजꣳ सामैकविꣳशस्तोमः शरदृतुः फलं द्र
विणम् ६ ऊर्ध्वामारोह पङ्क्तिस्त्वावतु शाक्वररैवते सा
मनी त्रिणवत्रयस्त्रिꣳशौ स्तोमौ हेमन्तशिशिरावृतू व
र्चो द्रविणम् प्रत्यस्तं नमुचेः शिरः ५ सोमस्य त्विषि
रसि तवेव मे त्विषिर्भूयात् मृत्योः पाह्योजोसि सहोस्यमृ

तमसि ६ हिरण्यरूपा उषसो विरोक उभाविन्द्रा उदितः सू
र्यश्च आरोहतं वरुण मित्र गर्त्तं ततश्चक्षाथामदितिं दितिं
च मित्रोसि वरुणोसि ७ पञ्चमोनु· सोमस्य त्वा द्युम्नेना
भिषिञ्चाम्यग्नेर्भ्राजसा सूर्यस्य वर्चसा इन्द्रस्येन्द्रियेण
क्षत्राणां क्षत्रपतिरेध्यति दिद्यून्पाहि १ इमं दे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं०
१

या असपत्नं सुवध्वं महते क्षत्राय महते ज्यैष्ठ्याय महते जान
राज्याय इममनुमनुष्यपुत्रममुष्याः पुत्रमस्यैविश्रे २ एष
वःकुरवोराजैषवः पंचाला राजा सोमोस्माकं ब्राह्मणानां
राजा ३ प्रपर्वतस्य वृषभस्य पृष्ठान्नावश्चरंति स्वसिच इ
यानाः ता आववृत्रन्नधरागुदक्ता अहिंबुध्न्यमनुरीय

माणाः विष्णोर्विक्रमणमसि विष्णोर्विक्रांतमसि वि
ष्णोः क्रांतमसि ४ प्रजापते न त्वदेतान्यन्यो विश्वा
रूपाणि परि ता बभूव यत्कामास्ते जुहुमस्तन्नो अ
स्तु वयं स्याम पतयो रयीणाम् ५ रुद्र यत्ते क्रिवि प
रं नाम तस्मिन्हुतमस्यमेष्टमसि स्वाहा ६ षद्योतु॰

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

।।सं०।।
।।१०।।

इंद्रस्य वज्रोसि मित्रावरुणयोस्त्वा प्रशास्त्रोः प्रशिषा 231
त्रं युनग्मि अव्यथायै त्वा स्वधायै त्वारिष्टो अर्जुनः मरुतां
प्रसवेन जयापाम मनसा समिंद्रियेण मा त इंद्र ते व
यं तुराषाडयुक्तासो अब्रह्मता विदसाम तिष्ठा रथम
धि यं वज्रहस्ता रश्मीन्देव यमसे स्वश्वान् २ अग्नये
।।१०।।

गृहपतये स्वाहा सोमाय वनस्पतये स्वाहा इंद्रस्यौजि 232
ष्ठाय स्वाहा मरुतामोजसे स्वाहा पृथिवि मातर्मा मा हिं
सीर्मो अहं त्वाम् ३ हंसः शुचिषद्वसुरंतरिक्षसद्धो
ता वेदिषदतिथिर्दुरोणसत् नृषद्वरसदृतसद्व्योमस
दब्जा गोजा ऋतजा अद्रिजा ऋतं बृहत् ४ इयद

॥सं०॥
॥११॥

स्यायुरस्यायुर्म्मे देहि युङ्ङसि वर्च्चोसि वर्च्चो मे देहि। ऊर्ग्ग
स्यूर्ज्जं मयि धेहीन्द्रस्य वां बाहू वीर्यकृतो उपावहरामि
॥५॥ सप्तमोनु० स्योनासि। सुषदासि क्षत्रस्य योनिर
सि॥ स्योनामासीद सुषदामासीद क्षत्रस्य योनिमा
सीद॥१॥ निषसाद धृतव्रतो वरुणः पस्त्यास्वा॥ सा

॥११॥

म्राज्याय सुक्रतुः॥२॥ अभिभूरस्यया नामे तास्ते पञ्च दिशः क
ल्पंतां॥ ब्रह्मन्३ त्वं ब्रह्मासि॥३॥ सवितासि। सत्यप्रसवो वरुणो
सि सत्योजाः॥ इन्द्रोसि विशौजा रुद्रोसि सुशेवः॥४॥ प्रियंकर
श्रेयस्कर। भूयस्कर॥ इन्द्रस्य वज्रोसि तेन मे रध्य॥५॥ अग्निः
पृथुः। धर्मणस्पतिर्जुषाणो अग्निः पृथुर्धर्मणस्पतिः॥ अ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं॰
॥ १२ ॥

ज्येस्य हविषो वितु स्वाहा । स्वाहाकृताः सूर्यस्य रश्मिभिर्य 235
तध्वंस । जातानां मध्यमेष्ठ्याय ॥ ६ ॥ अष्टमो नु॰ सवित्रा प्र
सवित्रा । सरस्वत्या वाचा । त्वष्ट्रा रूपैः पूष्णा पशुभिरिंद्रे
णास्मे ॥ १ ॥ बृहस्पतिना ब्रह्मणा वरुणेनौजसाग्निना
तेजसा सोमेन राज्ञा । विष्णुना देवतया दद्राम्येमं यज्ञवि १२

236
ष्णुमन्नवानि ॥ २ ॥ नवमो नु॰ ॥ अश्विभ्यां पच्यस्व सरस्वत्यै
पच्यस्वेंद्राय सुत्राम्णे पच्यस्व । वायोः पूतः पवित्रेण प्र त्य
ङ्सोमो अतिस्रुतः । इंद्रस्य युज्यः सखा ॥ १ ॥ कुविदंग य
वमंतो यवं चिद्यथा दांत्यनुपूर्वं वियूय । इहेहैषां कृणुहि भो
जनानि ये बर्हिषो नमउक्तिं नजग्मुः ॥ उपयामगृहीतो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥स्वं०॥

॥१३॥ स्यश्विभ्यांत्वासरस्वत्यैत्वेन्द्रायत्वासुत्राम्णे २ युवंसुरा
ममश्विनानमुचाआसुरेसचा विपिपानाशुभस्पतीइं
द्रंकर्मस्वावतम् ३ पुत्रमिवपितराअश्विनोभेन्द्रावथुः
काव्यैर्दंसनाभिः यत्सुरामंव्यपिबःशचीभिःसरस्वती
त्वामघवन्नभिष्णक् ४ इतिश्रीयजुर्वेदसंहितायामे

॥१३॥

कादशोध्यायः॥ दशमोनुवाकः ७ कंडिकासंख्या ४८
७ ॐम् युंजानःप्रथमंमनस्तत्वायसविताधियः
अग्नेर्ज्योतिर्निचाय्यपृथिव्याअध्याभरत् १ युक्तेनमन
सावयंदेवस्यसवितुःसवे स्वर्ग्यायशक्त्या २ युक्त्वायस
वितादेवान्स्वर्यतोधियादिवम् बृहज्योतिःकरिष्यतःसवि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ सं० ॥
॥ १४ ॥

ताप्रसुवातितान॥३॥ युंजतेमनउतयुंजतेधियोविप्राविप्र
स्यबृहतोविपश्चितः॥ विहोत्रादधेवयुनाविदेकइन्मही
देवस्यसवितुःपरिष्टुतिः॥४॥ युजेवां॥ ब्रह्मपूर्व्यंनमोभिर्वि
श्लोकएतुपथ्येवसूरेः॥ शृण्वंतुविश्वेअमृतस्यपुत्राआ
येधामानिदिव्यानितस्थुः॥५॥ यस्यप्रयाणमन्वन्यइद्य ॥ १४ ॥

युर्देवादेवस्यमहिमानमोजसा॥ यःपार्थिवानिविममेस
एतशोरजांसिदेवःसवितामहित्वना॥६॥ देवसवितःप्र
सुवयज्ञंप्रसुवयज्ञपतिंभगाय॥ दिव्योगंधर्वःकेतपूःके
तंनःपुनातुवाचस्पतिर्वाचंनःस्वदतु॥७॥ इमंनोदेव
सवितर्यज्ञंप्रणयदेवाव्यंसखिविदंसत्राजितंधन

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं॰ १५

जितः स्वर्जितम् ऋचा स्तोमं समर्द्धय गायत्रेण रथंतरं
बृहद्गायत्रवर्त्तनि स्वाहा ॥ ८ ॥ देवस्य त्वा सवितुः आददे
य गायत्रेण छंदसांगिरस्वत् पृथिव्याः सधस्थादग्निं पुरी
ष्यमंगिरस्वदाभर त्रैष्टुभेन छंदसांगिरस्वत् ॥ ९ ॥ अ
भ्रिरसि नार्यसि त्वया वयमग्निं शकेम खनितुं सध वृय

१५

स्थ आ जागतेन छंदसांगिरस्वत् ॥ ११ ॥ हस्त आधाय सवि
ता बिभ्रदभ्रिं हिरण्ययीम् अग्नेर्ज्योतिर्निचाय्य पृथि
व्या अध्याभरदानुष्टुभेन छंदसांगिरस्वत् ॥ ११ ॥ प्रथमो
नु याकः भ्रतूर्त्तं वाजिन्नाद्रव वरिष्ठामनु संवतम् दिवि
ते जन्म परममंतरिक्षे तव नाभिः पृथिव्यामधि योनिरि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं० १६

त १२ युंजाथां रासभं युवमस्मिन्यामे वृषण्वसू अ
ग्निं भरंतमस्मयुं १३ योगेयोगे तवस्तरं वाजेवाजे हवा
महे सखाय इंद्रमूतये १४ प्रतूर्वन्नेह्यवक्रामन्नशस्ती
रुद्रस्य गाणपत्यं मयोभूरेहि उर्वंतरिक्षं वीहि स्वस्तिगव्यू
नि तिरभयानि कृण्वन्पूष्णा सयुजा सह १५ पृथिव्याः सधस्था

१६

दग्निं पुरीष्यमंगिरस्वदाभर अग्निं पुरीष्यमंगिरस्वदच्छे
मोग्निं पुरीष्यमंगिरस्वद्भरिष्यामः १६ अन्वग्निरुषसाम
ग्रमख्यदन्वहानि प्रथमो जातवेदाः अनु सूर्यस्य पुरुत्रा च
रश्मीननु द्यावापृथिवी आततंथ १७ आगत्य वाज्यध्वा
नं सर्वा मृधो विधूनुते अग्निं सधस्थे महति चक्षुषा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं॰
९८

निचिकीषते १८ आक्रम्य वाजिन् पृथिवीमग्निमिच्छ रुचा
त्वम् भूम्या वृत्वाय नो ब्रूहि यतः खनेम तं वयम् १९ द्यौस्ते
पृष्ठं पृथिवी सधस्थमात्मान्तरिक्षं समुद्रो योनिः विख्या
य चक्षुषा त्वमभितिष्ठ पृतन्यतः २० उत्क्राम महते सौभ
गायास्मादास्थानाद्द्रविणोदा वाजिन् वयं स्याम सुम

९८

तौ पृथिव्या अग्निं खनन्त उपस्थे अस्याः २१ उद
क्रमीद्द्रविणोदा वाज्यर्वाकः सुलोकं सुकृतं पृथिव्याम्
ततः खनेम सुप्रतीकमग्निं स्वो रुहाणा अधि नाकमु
त्तमम् २२ आ त्वा जिघर्मि मनसा घृतेन प्रतिक्षियन्तं भु
वनानि विश्वा पृथुं तिरश्चा वयसा बृहन्तं व्यचिष्ठमन्नै

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ सं० ॥
॥ १८ ॥

288

रमसंदृशं ॥२३॥ आविश्वतःप्रत्यञ्चंजिघर्म्यरक्षसामन
सातज्जुषेत मर्यश्रीस्पृहयद्वर्णो अग्निर्नाभिमृशेतन्वा
जर्भुराणः ॥२४॥ परिवाजपतिः कविरग्निर्हव्यान्यक्रमीत्
दधद्रत्नानिदाशुषे ॥२५॥ परित्वाग्नेपुरंवयंविप्रं सहस्य
धीमहि धृषद्वर्णंदिवेदिवे भेत्तारंभंगुरावताम् ॥२६॥ त्वम ॥१८॥

289

ग्नेद्युभिस्त्वमाशुशुक्षणिस्त्वमद्भ्यस्त्वमश्मनस्परि त्वंवने
भ्यस्त्वमोषधीभ्यस्त्वंनृणांनृपतेजायसेशुचिः ॥२७॥ द्विती
योनुवाकः ॥ देवस्यत्वासवितुःप्रसवेश्विनोर्बाहुभ्यांपूष्णो
हस्ताभ्याम् पृथिव्याःसधस्थादग्निंपुरीष्यमंगिरस्वत्खनामि
ज्योतिष्मंतंत्वाग्नेसुप्रतीकमजस्रेणभानुनादीद्यतम् शि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं॰
७९

२४०

वंभ्रजाभ्योहि ॐ संतंदृशिव्याः सधस्थादग्निंपुरीष्यमंगिर
स्वच्छेमः १ अपांपृष्ठमसियोनिरग्नेः समुद्रमभितः
पिन्वमानम् वर्द्धमानोमहांआचपुष्करेदिवोमात्रयाव
थ रिम्णाप्रथस्व २ शर्म्मचस्थोवर्म्मचस्थोच्छिद्रेबहुलेउभे व्य
चस्वतीसंवसाथांभृतमग्निंपुरीष्यम् ३ संवसाथां॰ ७९

२४१

स्वर्विदांसमीचीउरसात्मना अग्निमंतर्भरिष्यंतीज्योतिष्मं
तमजस्रमित् पुरीष्योसिविश्वभराअथर्वात्वाप्रथमो
निरमंथदग्ने ४ त्वामग्नेपुष्करादध्यथर्वानिरमंथत
मूर्ध्नोविश्वस्यवाघतः ५ तमुत्वादध्यंङृषिःपुत्रईधेअ
थर्वणः वृत्रहणंपुरंदरं ६ तमुत्वापाथ्योवृषासमीधे

दस्युहंतमम् धनंजयं रणेरणे ॥ ७ ॥ सीद होतस्वउलोके
चिकित्वान्सादयायज्ञं सुकृतस्ययोनौ ॥ देवावीर्देवान्हवि
षायजास्यग्नेबृहद्यजमानेवयोधाः ॥ १ ॥ निहोताहोतृ
षदनेविदानस्त्वेषोदीदिवां असदत्सुदक्षः ॥ अदब्धव्रत
प्रमतिर्वसिष्ठः सहस्रंभरः शुचिजिह्वोअग्निः ॥ २ ॥ संसी

दस्वमहां २ असिशोचस्वदेववीतमः ॥ विधूममग्नेअरुषंमि
येध्यसृजप्रशस्तदर्शतम् ॥ १० ॥ तृतीयोनुवाकः ॥ आपोदेवी
रुपसृजस्वमधुमतीरयक्ष्मायप्रजाभ्यः ॥ तासामास्थानादु
ज्जिहतामोषधयःसुपिप्पलाः ॥ १ ॥ सन्ते । वायुर्मातरिश्वादं
धातूत्तानायाहृदयंयद्विकस्तम् ॥ योदेवानांचरसिप्राणथे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ सं० ॥
॥ २१ ॥

नक्ष्मैदेववषट्कृतुभ्यम् ॥ २ सुजातोज्योतिषासहशर्म
मासद् वरूथ स्वः ॥ वासोअग्नेविश्वरूपंसंव्ययस्वविभावसो ॥ ३
उदुतिष्ठस्वध्वरावानोदेव्याधिया ॥ दृशेचभासाबृहतासुशु
क्वनिराग्नेयाहिसुशस्तिभिः ॥ ४ ऊर्ध्वऊषुणऊतयेतिष्ठा
देवोनसविता ॥ ऊर्ध्वोवाजस्यसनितायदंजिभिर्वाघद्भि

२१

र्विह्वयामहे ॥ ५ सजातोगर्भोअसिरोदस्योरग्नेचारुर्विभृत
ओषधीषु ॥ चित्रः शिशुः परितमांस्यक्तून्प्रमातृभ्योअधि
कनिक्रदद्गाः ॥ ६ स्थिरोभववीड्वंगआशुर्भववाज्यर्वन्
पृथुर्भवसुषदस्त्वमग्नेः पुरीषवाहणः ॥ ७ शिवोभवाप्र
जाभ्योमानुषीभ्यस्त्वमंगिरः ॥ माद्यावापृथिवीअभिशो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ स्वं ॥
॥ २२ ॥

वीर्मान्तरिक्षं मा वनस्पतीन् ॥ ८ ॥ प्रैतु वाजी कनिक्रदन्ना
नदद्रासभस्पत्वा ॥ भरन्नग्निं पुरीष्यं मा पाद्यायुषः पु
रा ॥ ९ ॥ वृषाग्निं वृषणं भरन्नपां गर्भं समुद्रियम् ॥ अ
ग्न आयाहि वीतये ॥ ऋतं सत्यमृतं सत्यमग्निं पुरी
ष्यमङ्गिरस्वद्भरामः ॥ १० ॥ ओषधयः प्रतिमोदध्वमग्नि

॥ २२ ॥

मेतं शिवमायन्तमभ्यत्र युष्माः ॥ व्यस्यन्विश्वा अनि
रा अमीवा निषीदन्नो अप दुर्मतिं जहि ॥ ११ ॥ ओषधयः
प्रतिगृभ्णीत पुष्पवतीः सुपिप्पलाः ॥ अयं वो गर्भ ऋत्वि
यः प्रत्नं सधस्थमासदत् ॥ १२ ॥ विपाजसा पृथुना शोशु
चानो बाधस्व द्विषो रक्षसो अमीवाः ॥ सुशर्माणं बृहतः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं०
२३

कर्म्मणिस्यामग्ने रुद्र ९ सुहवस्य प्रणीतौ १३ चतुर्थोनु०
आपोहिष्ठा मयोभुवस्तानऊर्जेदधातन महेरणायचक्ष
से १ योवःशिवतमोरसस्तस्यभाजयतेहनः उशती
रिवमातरः २ तस्माअरंगमाम वोयस्य क्षयायजिन्वथ
आपोजनयथाचनः ३ मित्रः सं१सृज्य पृथिवींभू
म

२३

मिंचज्योतिषासह सुजातंजातवेदसम यक्ष्मायत्वास
१सृजामिप्रजाभ्यः ४ रुद्राः सं१सृज्य पृथिवींबृहज्ज्यो
तिः समीधिरे तेषांभानुरजस्रइच्छुक्रोदेवेषुरोचते
५ सं१सृष्टांवसुभीरुद्रैर्धीरैः कर्मण्यांमृदम् हस्ता
भ्यांमृद्वींकृत्वासिनीवालीकृणोतुताम् ६ सिनीवाली

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ सं ॥
॥२६॥

सुकूपर्दासुंकुरी रास्त्वौपुष्टा ॥ सातुभ्यमदितेमह्योखांद
धात्रुहस्तयोः ॥ ७ ॥ उखांकृणोतुशक्त्याबाहुभ्यामदिति
र्धिया ॥ मातापुत्रंयथोपस्थेसाग्निंबिभर्त्तुगर्भआ ॥ ८ ॥
मखस्यशिरोसिवसवस्त्वाकृण्वंतुगायत्रेणछंदसांगि
रस्वद्ध्रुवासिपृथिव्यसि ॥ धारयामयिप्रजांरायस्पो

॥२६॥

२६०

षंगौपत्यंसुवीर्यंसजातान्यजमानाय ॥ रुद्रास्त्वाकृ
ण्वंतुत्रैष्टुभेनछंदसांगिरस्वद्ध्रुवास्यंतरिक्षमसि ॥ धा
रयामयिप्रजां० ॥ आदित्यास्त्वाकृण्वंतुजागतेनछंदसां
गिरस्वद्ध्रुवासिद्योरसि ॥ धारयामयिप्रजां० ॥ विश्वेत्वा
देवावैश्वानराः कृण्वंत्वानुष्टुभेनछंदसांगिरस्वद्ध्रुवा

२६१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सिद्धिरोखि धारयामयि प्रजा ० अदित्यै रास्नास्यदितिष्टे
बिलं गृभ्णातु ९ कृत्वाय सामहीमुखां मृन्मयीं योनिम
ग्नये पुत्रेभ्यः प्राय छददितिः श्रपयानिति १० वसव
स्त्वाधूपयन्तु गायत्रेण छंदसांगिरस्वद्रुद्रास्त्वाधूपयंतुत्रै
ष्टुभेन छंदसांगिरस्वत् आदित्यास्त्वाधूपयन्तु जागतेन

छंदसांगिरस्वद्विश्वेत्वादेवा वैश्वानराधूपयंत्वानुष्टुभेन छं
दसांगिरस्वत् इंद्रस्त्वाधूपयतु वरुणस्त्वाधूपयतु विष्णु
स्त्वाधूपयतु ११ अदितिष्ट्वा देवी विश्वदेव्यावती पृथिव्या
स्सधस्थे आंगिरस्वत्खनत्ववट १२ देवानां त्वा पत्नीर्देवीर्वि
श्वदेव्यावतीः पृथिव्याः सधस्थे आंगिरस्वद्दधातूखे
पृथिव्याः सधस्थे अङ्गिरस्वद्दधतूखे ॥ धिषणा

श्रीकृष्णार्पणमस्तु

वरूत्रीष्ट्वा देवीर्विश्वदेव्यावतीः पृथिव्याः छ्रपयंतूखे ग्ना २६४
स्त्वा देवीर्विश्वदेव्यावतीः पृथिव्याः सधस्थे अंगिरस्वत्प
चंतूखे जनयस्त्वाछिन्नपत्रा देवीर्विश्वदेव्यावतीः पृथि
व्याः सधस्थे अंगिरस्वत्पचंतूखे १३ मित्रस्य चर्षणीधृ
तोवो देवस्य सानसि द्युम्नं चित्रश्रवस्तमं १४ देवस्त्वा
सवितोद्वपतु सुपाणिः स्वंगुरिः सुबाहुरुत शक्त्या अव्य

थमाना पृथिव्यामाशा दिश आपृण १५ उत्थाय बृहती भ २६५
उ वोत्तिष्ठ ध्रुवा त्वं मित्रैतां त उखां परिददाम्यभित्त्या एषा मा
भेदि वसवस्त्वाछृंदंतु गायत्रेण छंदसांगिरस्वद्रुद्रास्त्वाछृं
दंतु त्रैष्टुभेन छंदसांगिरस्वत् आदित्यास्त्वाछृंदंतु जा
गतेन छंदसांगिरस्वद्विश्वे त्वा देवा वैश्वानरा आछृंदंत्वानु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं॰
२८ ॥ ९ स्वाहाभ्यै

छुनेन छंदसांगिरस्वत् ॥ १६ ॥ प्रथानुवाकः ॥ आकूतिमग्निं प्रयुज ५
स्वाहा मनो मेधामग्निं प्रयुज ६ स्वाहा ॥ चित्तं विज्ञातमग्निं प्रयु
ज ७ स्वाहा वाचो विधृतिमग्निं प्रयुज ८ स्वाहा ॥ प्रजापतये मन
वे स्वाहाग्नये वैश्वानराय स्वाहा ॥ १ ॥ विश्वो देवस्य नेतुर्मर्तो वुरी स्व
त सख्यम् ॥ विश्वो राय इषुध्यति द्युम्नं वृणीत पुष्यसे स्वाहा ॥ २ ॥
॥ २८ ॥

मा सु भित्था मा सु रिषोम्ब धृष्णु वीरयस्व सु ॥ अग्निश्चेदं करिष्य
थः ॥ ३ ॥ दृꣳहस्व देवि पृथिवि स्वस्तय आसुरी माया स्वधया कृ
तासि ॥ जुष्टं देवेभ्य इदमस्तु हव्यमरिष्टा त्वमुदिहि यज्ञे अस्मि
न् ॥ ४ ॥ द्रुवन्नः सर्पिरासुतिः प्रत्नो होता वरेण्यः ॥ सहसस्पुत्रो
अद्भुतः ॥ ५ ॥ परस्या अधि संवतोऽवराꣳ अभ्यातर ॥ यत्राहम

सं.
२८

२६५

स्मितांअव ६ परमस्याः परावतोरोहिदश्वइहागहि पुरीष्यः
पुरुप्रियोग्नेत्वंतरामृधः ७ यदग्नेकानिकानिचिदातेदारूणि
दध्मसि सर्वंतदस्तुतेघृतंतज्जुषस्वयविष्ठ्य ८ यदत्त्युपजि
ह्विकायद्वम्रोअतिसर्प्पति सर्वंतदस्तुतेघृतंतज्जुषस्वयवि
ष्ठ्य ९ अहरहरप्रयावंभरंतोश्वायेवतिष्ठतेघासमस्मै रा

२८

२६६

यस्पोषेणसमिषामदंतोग्नेमातेप्रतिवेशारिषाम १० नाभा
पृथिव्याःसमिधानेअग्नौरायस्पोषायबृहतेहवामहे इरमदं
बृहदुक्थंयजत्रंजेतारमग्निंपृतनासुसासहिं ११ याःसेना
अभीत्वरीराव्याधिनीरुगणाउत येस्तेनायेचतस्करास्तांस्ते
अग्नेपिदधाम्यास्ये १२ दंष्ट्राभ्याममलिम्लूञ्जम्भ्यैस्तस्क

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं.
२९

रा ३ उत हनुभ्यां स्तेनान्भगवस्तां ३ स्त्वं खादुखुरवादितान् १३
ये जनेषु मलिम्लव स्तेनास्तस्करा वने ये कक्षेष्वघायवस्तां
स्ते दधामि जंभयोः १४ यो अस्मभ्य मरातीयाद्यश्च नो द्वेषते जनः निं घश्चने
द्यो अस्मां धिप्साच्च सर्वं तं मस्मसा कुरु १५ सं ३ शितं मे ब्र
ह्म सं ३ शितं वीर्यं बलम् सं ३ शितं क्षत्रं जिष्णु यस्याहमस्मि पु
२९

रोहितः १६ उदेषां बाहू अतिरमुद्वर्चो अथो बलम् क्षिणोमि ब्रह्म
णामित्रानुन्नयामि स्वां ३ अहम् १७ अन्नपतेन्नस्य नो देह्यन
मीवस्य शुष्मिणः प्रप्रदातारं तारिष ऊर्जं नो धेहि द्विपदे चतुष्प
दे विश्वकर्मणे स्वाहा १८ पुनस्त्वादित्या रुद्रा वसवः समिंधतां
पुनर्ब्रह्माणो वसुनीथ यज्ञैः घृतेन त्वं तन्वं वर्द्धयस्व सत्याः संतु
प

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शु॰
२

यजमानस्यकामास्वाहा ॥१०॥ षष्ठमोनुवाकः ॥६॥ इतियजुर्वेदसं
हितायांद्वादशोध्यायः ॥ कंडिकासंख्या ॥८५॥ ६ ॥ ६ ॥ ॐम्
दृशानोरुक्मउर्व्याव्यद्यौदुर्मर्षमायुःश्रियेरुचानः अग्निर
मृतोअभवद्वयोभिर्यदेनंद्यौरजनयत्सुरेताः ॥१॥ नक्तोषासा
समनसाविरूपेधापयेतेशिशुमेकꣳसमीची द्यावाक्षामारु

२

क्मोअंतर्विभातिदेवाअग्निंधारयंद्रविणोदाः ॥२॥ विश्वारूपाणि
प्रतिमुंचतेकविः प्रासावीद्भद्रंद्विपदेचतुष्पदे विनाकमख्यत्स
वितावरेण्योनुप्रयाणमुषसोविराजति ॥३॥ सुपर्णोसिगरु
त्माꣳस्त्रिवृत्तेशिरः गायत्रंचक्षुर्बृहद्रथंतरेपक्षौ ॥ स्तो
स्तोमआत्माछंदाꣳस्यंगानियजूꣳषिनाम सामतेतनूर्वाम

॥से॰॥

॥२१॥ देव्यं यज्ञाय द्विषं पुष्छधिध्या: शफा: ॥ ५ ॥ सुपर्णोसि गरुत्मां
दिवं गच्छ स्व: पत ॥ विष्णो: क्रमोसि सपत्नहा गायत्रं छंद आ
रोह ॥ पृथिवीमनु विक्रमस्व ॥ विष्णो: क्रमोस्यभिमातिहा त्रैष्टु
भं छंद आरोह ॥ अंतरिक्षमनु विक्रमस्व ॥ विष्णो: क्रमोस्यरा
तीयतो हंता जागतं छंद आरोह ॥ दिवमनु वि॰ ॥ विष्णो: क्रमो ॥२१॥

सि शत्रूयतो हंतानुष्टुभं छंद आरोह ॥ दिशोनु वि॰ ॥ ६ ॥ अक्रं
दद्गि: स्तनयन्निव द्यौ: क्षामा रेरिहद्वीरुध: समंजन्
सद्यो जज्ञानो वि हीमिद्धो अख्यदा रोदसी भानुना भात्यंत:
॥ ७ ॥ अग्नेभ्यावर्तिन्नभि मा नि वर्त्तस्वायुषा वर्च्चसा प्रजया
धनेन ॥ सन्या मेधया रय्या पोषेण ॥ ८ ॥ अग्ने अंगिर: शतं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं० ३२

तेसंखावृतः सहस्रंतउपावृतः अधापोषस्यपोषेणपुनर्न्नो
नष्टमाकृधिपुनर्न्नोरयिमाकृधि ९ पुनरूर्ज्जानिवर्त्तस्व रू
पुनरग्नइषायुषा पुनर्न्नःपाह्यंहसः १० सहरय्यानि
वर्त्तस्वाग्नेपिन्वस्वधारया विश्वप्स्न्याविश्वतःस्परि ११
आत्वाहार्षमंतरभूर्ध्रुवस्तिष्ठाविचाचलिः विशस्त्वास

३२

र्वावांछंतुमात्वद्राष्ट्रमधिभ्रशत् १२ उदुत्तमंवरुणपाश
मस्मदवाधमंविमध्यमंश्रथाय अथावयमादित्यव्रते
तवानागसोअदितयेस्याम १३ अग्नेबृहन्नुषसामूर्ध्वो
अस्थान्निर्ज्जगन्वांतमसोज्योतिषागात् अग्निर्भानुनारु
शतास्वंगआजातोविश्वासद्मान्यप्राः १४ हंसःशु
चिषद्वसुरंतरिक्षसद्धोतावेदिषदतिथिर्दुरोणसत् न्द

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं०
२२२

षद्वरसदृतसद्योमसदब्जागोजाऋतजाअद्रिजाःऋतंबृ
हत् १४ सीदत्वंमातुरस्याउपस्थेविश्वान्यग्नेवयुनानिवि
द्वान् मैनंतपसामार्च्चिषाभिशोचीरंतरस्यांशुक्रज्यो
तिर्विभाहि १५ अंतरग्नेरुचात्वमुखायाःसदनेस्वे त
स्यास्त्वंहरसातपंजातवेदःशिवोभव १६ शिवोभूत्वा
२२२

मह्यमग्नेअथोसीदशिवःस्त्वम् शिवाःकृत्वादिशःसर्वाः
स्वंयोनिमिहासदः १७ प्रथमोनुवाकः दिवस्परिप्रथ
मंजज्ञेअग्निरस्मद्द्वितीयंपरिजातवेदाः तृतीयमप्सु
नृमणाअजस्रमिंधानएनंजरतेस्वाधीः १ विद्माते
अग्नेत्रेधात्रयाणि विद्मातेधामविभृतापुरुत्रा विद्मा

सं०॥
॥१३६५॥

ते नाम परमं गुहा यद्विद्मा तमुत्सं यत आजगंथ २ समुद्रे त्वा
नृमणा अप्स्वंतर्नृचक्षा ईधे दिवो अग्न ऊधन् तृतीये त्वा
रजसि तस्थिवांसमपामुपस्थे महिषा अवर्द्धन् ३ अ
क्रंददग्निः स्तनयन्निव द्यौः क्षामारेरिहद्वीरुधः समंज
न् सद्यो जज्ञानो वि हीमिद्धो अख्यदा रोदसी भानुना भात्यं

२६५

त: ४ श्रीणामुदारो धरुणो रयीणां मनीषाणां प्रार्पणः
सोमगोपाः वसुः सूनुः सहसो अप्सु राजा वि भात्यग्र उषसा
मिधानः ५ विश्वस्य केतुर्भुवनस्य गर्भ आ रोदसी अपृणा
ज्जायमानः वीळुं चिदद्रिमभिनत्परायंजना यदग्निमय
जंत पंच ६ उशिक्पावको अरतिः सुमेधा मर्त्तेष्वग्निरमृ

॥सं.॥
॥२५॥

तोनिधायि इयर्त्तिधूममरुषंभरिभ्रदुच्छुक्रेणशोचिषाद्यामि
नक्षन् ७ दृशानोरुक्म। सुरेताः ८ यस्तेअद्यकृणवद्भ
द्रशोचेऽपूपंदेवघृतवन्तमग्ने प्रतंनयप्रतरंवस्योअच्छा
भिसुम्नंदेवभक्तंयविष्ठ ९ आतं। भजसौश्रवसेष्वग्नउ
क्थउक्थआभजशस्यमाने प्रियःसूर्येप्रियोअग्नाभवात्यु ॥२५॥

ज्जातेनभिनदुदुज्जनित्वैः १० त्वामग्नेयजमानाअनुद्यू
न्विश्वावसुदधिरेवार्याणि त्वयासहद्रविणमिच्छमानाव्रजं
गोमंतमुशिजोविवव्रुः ११ अस्ताव्यग्निर्नरांसुशेवोवै
श्वानरऋषिभिःसोमगोपाः अद्वेषेद्यावापृथिवीहुवेमदे
वाधत्तरयिमस्मेसुवीरं १२ द्वितीयोनुवाकः समिधाग्निं।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं०
२९

दुवस्यत तच्चेतेर्बोधयतातिथिम् । आस्मिन्हव्याजुहोत
न ॥ १ ॥ उदुता विश्वेदेवा अग्ने भरंतु चित्तिभिः सनोभ
वशिवस्त्वं सुप्रतीको विभावसुः ॥ २ ॥ प्रेदग्ने ज्योतिष्मा
न्याहि शिवेभिरर्चिभिष्ट्वम् बृहद्भिर्भानुभिर्भासन्मा
हिंसीस्तन्वा प्रजाः ॥ ३ ॥ अक्रंददग्नि० भास्वंतः ॥ ४ ॥ प्रप्रा
यंसी

२९

यमग्निर्भरतस्यशृण्वे वियत्सूर्यो न रोचते बृहद्भाः । अ
भियः पूरुं पृतनासु तस्थौ दीदाय दैव्यो अतिथिः शिवो नः
॥ ५ ॥ आपो देवीः प्रतिगृभ्णीत भस्मैतत्स्योने कृणुध्वं
सुरभाउलोके तस्मै नमंतां जनयः सुपत्नीर्मातेव पुत्रं
बिभृताप्स्वेनत् ॥ ६ ॥ अप्स्वग्ने सधिष्टव सौषधीरनु रु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं
२७

ध्यसे गर्भे संजायसेउ नः ७ गर्भो अस्योषधीनां गर्भो वन
स्पतीनाम् गर्भो विश्वस्य भूतस्याग्ने गर्भो अपामसि
प्रसद्य भस्मना योनिमपश्च पृथिवीमग्ने सꣳसृज्य मा
तृभिष्ट्वं ज्योतिष्मान्पुनरासदः ९ पुनरासद्य सदनमप
श्च पृथिवीमग्ने शेषे मातुर्यथोपस्थेन्तरस्याꣳशिवत
२८

म: १० पुनरूर्जा• हस: ११ सह रय्या निवर्त्तस्व: १२
बोधा मे अस्य वचसो यविष्ठ मꣳहिष्ठस्य प्रभृतस्य स्व
धाव: पीयति त्वो अनु त्वो गृणाति वंदारुष्टे तन्वं वं
दे अग्ने १३ स बोधि सूरिर्म्मघवा वसुपते वसुदावन्
युयोध्यस्मद्द्वेषाꣳसि विश्वकर्म्मणे स्वाहा १४ पुन

सं० २८

स्वादि स्वादुर्द्रावसवः समिंधनां पुनर्ब्रह्माणेन सुनीथय
ज्ञेः ॥ घृतेन त्वं तन्वं वर्द्धयस्व सत्याः संतु यजमानस्य कामाः
स्वाहा ॥ १५ ॥ तृतीयोनुवाकः ॥ अपेत वीत वि च सर्पतातो
ये त्र स्थ पुराणा ये च नूतनाः ॥ अदाद्यमोवसानं पृथि
व्या अक्रन्निमं पितरो लोकमस्मै ॥ १ ॥ संज्ञानमसि कामं

२८

धरणं मयि ते कामधरणं भूयात् ॥ अग्नेर्भस्मास्यग्नेः पुरी
षमसि ॥ चितस्थ परिचितऊर्ध्वचितः श्रयध्वम् ॥ २ ॥ अय
ꣳ सो अग्निर्यस्मिन्त्सोममिंद्रः सुतं दधे जठरे वावशानः ॥
सहस्रियं वाजमत्यं न सप्तिꣳ ससवान्त्सन्त्स्तूयसे जातवे
दः ॥ ३ ॥ अग्ने यत्ते दिवि वर्चः पृथिव्यां यदोषधीष्वप्स्वा य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥सं.॥
॥३९॥

२००

जत्र ॥ येनांतरिक्षमुर्वाततंथत्वेषः सभानुरर्णवोन्नृचक्षाः
॥ ४ ॥ अग्नेर्दिवोअर्णमच्छाजिगास्यच्छादेवां ऊचिषेधि
ष्ण्याये ॥ यारोचनेपरस्तात्सूर्यस्ययाश्चावस्तादुपति श्या
ष्ठंतआपः ॥ ५ पुरीष्यासोअग्नयःप्रावणेभिःसजो ग्न
षसः ॥ जुषंतांयज्ञमद्रुहोनमीवाइषोमहीः ॥ ६ इडाम ॥३९॥

२०१

ग्नेपुरुदंससंसनिंगोःशश्वत्तमंहवमानायसाध स्या
न्नःसूनुःस्तनयोविजावाग्नेसातेसुमतिर्भूत्वस्मे ७
अयंतेयोनिर्ऋत्वियोयतोजातोअरोचथाः तंजानंनग्नआ जातो
रोहाथानोवर्द्धयारयिम् ८ चिदसितयादेवतयांगि
रस्वद्ध्रुवासीद परिचिदसितयादेवतयांगिरस्वद्ध्रु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ सं० ॥
॥ ८० ॥

वासीद ॥ ९ ॥ लोकंपृणाछिद्रंपृणाथोसीदध्रुवात्वम् ॥
इंद्राग्नीत्वाबृहस्पतिरस्मिन्योनावसीषदन् ॥ १० ॥ ता
अस्यसूददोहसः सोमंश्रीणंतिपृश्नयः ॥ जन्मन्देवा
नांविशस्त्रिष्वारोचनेदिवः ॥ ११ ॥ इंद्रंविश्वाअवीवृ
धन्त्समुद्रव्यचसंगिरः ॥ रथीतमंरथीनांवाजानां

॥ ८० ॥

सत्पतिंपतिम् ॥ १२ ॥ समितंसंकल्पेथांसंप्रियौरोचि
ष्णूसुमनस्यमानौ ॥ इषमूर्जमभिसंवसानौ ॥ १३ ॥ संवां
मनांसिसंव्रतासमुचित्तान्याकरम् ॥ अग्नेपुरीष्या
धिपाभवत्वंनइषमूर्जंयजमानायधेहि ॥ १४ ॥ अग्ने
त्वंपुरीष्योरयिमान्पुष्टिमाँअसि ॥ शिवाः कृत्वादिशः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥सं०॥
॥६१॥

सर्वाः स्वंयोनिमिहासदः ॥ १५ भवतन्नः समनसौसचे
तसाअरेपसौ ॥ मायज्ञꣳहिꣳसिष्टंमायज्ञपतिंजातवे
दसौशिवौभवतमद्यनः ॥ १६ मातेवपुत्रंपृथिवीपुरी
ष्यमग्निꣳस्वेयोनावभारुखा ॥ तांविश्वैर्देवैर्ऋतुभिः
संविदानः प्रजापतिर्विश्वकर्माविमुंचतु ॥ १७ ॥ चतु

॥६१॥

सु

र्थोनु० ॥ असुन्वंतमयजमानमिच्छस्तेनस्येत्यामन्विहि त
स्करस्य ॥ अन्यमस्मदिच्छसातइत्यानमोदेविनिर्ऋतेतुभ्य
मस्तु ॥ १ ॥ नमःसुतेनिर्ऋतेतिग्मतेजोयस्मयंविचृताबं
धमेतम् ॥ यमेनत्वंयम्यासंविदानोत्तमेनाकेअधिरोहये
नम् ॥ २ ॥ यस्यास्तेघोरआसंजुहोम्येषांबंधानामवसर्जे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं.
६२

४०७

नाय ॥ यांत्वाजनोभूमिरितिप्रमंदते निर्ऋतिंत्वाहंपरिवेदवि
श्वतः ॥ २ ॥ यंतेदेवीनिर्ऋतिराबबंधपाशंग्रीवास्वविचृ
त्यम् ॥ तंतेविष्याम्यायुषोनमध्यादथैतंपितुमद्धिप्रसूतः ॥
नमोभूत्यैयेदंचकार ॥ ४ ॥ निवेशनःसंगमनोवसूनांवि
श्वारूपाभिचष्टेशचीभिः ॥ देवइवसवितासत्यधर्मेंद्रो

६२

४०८

नतस्थौसमरेपथीनाम् ॥ ५ ॥ सीरायुंजंतिकवयोयुगावित
न्वतेपृथक् ॥ धीरादेवेषुसुम्नया ॥ ६ ॥ युनक्तसीराबियुगा
तनुध्वंकृतेयोनौवपतेहबीजं ॥ गिराचश्रुष्टिःसभराअस स्
न्नोनेदीयइत्सृण्यःपक्वमेयात् ॥ ७ ॥ शुनंसुफालाविकृ
षंतुभूमिं ॥ शुनंकीनाशाअभियंतुवाहैः ॥ शुनासीराहवि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं० ५३

षा तोशमानाखुपिप्यलाऊषधीः कृत्तमसमे ८ घृतेनसी
तामधुनासमज्यतां विश्वैर्देवैरनुमतामरुद्भिः ऊर्ज्जस्वती
पयसापिन्वमाना स्मान्त्सीते पयसाभ्याववृत्स्व ९ लांग
लं पवीरवत्सुशेवं सोमपित्सरु तदुद्वपति गामविं प्रफर्व्य
चपीवरीं प्रस्थावद्रथवाहणम् १० कामंकामदुघे धुक्ष्व

५३

मित्राय वरुणाय च इंद्रायाश्विभ्यां पूष्णे प्रजाभ्य ओषधीभ्यः ११
विमुच्यध्वमघ्न्या देवयाना अगन्म तमसस्पारमस्य ज्योतिरापा
म १२ सजूरब्दो अयवोभिः सजूरुषा अरुणीभिः सजो
षसा अश्विना दंसोभिः सजूः सूर एतशेन सजूर्वैश्वा
नर इडया घृतेन स्वाहा १३ याओषधीः पूर्वाजाता देवेभ्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं. ५५

300

स्त्रियुगंपुरा मनैनुबभ्रूणामहं शतंधामानिसप्तच ॥ ॐ ॥
शतंवो अंबधामानिसहस्रमुतवोरुहः अधाशतक्र
त्वोयूयमिमंमेअगदंकृत १५ ओषधीःप्रतिमोदध्वं
पुष्पवतीःप्रसूवरीः अश्वाइवसजित्वरीर्वीरुधः
पारयिष्णवः १६ ओषधीरितिमातरस्तद्वोदेवीरुप

५५

301

ब्रुवे सनेयमश्वंगांवासआत्मानंतवपूरुष १७ अश्व
त्थेवोनिषदनंपर्णेवोवसतिष्कृता गोभाजइत्किलासथ
यत्सनवथपूरुषम् १८ यत्रौषधीःसमग्मतराजानः
समिताविव विप्रःसउच्यतेभिषग्रक्षोहामीवचातनः
१९ अश्वावतींसोमावतीमूर्जयंतीमुदोजसम्

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ खं. ॥
॥ ८५ ॥

आविवित्सि सर्वा ओषधीरस्मा अरिष्टतातये ॥ २७ ॥ उच्छुष्मा ।
ओषधीनां गावो गोष्ठादिवेरते ॥ धनं सनिष्यंतीनामात्मा
नं तव पूरुष ॥ २८ ॥ इष्कृतिर्नाम वो माता थो यूयं स्थ निष्कृ
तीः ॥ सीराः पतत्रिणीस्थन यदामयति निष्कृथ ॥ ९ ॥ अति
विश्वाः परिष्ठास्तेन इव व्रजमक्रमुः ॥ ओषधीः प्राचुच्यवु

॥ ८५ ॥

र्यत्किंच तन्वो रपः ॥ १० ॥ यदिमा वाजयन्नहमोषधीर्हस्त आ
दधे ॥ आत्मा यक्ष्मस्य नश्यति पुरा जीवगृभो यथा ॥ ११ ॥
यस्यौषधीः प्रसर्पथांगमंगं परुष्परुः ॥ ततो यक्ष्मं विबा
धध्व उग्रो मध्यमशीरिव ॥ १२ ॥ साकं यक्ष्म प्रपत चाषेण कि
किदीविना ॥ साकं वातस्य ध्राज्या साकं नश्य निहाकया

303

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं॰ ॥
५६ ॥

॥ १३ अन्यावोअन्यामवत्वन्यान्यस्याउपावत तास्सर्वाःसं
विदानाइदंमेप्रावतावचः १४ याःफलिनीर्याअफलाअ
पुष्पायाश्चपुष्पिणीः बृहस्पतिप्रसूतास्तानोमुंचंत्वंहसः
॥ १५ मुंचंतुमाशपथ्यादथोवरुण्यादुत अथोयमस्यपड्वी
शात्सर्वस्माद्देवकिल्बिषात् १६ अवयतीःसमवदंतदिव

॥ ५६

रं॰

ओषधयस्परि ॥ यंजीवमश्नवामहैनसरिष्यातिपूरुषः ॥ १७
याओषधीःसोमराज्ञीर्बह्वीःशतविचक्षणाः ॥ तासामसि
त्वमुत्तमारंकामायशंहृदे ॥ १८ ॥ याओषधीःसोमराज्ञी
र्विष्ठिताःपृथिवीमनु ॥ बृहस्पतिप्रसूताअस्यैसंदत्तवी
र्यम ॥ १९ ॥ याश्चेदमुपशृण्वंतियाश्चदूरंपरागताः ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं०
५८

सर्वाः संगत्यवीरुधोऽस्यैसंदत्तवीर्यम् २० नाशयित्रीबला
सस्यार्शसउपचितामसि अथोशतस्ययक्ष्माणांपाका
रोरसिनाशनी २१ मावोरिषत्खनितायस्मैचाहंखनामि
वः द्विपच्चतुष्पदस्माकं सर्वमस्त्वनातुरम् २२ ओष
धयः संवदंतेसोमेनसहराज्ञा यस्मैकृणोतिब्राह्मण ५८

३०८
स्तं राजन्पारयामसि २३ त्वांगंधर्वाअखनं स्त्वांबृ मिंद्रस्त्वां
हस्पतिः त्वामोषधेसोमोराजाविद्वान्यक्ष्मादमुच्यत २४
त्वमुत्तमास्योषधेतववृक्षाउपस्तयः उपस्तिरस्तुसोऽस्मा
अ॰सं॰ २ कंयोअस्माँअभिदासति २५ ७ मामाहिंसीज्जनितायःपृ
थिव्यायोवादिवं सत्यधर्माव्यानट् यश्चापश्चंद्रा

सं॰
५८

थमोज्ज्ञानकस्मै देवाय हविषा विधेम ॥ १ ॥ अभ्यावर्तस्व
पृथिवि यज्ञेन पयसा सह ॥ वपां ते अग्निरिषितो अरोहत्
॥ २ ॥ अग्ने यत्ते शुक्रं यच्चंद्रं यत्पूतं यच्च यज्ञियम् ॥ तद्देवे
भ्यो भरामसि ॥ ३ ॥ इषमूर्जमहमित आदमृतस्य योनिं
महिषस्य धाराम् ॥ आ मा गोषु विशत्वा तनूषु जहामि

५८

३०८

सेदिमनिराममीवाम् ॥ ४ ॥ अग्ने तव श्रवो वयो महि भ्रा
जंते अर्चयो विभावसो ॥ बृहद्भानो शवसा वाजमुक्थ्यं
दधासि दाशुषे कवे ॥ ५ ॥ पावकवर्चाः शुक्रवर्चा अनूनव
र्चा उदियर्षि भानुना ॥ पुत्रो मातरा विचरन्नुपावसि पृ
णक्षि रोदसी उभे ॥ ६ ॥ ऊर्जो नपाज्जातवेदः सुशस्ति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ऋ०
८९

भिर्मंदस्वधीतिभिर्हितः त्वेइषःसंदधुर्भूरिवर्पसश्चित्रोत
यो वामजाताः इरज्यन्नग्ने प्रथयस्वजंतुभिरस्मेरायो
अमर्त्य सदर्शतस्यवपुषोविराजसि पृक्षसिसानसिं
क्रतुं ॥ इष्कर्त्तारमध्वरस्यप्रचेतसंक्षयंतंराधसोमहः
रातिंवामस्यसुभगांमहीमिषंदधासिसानसिंरयिम् ८९

॥ ९ ॥ ऋतावानंमहिषंविश्वदर्शतमग्निंसुम्नायदधि
रेपुरोजनाः श्रुत्कर्णंसप्रथस्तमंत्वागिरादैव्यंमानुषा
युगा ॥ १० ॥ आप्यायस्वसमेतुतेविश्वतःसोमवृष्ण्यम्
भवावाजस्यसंगथे ॥ ११ ॥ संतेपयांसिसमुयंतुवाजाः सि
संवृष्ण्यान्यभिमातिषाहः आप्यायमानोअमृता

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ सं० ॥
॥ ५० ॥

यसोमद्दिविश्रवा॑ᳪस्युत्तमानिधिष्व ॥ १२ ॥ आप्यायस्वमदिंत
मसोमविश्वेभिरᳪशुभिः ॥ भवानः सप्रथस्तमः सखा
वृधे ॥ १३ ॥ आतेवत्सोमनोयमत्परमाच्चित्सधस्थात्
अग्नेत्वांकामयागिरा ॥ १४ ॥ तुभ्यंताअंगिरस्तमविश्वाः
सुक्षितयःपृथक् ॥ अग्नेकामाययेमिरे ॥ १५ ॥ अग्निःप्रि

॥ ५० ॥

येषुधामसुकामोभूतस्यभव्यस्य ॥ सम्राडेकोविराज
ति ॥ १६ ॥ इतिकाण्वीसंहितायांत्रयोदशोध्यायः ॥ ७
॥ ७ ॥ संख्या ११६ ॥ ७ ॥ ॐ ॥ मय्यग्रेगृह्णाम्यग्रेअग्नि
ᳪरायस्पोषायसुप्रजास्त्वायसुवीर्याय ॥ मामुदेवताः
सचंताम् ॥ १ ॥ अपांपृष्ठमसियोनिरग्नेः समुद्रमभितः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं॰ ॥ ॥५२॥

३१४

पिन्वमानम् वर्द्धमानो अमृतं ३ आ चतुष्करेदितो मात्रयाव
रिमणग्रथस्व २ ब्रह्मजज्ञानं प्रथमं पुरस्ताद्विसीम
तः सुरुचो वेन आवः । सबुध्न्या उपमा अस्य विष्ठाः सत
श्च योनिमसतश्च विवः ३ हिरण्यगर्भः समवर्त्तता
ग्रेभूतस्य जातः पतिरेक आसीत् । सदाधार पृथिवी ॥५२॥

३१५

द्यामुतेमां कस्मै देवाय हविषा विधेम ४ द्रप्सश्चस्कं
द पृथिवीमनु द्यामिमंच योनिमनु यश्च पूर्वः समानं यो
निमनु संचरंतं द्रप्सं जुहोम्यनु सप्त होत्राः ५ नमोस्तु स
र्पेभ्यो ये के च पृथिवीमनु ये अंतरिक्षे ये दिवि तेभ्यः
सर्पेभ्यो नमः ६ या इषवो यातुधानानां ये वा वनस्पतीं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं॰
५२

३१६

ध्रुं रतु ये वावटेषु शेरते तेभ्यः सर्पेभ्यो नमः ७ ये वा
मीरोचने दिवो ये वा सूर्यस्य रश्मिषु येषामप्सु सदस्कृ
तं तेभ्यः सर्पेभ्यो नमः ८ कृणुष्व पाजः प्रसितिं न
पृथ्वीं याहि राजेवामवाँ इभेन तृष्वीमनु प्रसितिं द्रू
णानो स्तासि विध्य रक्षसस्तपिष्ठैः ९ तव भ्रमास

५२

३१७

आशुया पतंत्यनु स्पृश धृषता शोशुचानः तपूंष्यग्ने जि
ह्वापतंगानसंदितो विसृज विष्वगुल्काः १० प्रति स्पशो
विसृज तूर्णितमो भवा पायुर्विशो अस्या अदब्धः यो नो
दूरे अघशंसो यो अंत्यग्ने माकिष्टे व्यथिरा दधर्षीत् ११
उदग्ने तिष्ठ प्रत्यातनुष्व न्यमित्राँ ओषतात्तिग्महेते यो नो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥सं०॥
॥५३॥

३१८

दूरे अघशंसो अरातिःस्सभिधानचक्रेनीचातंधक्ष्यतस
न्नशुष्कम् १२ उर्ध्वोभवप्रतिविध्याध्यस्मदाविष्कृणु
ष्वदैव्यान्यग्ने अवस्थिरातनुहियातुजूनांजामिमजा
मिंप्रमृणीहिशत्रून् १३ अग्नेष्ट्वातेजसासादयामि
अग्निर्मूर्द्धादिवःककुत्पतिःपृथिव्याअयम् अपांरेता

॥५३॥

३१८

ंसिजिन्वति इंद्रस्यत्वौजसासादयामि १४ भुवोय
ज्ञस्यरजसश्चनेता यत्रानियुद्भिःसचसेशिवाभिः
दिविमूर्द्धानंदधिषेस्वर्षांजिह्वामग्नेचकृषेहव्यवाह
म् १५ प्रथमोनुवाकः ध्रुवासिधरुणास्तृता विश्वक
र्मणा मात्वासमुद्रउद्वधीन्मासुपर्णोव्यथमानापृथि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं॰ ॥
॥ ५६ ॥

वींदृꣳह ॥ १६ ॥ प्रजापतिष्ट्वा ॥ सादयत्वपां पृष्ठे समुद्रस्येमन्न्
व्यचस्वतीं प्रथस्वतीं प्रथस्व पृथिव्यसि ॥ १७ ॥ भूरसि भूमि
रस्यदितिरसि विश्वधाया विश्वस्य भुवनस्य धर्त्री । पृथि
वीं यच्छ पृथिवीं दृꣳह पृथिवीं मा हिꣳसीः ॥ १८ ॥ विश्वस्मै
प्राणायापानाय व्यानायोदानाय प्रतिष्ठायै चरित्राय

५६

अग्निष्ट्वाभिपातु मह्या स्वस्त्या छर्दिषा शंतमेन तया देव
तयाङ्गिरस्वद्ध्रुवा सीद ॥ १९ ॥ काण्डात्काण्डात्प्ररोहन्ती परु
षः परुषस्परि ॥ एवा नो दूर्वे प्र तनु सहस्रेण शतेन च
॥ २० ॥ या शतेन प्रतनोषि सहस्रेण विरोहसि । तस्या
स्ते देवीष्टके विधेम हविषा वयम् ॥ २१ ॥ यास्ते अग्ने

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ सं ॥
॥ ५५ ॥

सूर्ये रुचो दिवमातन्वंति रश्मिभिः ॥ ताभिर्नो अद्य सर्वा
भी रुचे जनाय नस्कृधि ॥ २२ ॥ यावो देवाः सूर्ये रुचो गोष्व
श्वेषु या रुचः ॥ इंद्राग्नी ताभिः सर्वाभी रुचं नो धत्त बृह
स्पते ॥ २३ ॥ विराड्ज्योतिरधारयत्स्वराड्ज्योतिरधारयत्
प्रजापतिष्ट्वा सादयतु पृष्ठे पृथिव्या ज्योतिष्मतीम् ॥ ५५ ॥

॥ २४ ॥ विश्वस्मै प्राणायापानाय व्यानाय विश्वं ज्योति
र्यच्छ ॥ अग्निष्टेऽधिपतिस्तया देवतयांगिरस्वद्ध्रुवासी
द ॥ २५ ॥ मधुश्च माधवश्च वासंतिकावृतू ॥ अग्नेरंतः
श्लेषोसि ॥ कल्पेतां द्यावापृथिवी कल्पंतामाप ओ
षधयः कल्पंतामग्नयः पृथङ्मम ज्यैष्ठ्याय सव्रताः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ सं० ॥
॥ ५६ ॥

येअग्नयः समनसोंतराद्यावापृथिवीइमे ॥ वासंतिका
ऋतूअभिकल्पमानाइंद्रमिवदेवाअभिसंविशंतु त
यादेवतयांगिरस्वध्रुवेसीदतम् ॥ २६ ॥ अषाढासि
सहमानासहस्वारातीः सहस्वपृतनायतः सहस्रवी
र्यासिसामाजिन्व ॥ २७ ॥ सहस्वमाअभिमातीः सहस्व ॥ ५६ ॥

पृतनायतः ॥ सहस्वसर्वंपाप्मानं॰ सहमानास्योषधे
द्वितीयोनुवाकः ॥ ७ ॥ मधुवाताऋतायतेमधुक्षरंतिसिं
धवः माध्वीर्नःसंत्वोषधीः ॥ १ ॥ मधुनक्तमुतोषसोम
धुमत्पार्थिवंरजः ॥ मधुद्यौरस्तुनःपिता ॥ २ ॥ मधुमान्नो
वनस्पतिर्मधुमां २ अस्तुसूर्यः माध्वीर्गावोभवंतुनः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं॰
८

॥ ३ ॥ अपांगंभं।सीदमात्वासूर्योभिताप्सीन्माग्निर्वैश्वा ३२६
नरः अछिन्नपत्राः प्रजाअनुवीक्षस्वानुत्वादिव्याव
ष्टिः सचताम् ४ त्रीन्त्समुद्रान्त्समसृपत्स्वर्गानपांप
तिर्वृषभइष्टकानाम् पुरीषंवसानःसुकृतस्यलोके
तत्रगछयत्रपूर्वेपरेताः ५ महीद्यौःपृथिवीचन ॥ ८ ॥

३२७

इमंयज्ञंमिमिक्षतां पिपृतांनोभरीमभिः ६ विष्णोःक
र्माणिपश्यतयतोव्रतानिपस्पशे इंद्रस्ययुज्यःसखा
॥ ७ ॥ ध्रुवासिधरुणास्तोजज्ञेप्रथमेभ्योयोनिभ्याअ
धिजातवेदाः सगायत्र्यात्रिष्टुभानुष्टुभाचदेवेभ्योह
व्यंवहतुप्रजानन् ॥ ८ ॥ इषेरायेरमस्वसहसेद्युम्न

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं० ५८ ३२८

ऊर्जे अपस्याय संम्राळसि स्वराळसि सारस्वतौ त्वोत्सौ

प्रावताम् १ अग्ने युक्ष्वा हि ये तवाश्वासो देव साधवः

अरं वहन्ति मन्यवे १० युक्ष्वा हि देवहूतमां२ अश्वां३ अ

अग्ने रथीरिव नि होता पूर्व्यः सदः ११ तृतीयोऽनु.

सम्यक्स्रवन्ति सरितो न धेना अन्तर्हृदा मनसा पूयमा ५८

३२९

नाः घृतस्य धारा अभि चाकशीमि हिरण्ययो वेतसो

मध्ये अग्नेः १ ऋचे त्वा रुचे त्वा भासे त्वा ज्योतिषे त्वा

अभूदिदं विश्वस्य भुवनस्य वाजिनमग्नेर्वैश्वानर

स्य च २ अग्निर्ज्योतिषा ज्योतिष्मान्रुक्मो वर्चसा व

र्चस्वान् सहस्रदा असि सहस्राय त्वा ३ आदित्यं

॥ सं० ॥
॥ ५१ ॥

र्भं पयसासमङ्ग्धि सहस्रस्य प्रतिमांविश्वरूपम् परि
वृङ्धि हरसामाभिमंस्थाः शतायुषंकृणुहिचीयमा
नः ॥ ४ ॥ वातस्यजूतिंवरुणस्यनाभिमश्वंजज्ञानं
सरिरस्यमध्ये शिशुंनदीनांहरिमद्रिबुध्नमग्नेमा
हिंसीः परमेव्योमन् ॥ ५ ॥ अजस्रमिन्दुमरुषंभुरण्यु

॥ ५१ ॥

मग्निमीळेपूर्वचित्तिंनमोभिः ॥ सपर्वभिर्ऋतुशः क
ल्पमानोगामाहिंसीरदितिंविराजं ॥ ६ ॥ वरूत्रींत्व
ष्टुर्वरुणस्यनाभिमविंजज्ञानांरजसः परस्मात् ॥ म
हींसाहस्रीमसुरस्यमायामग्नेमाहिंसीः परमेव्यो
मन् ॥ ७ ॥ योऽअग्निरग्नेरध्यजायतशोकात्पृथिव्याउत

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ सं० ॥
॥ १३ ॥

332

वो दिवस्परि॥ येनप्रजाविश्वकर्माजजानतमग्नेहेडः
परितेवृणक्तु ८ चित्रंदेवानामुदगादनीकंचक्षु
र्मित्रस्यवरुणस्याग्नेः आप्राद्यावापृथिवीअंतरिक्ष
ंसूर्यआत्माजगतःस्तस्थुषश्च ९ चतुर्थोनुवाकः
इमम्माहिंसीर्द्विपादंपशुंसहस्राक्षोमेधायचीयमा

॥ ६ ॥

333

नः॥ मयुंपशुम्मेधमग्नेजुषस्वतेनचिन्वानस्तन्वोनिषीद॥ म
युंतेशुगृच्छतुयंद्विष्मस्तंतेशुगृच्छतु १ इमंमाहिंसीरेकश
फंपशुंकनिक्रदंवाजिनंवाजिनेषु॥ गौरमारण्यमनुतेदिशा
मितेनचिन्वानस्तन्वोनिषीद गौरंतेशुगृच्छतुयंद्विष्मस्तं
तेशुगृच्छतुयंद्विष्मस्तंतेशुगृच्छतु॥ २॥ इमंसाहस्रंशत

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥सं०॥
॥६१॥

३३४

धारयुत्संव्यच्यमानं सरिरस्यमध्ये॥ घृतंदुहानामदितिंजना
याग्नेमाहिंसीः परमेव्योमन्॥ गवयमारण्यमनुतेदिशामि
तेनचिन्वानस्तन्वोनिषीद॥ गवयंतेशुगृच्छतुयंद्विष्मस्तंतेशु सं
गृच्छतु॥४९॥ इममूर्णायुं॥ वरुणस्यनाभिंत्वचंपशूनांद्विपदांच
तुष्पदां॥ त्वष्टुःप्रजानांप्रथमंजनित्रमग्नेमाहिंसीःपरमे

॥६१॥

३३५

व्योमन्॥ उष्ट्रमारण्यमनुतेदिशामितेनचिन्वानस्तन्वोनिषी
द॥ उष्ट्रंतेशुगृच्छतुयंद्विष्मस्तंतेशुगृच्छतु॥५०॥ अजोह्यग्नेर
जनिष्टशोकात्सोअपश्यज्जनितारमग्रे॥ तेनदेवादेवता
मग्रमायन्स्तेनरोहमायन्नुपमेध्यासः॥ शरभमारण्यमनु
तेदिशामितेनचिन्वानस्तन्वोनिषीद॥ शरभंतेशुगृच्छतु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं० ॥
॥ ६२ ॥

श्री

यंद्विष्मस्तंतेभुग्दधातु ॥ ५ ॥ चयंयविष्ठदाभुषोन्दः पाहितुधीगि
रः रक्षातोकमुतत्मना ६ पंचमोनुवाकः अपांत्वेमन्त्साद
याम्यपांत्वोद्मन्त्सादयाम्यपांत्वाभस्मन्त्सादयामि अपांत्वाज्यो
षिंतिसादयाम्यपांत्वायनेसादयामि अर्णवेत्वासदनेसाद
यामिसमुद्रेत्वासदने [illegible] नेसादयामिसरिरेत्वासदनेसा

६२

दयामि अपांत्वाक्षयेसादयाम्यपांत्वोपांसधिषिसादया
मि अपांत्वासदनेसादयाम्यपांत्वासधस्थेसादयाम्य
पांत्वायोनौसादयामि अपांत्वापुरीषेसादयाम्यपां
त्वापाथसिसादयामि गायत्रेणत्वाछंदसासादया
मित्रैष्टुभेनत्वाछंदसासादयामिजागतेनत्वाछंद

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं. ६३ ३३८

सासादयामि आनुष्टुभेन छंदसा सादयामि पांक्तेन छंदसा सादयामि ११ षष्ठोनुवाकः अयं पुरो भुवस्तस्य प्राणो भौवायनो वसंतः प्राणायनः गायत्री वासंती १ गायत्र्यै गायत्रं गायत्रादुपांशुरुपांशोस्त्रिवृत्त्रिवृतो रथंतरं वसिष्ठ ऋषिः प्रजापतिगृहीतया त्वया प्राणं गृह्णामि

६३

३३९

प्रजाभ्यः २ अयं दक्षिणा विश्वकर्मा तस्य मनो वैश्वकर्मणं ग्रीष्मो मानसस्त्रिष्टुब्ग्रैष्मी ३ त्रिष्टुभः स्वारं स्वारादंतर्यामोंतर्यामात्पंचदशः पंचदशाद्बृहत् भरद्वाज ऋषिः प्रजापतिगृहीतया त्वया मनो गृह्णामि प्रजाभ्यः ४ अयं पश्चाद्विश्वव्यचास्तस्य चक्षुर्वैश्वव्यचसं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र्षाश्चाक्षुष्यो जगती वार्षी ५ जगत्या ऋक्सममृ
क्समाच्छुक्रः शुक्रात्सप्तदशः सप्तदशाद्वैरूपम् ज
मदग्निर्ऋषिः प्रजापतिगृहीतया त्वया चक्षुर्गृह्णा
मि प्रजाभ्यः ६ इदमुत्तरात्स्वस्तस्य श्रोत्रं सौवम्
शारच्छ्रौत्र्यनुष्टुप्शारदी ७ अनुष्टुभ ऐडमैडान्मन्थी

मन्थिन एकविंश एकविंशाद्वैराजम् विश्वामित्रऋषिः
प्रजापतिगृहीतया त्वया श्रोत्रं गृह्णामि प्रजाभ्यः ८
इयमुपरि मतिस्तस्यै वाङ्मात्या हेमन्तो वाच्यः पङ्क्तिर्है
मन्ती ९ पङ्क्त्यै निधनवन्निधनवत आग्रयण आ
ग्रयणात्त्रिणवत्रयस्त्रिंशौ त्रिणवत्रयस्त्रिंशा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ सं - ॥
॥ ६५ ॥

भ्याᳪं शूद्राक्करेरेवते विश्वकर्मे ऋषिः प्रजापतिगृहीतयात्व
यावाचंगृह्णामिप्रजाभ्यः लोकंपृणताअस्येंद्रंविश्वाः
॥ १० ॥ मयिगृह्णामि १५ ध्रुवासि १३ मधुवाता ११ इ सम्यक्स्र-
मंमा ६ अपांत्वेमं ७ अयंपुरो १० सप्तमोनुवाकः ६५
इतिश्रीयजुर्वेदसंहितायांचतुर्दशमोध्यायः ॥ ॐ ॥

६५

ध्रुवक्षितिर्ध्रुवयोनिर्ध्रुवासिध्रुवंयोनिमासीदसाधुया उ
ख्यस्यकेतुंप्रथमंजुषाणाअश्विनाध्वर्यूसादयतामिहत्वा १
कुलायिनीघृतवतीपुरंधिस्योनेसीदसदनेपृथिव्याः
अभित्वारुद्रावसवोगृणंत्विमाब्रह्मपीपिहिसौभगाया
श्विनाध्वर्यूसादयतामिहत्वा २ स्वैर्दक्षैर्दक्षपितेहसीद

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं ६६ ३४४

देवानां सुम्ने बृहते रणाय पितेवैधि सूनव आ सुशेवा स्वावे
शा तन्वा संविशस्वाश्विनाध्वर्यू सादयतामिह त्वा ३ पृथिव्याः
पुरीषमस्यप्सो नाम तां त्वा विश्वे अभिगृणन्तु देवाः। स्तोमपृष्ठा
घृतवतीह सीद प्रजावदस्मे द्रविणायजस्वाश्विनाध्वर्यू साद
यतामिह त्वा ४ अदित्यास्त्वा पृष्ठे सादयाम्यन्तरिक्षस्य धर्त्रीं ६६

३४५

विष्टम्भनीं दिशामधिपत्नीं भुवनानाम्। ऊर्मिर्द्रप्सो अपा
मसि विश्वकर्मा त ऋषिरश्विनाध्वर्यू सादयतामिह त्वा
शुक्रश्च शुचिश्च ग्रैष्मावृतू अग्नेरन्तःश्लेषोसि कल्पे
तां द्यावापृथिवी कल्पन्तामाप ओषधयः कल्पन्तामग्न
यः पृथङ्मम ज्यैष्ठ्याय सव्रताः। ये अग्नयः समनसो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं॰ ६८

३४६

नरा द्यावापृथिवी इमे भेषाक्रतअभिक्रत्यमाना इंद्रमिव
देवा अभिसंविशन्तु तया देवतयांगिरस्वद्ध्रुवा सीद तम् ५
प्रथमोऽनुवाकः ॥ सजूर्ऋतुभिः सजूर्विधाभिः ससजूर्देवैः
सजूर्देवैर्वयोनाधैः अग्नये त्वा वैश्वानरायाश्विनाध्वर्यू
सादयतामिह त्वा । सजूर्ऋतुभिः सजूर्विधाभिः सजूर्वसुभिः

६८

३४७

सजूर्देवैर्वयोनाधैः अग्नये त्वा॰ सजूर्ऋतुभिः सजूर्विधा
भिः सजूरुद्रैः सजूर्देवैर्वयोनाधैः अग्नये त्वा वैश्वानरा॰
सजूर्ऋतुभिः सजूर्विधाभिः सजूरादित्यैः सजूर्देवैर्वयोना
धैः अग्नये त्वा॰ सजूर्ऋतुभिः सजूर्विधाभिः सजूर्विश्वै
र्देवैः सजूर्देवैर्वयोनाधैः अग्नये त्वा॰ ६ प्राणं मे ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं० ९६

पाह्यपानम्मेपाहिव्यानम्मेपाहि ॥ चक्षुर्म्मउर्व्यावि
भाहिश्रोत्रम्मेश्लोकय ॥ ७ ॥ अपःपिन्वौषधीर्जि
न्वद्विपादवचतुष्पात्पाहि ॥ दिवोवृष्टिमेरय ॥ ८ ॥
द्वितीयोनुवाकः ॥ मूर्द्धावयःप्रजापतिश्छंदः ॥ क्षत्रं
वयोमयंदंछंदः ॥ विष्टंभोवयोधिपतिश्छंदोविश्व

कर्म्मावयःपरमेष्ठीच्छंदः ॥ ९ ॥ बस्तोवयोविबलंछं
दोवृष्णिर्व्वयोविशालंछंदः ॥ पुरुषोवयस्तंद्रंछंदो
व्याघ्रोवयोनाधृष्टंछंदः ॥ १० ॥ सिंहोवयश्छदि
छंदः ॥ पष्ठवाड्वयोबृहतीच्छंदः ॥ उक्षावयःककु
प्छंदऋषभोवयःसतोबृहतीच्छंदः ॥ ११ ॥ अ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ सं० ॥
॥ ६९ ॥

नद्रान्वयः पङ्क्तिश्छंदो धेनुर्वयो जगती छंदः ॥ त्र्यविर्व
यस्त्रिष्टुप् छंदो दित्यवाड्वयो विराट् छंदः ॥१२॥ पंचावि
र्वयो गायत्री छंदस्त्रिवत्सो वय उष्णिक् छंदः ॥ तुर्यवा
ड्वयोनुष्टुप् छंदो लोकं पृणता अस्येंद्रं विश्वाः ॥१३॥ इंद्राग्नी
अव्यथमाना मिष्टकां दृंहतं युवं ॥ पृष्ठेन द्यावापृथिवी ॥ ६९ ॥

अंतरिक्षं च विबाधसे ७४ विश्वकर्मा त्वा सादयत्वंतरिक्षस्य
पृष्ठे व्यचस्वतीं प्रथस्वतीम् अंतरिक्षं यच्छांतरिक्षं दृं
हांतरिक्षं मा हिंसीः विश्वस्मै प्राणायापानाय व्याना
योदानाय प्रतिष्ठायै चरित्राय वायुष्ट्वाभिपातु मह्या
स्वस्त्या छर्दिषा शंतमेन तया देवतयांगिरस्वद्ध्रुवासी

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द॥१५॥ राज्ञ्यसिप्राचीदिग्विराळसिदक्षिणादिक्सम्रा
ळसिप्रतीचीदिक्स्वराळस्युदीचीदिगधिपत्न्यसि
बृहतीदिक्॥ विश्वकर्मात्वासादयत्वंतरिक्षस्यपृष्ठे
ज्योतिष्मतीम्॥ विश्वस्मैप्राणायापानायव्यानायवि
श्वंज्योतिर्यच्छ॥ वायुष्टेधिपतिस्तयादेवतयांगिरस्व

द्ध्रुवासीद॥ नभश्चनभस्यश्चवार्षिकावृतूअग्नेरंतःश्ले
षोसि॥ कल्पेतांद्यावापृथिवीकल्पंतामापओषधयःक
ल्पंतामग्नयःपृथङ्ममज्यैष्ठ्यायसव्रताः॥ येअग्नयः
समनसोंतराद्यावापृथिवीइमे॥ वार्षिकावृतूअभि
कल्पमानाइंद्रमिवदेवाअभिसंविशंतुतयादेवतयांगि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं० ८१

३५४

रस्वद्ध्रुवेसीद तम इषश्चोर्जश्च शारदा ऋतू अग्नेर
न्तःश्लेषोसि कल्पेतां द्यावापृथिवी कल्पंतामाप ओष
धयः कल्पंतामग्नयः पृथङ्मम ज्यैष्ठ्याय सव्रताः
ये अग्नयः समनसोंतरा द्यावापृथिवी इमे शारद
ऋतू अभिकल्पमाना इंद्रमिव देवा अभिसंविशंतु त

८१

मे

३५५

यो देवतयांगिरस्वद्ध्रुवेसीद तम १६ चतुर्थोनुवाकः
आयुर्मे पाहि प्राणं मे पाह्यपानं मे पाहि व्यानं मे पाहि
चक्षुर्मे पाहि श्रोत्रं मे पाहि वाचं मे पिन्व मनो मे जिन्वा
त्मानं मे पाहि ज्योतिर्मे यच्छ १७ माछंदः प्रमाछंदः प्र
तिमाछंदो अस्रीवयश्छंदः पंक्तिश्छंद उष्णिक्छंदः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं. ७२

३५६

१८ बृहती छंदोनुष्टुप्छंदो विराट्छंदो गायत्रीछंदः
त्रिष्टुप्छंदो जगती छंदः १९ पृथिवी छंदो न्तरिक्षं छंदो
द्यौश्छंदः समाश्छंदः नक्षत्राणि छंदो वाक्छंदः २० मन
श्छंदः कृषिश्छंदो हिरण्यं छंदो गौश्छंदः अजाश्छंदो
श्वश्छंदः २१ अग्निर्देवता वातो देवता सूर्यो देवता चं ९२

३५७

द्रमा देवता वसवो देवता रुद्रा देवता आदित्या देवता मरु
तो देवता विश्वे देवा देवता बृहस्पतिर्देवता इंद्रो देवता
वरुणो देवता २२ पंचमो नवाकः मूर्धासि राड् ध्रुवासि
धरुणा धर्त्र्यसि धरणी आयुषे त्वा वर्चसे त्वा कृष्यै त्वा
क्षेमाय त्वा २३ यंत्री राड्यंत्र्यसि यमनी ध्रुवासि धरित्री

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥सं॰॥
॥८३॥

इषे चोर्जे च वार्य्ये चापोषाय च ॥ लोकं पृण ताश्चस्येंद्र विश्वाः
॥२४ षष्ठोनुवाकः ॥ आशुस्त्रिवृद्भांतः पंचदशो व्योमास
प्तदशो धरुण एकविꣳशः प्रतूर्त्तिरष्टादशः तपो नवदशो
भीवर्त्तः सविꣳशो वर्चो द्वाविꣳशः संभरणस्त्रयोविꣳशो
योनिश्चतुर्विꣳशः ॥२५ गर्भाः पंचविꣳश ओजस्त्रिणवः ॥८३॥

क्रतुरेकत्रिꣳशः प्रतिष्ठा त्रयस्त्रिꣳशो ब्रध्नस्य विष्टपं च
तुस्त्रिꣳशः नाकः षट्त्रिꣳशो विवर्त्तोष्टाचत्वारिꣳशो ध
र्त्रं चतुष्टोमः ॥२६ सप्तमोनुवाकः ॥ अग्नेर्भागोसि दीक्षा
या आधिपत्यं ब्रह्म स्पृतं त्रिवृत्स्तोमः इंद्रस्य भागोसि
विष्णोराधिपत्यं क्षत्रꣳ स्पृतं पंचदशस्तोमः ॥२७ नृस च

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं.
२५

३६०

सांभागोसिधातुराधिपत्यंजनित्रꣳस्पृतꣳसप्तदशस्तो
मः मित्रस्यभागोसिवरुणस्याधिपत्यंदिवोवृष्टिर्वातः
स्पृतएकविꣳशस्तोमः २८ वसूनांभागोसिरुद्राणामा ए
धिपत्यंचतुष्पात्स्पृतंचतुर्विꣳशस्तोमः आदित्यानांभा
गोसिमरुतामाधिपत्यंगर्भास्पृताःपंचविꣳशस्तोमः २

२५

३६१

अदितेर्भागोसिपूष्णआधिपत्यमोजस्पृतंत्रिणवस्तो
मः देवस्यसवितुर्भागोसिबृहस्पतेराधिपत्यꣳसमी
चीर्दिशस्पृताश्चतुष्टोमस्तोमः २० यवानांभागो
स्ययवानामाधिपत्यंप्रजास्पृताश्चतुश्चत्वारिꣳश
स्तोमः ऋभूणांभागोसिविश्वेषांदेवानामाधिपत्यं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

३६२

ऋत ऽस्तृतं त्रयस्त्रि४ंशस्तोमः ॥ सहश्च सहस्यश्च हैमं
तिकावृतू अग्नेरंतःश्लेषोसि ॥ कल्पेतां द्यावापृथि
वीकल्पंतामाप ओषधयः कल्पंतामग्नयः पृथङ्मम ज्यै
ष्ठ्याय सव्रताः ये अग्नयः समनसोंतरा द्यावापृथिवी
इमे हैमंतिकावृतू अभिकल्पमाना इंद्रमिव देवा अ ॥ ७५ ॥

३६२

भिसंविशंतु तया देवतयांगिरस्वद्ध्रुवे सीदतम् ॥ अष्टमो
नुवाकः ॥ ३॥ एकयास्तुवत प्रजा अधीयंत प्रजापति
रधिपतिरासीत्तिसृभिरस्तुवत ब्रह्मासृज्यत ब्रह्मणस्प
रधिपति स्पतिरासीत् ॥ पंचभिरस्तुवत भूतान्यसृज्यंत भूतानां
पतिरधिपतिरासीत्सप्तभिरस्तुवत सप्त ऋषयोसृ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं॰ ॥ ८६ ॥

ज्यंत धातािधपतिरासीत् ॥ २१ ॥ नवभिरस्तुवतपितरोस्य स्य
ज्यंतादितिरधिपत्न्यासीदेकादशभिरस्तुवत ॥ ऋ
तवोस्य ज्यंतार्तवा अधिपतय आसन् ॥ त्रयोदशभिर
स्तुवतमासा अस्य ज्यंत संवत्सरोधिपतिरासीत्पंचदश
भिरस्तुवत क्षत्रमस्य ज्यतेंद्रोधिपतिरासीत् ॥ २२ ॥ स

॥ ८६ ॥ ३५४

३५५

प्तदशभिरस्तुवत ग्राम्याः पशवोस्य ज्यंत बृहस्पतिरधिपति
रासीन्नवदशभिरस्तुवत शूद्रार्यावस्य ज्येतामहोरात्रे अ
धिपत्नी आस्ताम् ॥ एकविंशत्यास्तुवतैकशफाः पशवो
स्य ज्यं वरुणोधिपतिरासीत्त्रयोविंशत्यास्तुवत क्षुद्राः प
शवोस्य ज्यंत पूषाधिपतिरासीत् ॥ २३ ॥ पंचविंशत्यास्त

ले

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

७७ वतारण्या: पशवोसृज्यंतवायुरधिपतिरासीत्सप्तविं॰शत्यास्तु ३६६
वतद्यावापृथिवीव्यैतांवसवोरुद्रा आदित्या अनुव्यायं॰
स्तएवाधिपतयआसन्॥ नवविं॰शत्यास्तुवतवनस्पत
योसृज्यंतसोमोधिपतिरासीदेकत्रिं॰शतास्तुवतप्रजाअ
सृज्यंतयवाश्चायवाश्चाधिपतयआसन् त्रयस्त्रिं॰शता
स्तुव। तभूतान्यशाम्यन्प्रजापतिःपरमेष्ठ्यधिपतिरासीत्॥

लोकंपृणताअस्येंद्रंविश्वा: ३ ५ ध्रुवक्षिति ५ सजूर्ऋ ३६७
तुभि: ३ मूर्द्धावय: ५ इंद्राग्नीअव्यथमाना। २ आयुर्मे
६ मूर्द्धासि २ आशुस्त्रिवृत्त २ अग्नेर्भागो ५ एकयास्तुव
त नवमोनुवाक: पंचदशोध्याय: कंडिकासंख्या ३५
ॐ॥ अग्नेजातान्प्रणुदानःसपत्नान्प्रत्यजातांजातवे
दोनुदस्व अधिनोब्रूहिसुमनाअहेडं॰स्तवस्यामशर्मं॰

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं०
७८

स्त्रिवरूथउभ्द्रो १ सहसाजातान्प्रणुदानः सपत्नान्प्रत्यजातं
नुदजातवेदः अधिनोब्रूहि सुमनस्यमानोवयंस्यामप्रणु
दानः सपत्नान् षोडशीस्तोमऽओजोद्रविणंचतुश्चत्वारि
ंशस्तोमोवर्च्चोद्रविणम् २ अग्नेःपुरीषमस्यप्सोनामतांचा
विश्वेअभिगृणंतुदेवाः स्तोमपृष्ठाघृतवतीहसीदप्रजावद
स्मेद्रविणायजस्व ३ एवश्छंदोवरिवश्छंदः शंभूश्छंदःपरि ७८

भूश्छंदः आच्छच्छंदोमनश्छंदोव्यचश्छंदः ४ सिंधुश्छंदःसमु
द्रश्छंदःसरिरंछंदः ककुप्छंदस्त्रिककुछंदःकाव्यंछंदोअंकुपंछंदः छं
ः ५ अक्षरपंक्तिःश्छंदःपदपंक्तिश्छंदोविष्टारपंक्तिश्छंदःक्षु
रोभ्रजश्छंदः आच्छछंदःप्रच्छछंदःसंयच्छंदोवियच्छंदः ६ बृह
छंदोरथंतरंछंदोनिकायश्छंदोविवधश्छंदःगिरश्छंदोभ्रज

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥सं॰११॥
॥८१॥

३७०

श्छंदस्॥ स्त्क्प्छंदोनुष्टुप्छंदः ८ एवश्छंदो। वरिवश्छंदोवय
श्छंदोवयस्कृछंदः॥ विष्पर्द्धाश्छंदोविशालंछंदश्छदिश्छंदोदू
रोहणंछंदः तंद्रंछंदोअंकांकंछंदः ९ रश्मिनासत्यायसत्यं
जिन्वप्रेतिनाधर्मणाधर्मंजिन्व। अन्वित्यादिवादिवंजिन्व
संधिनांतरिक्षेणांतरिक्षंजिन्व ९ प्रतिधिनापृथिव्या।पृ
थिवींजिन्वविष्टंभेनवृष्ट्यावृष्टिंजिन्व प्रवयान्हाहर्जिन्वा

८१

३६९

नुयारात्र्यारात्रींजिन्व १० उशिजावसुभ्योवसूंजिन्वप्रकेतेनादि
त्येभ्यःआदित्यांजिन्व तंतुनारायस्पोषेणरायस्पोषंजिन्व
सं॰संसर्पेणश्रुतायश्रुतंजिन्व ११ ऐडेनौषधीभिरोषधीर्जिन्वो
त्तमेनतनूभिस्तनूर्जिन्व वयोधसाधीतेनाधीतंजिन्वाभिजिता
तेजसातेजोजिन्व १२ प्रतिपदसिप्रतिपदेत्वानुपदस्यनुपदे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं० ॥ ८० ॥

362

त्वा ॥ संपदसि संपदे त्वा तेजोसि तेजसे त्वा १३ त्रिवृदसि त्रि
वृते त्वा प्रवृदसि प्रवृते त्वा विवृदसि विवृते त्वा सवृदसि
सवृते त्वा १४ आक्रमोस्याक्रमाय त्वा संक्रमोसि संक्रमा
य त्वा उत्क्रमोस्युत्क्रमाय त्वोत्क्रांतिरस्युत्क्रांत्यै त्वा अधि
पतिनोर्जोर्जं जिन्व वृषः श्रीः क्षत्राय क्षत्रं जिन्व १५ द्वितीये ॥

363

राज्ञ्यसि प्राचीदिग्वसवस्ते देवा अधिपतयः अग्निर्हेती
नां प्रतिधर्त्ता १६ त्रिवृत्त्वा स्तोमः पृथिव्यां श्रयत्वाज्य
मुक्थमव्यथायै स्तभ्नातु रथंतरं साम प्रतिष्ठित्या अंत
रिक्षे १७ ऋषयस्त्वा प्रथमजा देवेषु दिवो मात्रया वरि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं
८१ म्णाप्रथंतु विधर्त्ताचायमधिपतिश्चतेत्वासर्वेसंविदानाना
कस्यपृष्ठेस्वर्गेलोकेयजमानंचसादयंतु १८ विराडसि
दक्षिणादिग्रुद्रास्तेदेवाअधिपतयः इंद्रोहेतीनांप्रतिध
र्त्ता १९ पंचदशस्त्वास्तोमः पृथिव्यांश्रयतुप्रउगमुक्थ
मव्यथायैस्तभ्नातु बृहत्सामप्रतिष्ठित्याअंतरिक्ष २०
८१

364

365

ऋषयस्त्वाप्रथमजादेवेषुदिवोमात्रयावरिम्णाप्रथंतु
विधर्त्ताचायमधिपतिश्चतेत्वासर्वेसंविदानानाकस्यपृ
ष्ठेस्वर्गेलोकेयजमानंचसादयंतु २१ सम्राडसिप्रती
चीदिगादित्यास्तेदेवाअधिपतयः वरुणोहेतीनांप्रतिध
र्त्ता २२ सप्तदशस्त्वास्तोमः पृथिव्यांश्रयतुमरुत्वतीय

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं० ८२

मुक्थमव्यथायैस्तभ्नातु वैरूपꣳसाम प्रतिष्ठित्या अन्तरि
क्षे २३ ऋषयस्त्वा प्रथमजा० सादयंतु २४ स्वराळस्यु
दीची दिङ्मरुतस्ते देवा अधिपतयः सोमो हेतीनां प्रति
धर्त्ता २५ एकविꣳशस्त्वा स्तोमः पृथिव्याꣳ श्रयत्वानि
ष्केवल्यमुक्थमव्यथायै स्तभ्नातु वैराजꣳ साम प्रति ८२

३०५

३०६

ष्ठित्या अन्तरिक्षे २६ ऋषयस्त्वा० सादयंतु २७ अधिप
त्न्यसि बृहती दिग्विश्वे ते देवा अधिपतयः बृहस्पतिर्है
तीनां प्रतिधर्त्ता २८ त्रिणवत्रयस्त्रिꣳशौ त्वा स्तोमौ पृ
थिव्याꣳ श्रयतां वैश्वदेवाग्निमारुते उक्थे अव्यथायै स्त
भ्नीतां शाक्वररैवते सामनी प्रतिष्ठित्या अन्तरिक्षे २९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥सं०॥
॥८२॥

ऋषयस्त्वाप्रथमजा० सादयंतु २०॥ तृतीयोनुवाकः॥ अयं
पुरोहरिकेशः सूर्यरश्मिस्तस्यरथगृत्सश्चरथौजाश्चसेना
नीग्रामण्यौ पुंजिकस्थलाचकृतुस्थलाचाप्सरसौदंक्ष्णवः
पशवोहेतिःपौरुषेयोवधःप्रहेतिः॥ ३१॥ तेभ्योनमोअस्तुतेनो
मृळयंतुतेनोवंतु तेयंद्विष्मोयश्चनोद्वेष्टितमेषांजंभेद

॥८२॥

ध्मः॥ ३२॥ अयंदक्षिणा।विश्वकर्मातस्यरथस्वनश्चरथेचि
त्रश्चसेनानीग्रामण्यौ मेनकाचसहजन्याचाप्सरसौयातु
धानाहेतीरक्षांसिप्रहेतिः॥ ३३॥ तेभ्योनमोअस्तु० भेदध्मः
॥ ३४॥ अयंपश्चाद्विश्वव्यचास्तस्यरथप्रोतश्चासमरथश्च
सेनानीग्रामण्यौ प्रम्लोचंतीचानुम्लोचंतीचाप्सरसौव्या

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं०
९४

घाहेतिः सर्प्पाः प्रहेतिः ३७ तेभ्योनमोअस्तु० जंभेदध्मः
३६ अयमुत्तरा । संयद्वसुः स्तस्यताक्ष्यश्चारिष्टनेमिश्च
सेनानीग्रामण्यौ विश्वाचीचघृताचीच्चाप्सरसाआपो
हेतिर्वातः प्रहेतिः ३७ तेभ्योनमोअस्तु० दध्मः ३८
अयमुपर्यर्वाग्वसुस्तस्यसेनजिच्चसुषेणश्चसेनानीग्रा ९४

मण्यो उर्वशीचपूर्वचित्तिश्चाप्सरसावस्फूर्जन्स्फूर्जन्हेतिर्वि
घुत्प्रहेतिः ३९ तेभ्योनमोअस्तु० ४० चतुर्थोनुवाकः
अग्निर्मूर्द्धादिवः ककुत्पतिः पृथिव्याअयम् अपांरेतांसि
सिजिन्वति ४१ अयमग्निःसहस्त्रिणोवाजस्यशतिनः
स्पतिः मूर्द्धाकवीरयीणाम् ४२ त्वामग्नेपुष्करादध्यथ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं०
८५

र्वा निरमंथत मूर्द्धो विश्वस्य वाघतः ॥ ३ ॥ भुवो यज्ञस्य
रजसश्च नेता यत्रा नियुद्भिः सचसे शिवाभिः । दिवि मूर्द्धा
नं दधिषे स्वर्षां जिह्वामग्ने चकृषे हव्यवाहम् ॥ ४ ॥ अबोध्य
ग्निः समिधा जनानां प्रति धेनुमिवायतीमुषासम् । यह्वा
इव प्र वयामुज्जिहानाः प्र भानवः सिस्रते नाकमच्छ ॥ ५ ॥

॥ ८५ ॥

अबोचाम कवये मेध्याय वचो वंदारु वृषभाय वृष्णे । गविष्ठि
रो नमसा स्तोममग्नौ दिवीव रुक्ममुरुव्यंचमश्रेत् ॥ ६ ॥
अयमिह प्रथमो धायि धातृभिर्होता यजिष्ठो अध्वरेष्वीड्यः ।
यमप्नवानो भृगवो विरुरुचुर्वनेषु चित्रं विभ्वं विशे विशे
॥ ७ ॥ जनस्य गोपा अजनिष्ट जागृविरग्निः सुदक्षः सु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं.
८६

वितायनव्यसे घृतप्रतीकोबृहतादिविस्पृग्द्युमद्विभा
तिभरतेभ्यःशुचिः ४८ त्वामग्नेअंगिरसोगुहाहितम
न्वविंदंछिश्रियाणंवनेवने सजायसेमथ्यमानःसहो
महत्त्वामाहुःसहसस्पुत्रमंगिरः ४९ सखायःसंवःस
म्यंचमिषंस्तोमंचाग्नये वर्षिष्ठायक्षितीनामूर्जोन

८६

प्त्रेसहस्वते ५० संसमिद्युवसेवृषन्नग्नेविश्वान्यर्यआ
इळस्पदेसमिध्यसेसनोवसून्याभर ५१ त्वामग्नेहवि
ष्मंतोदेवंमर्त्तासईळते मन्येत्वाजातवेदसंसहव्यावक्ष्या
नुषक् ५२ त्वांचित्रश्रवस्तमहवंतेविक्षुजंतवः शोचिष्के
शंपुरुप्रियाग्नेहव्यायवोळ्हवे ५३ एवोनोअग्निन्नम

सं० ॥ ८८ ॥

साऊर्जो नपातमा हुवे । प्रियं चेतिष्ठमरतिं स्वध्वरं विश्वस्य
दूतममृतम् । ५४ विश्वस्य दूतममृतं विश्वस्य दूतममृ
तम् । सयोजते अरुषा विश्वभोजसा सदुद्रवत्स्वाहुतः ॥ ५५
सदुद्रवत्स्वाहुतः सदुद्रवत्स्वाहुतः । सुब्रह्मा यज्ञः सुशमी
वसूनां देवं राधो जनानाम् ५६ अग्ने वाजस्य । गोमत

॥ ८८ ॥

300

301

ईशानः सहसो यहो । अस्मे धेहि जातवेदो महि श्रवः ॥ ५७
स इधानो वसुष्कविरग्निरीळेन्यो गिरा । रेवदस्मभ्यं पुर्वणी
क दीदिहि ५८ क्षपो राजन्नुत त्मनाग्ने वस्तोरुतोषसः
स तिग्मजंभ रक्षसो दह प्रति ५९ भद्रो नो अग्निराहुतो भ
द्रा रातिः सुभग भद्रो अध्वरः । भद्रा उत प्रशस्तयः ॥ ६०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स॰
८८

भद्रा उत प्रशस्तयो भद्रं मनः कृणुष्व वृत्रतूर्ये येना समत्सु
सासहः ६१ येना समत्सु सासहोऽव स्थिरा तनुहि भूरि शर्
धताम् वनेमा ते अभिष्टिभिः ६२ अग्निं तं मन्ये यो वसु
रस्तं यं यन्ति धेनवः अस्तमर्वन्त आशवोऽस्तं नित्यासो
वाजिन इषं स्तोतृभ्य आ भर ६३ सो अग्निर्यो वसुर्गृ ८८

णे सं यमायन्ति धेनवः समर्वन्तो रघुद्रुवः सं सुजातासः
सूरय इषं स्तोतृभ्य आ भर ६४ उभे सुश्चन्द्र सर्पिषो दर्
वी श्रीणीष आसनि उतो न उत्पुपूर्या उक्थेषु शवसस्पत
इषं स्तोतृभ्य आ भर ६५ अग्ने तमद्याश्वं न स्तोमैः क्र
तुं न भद्रं हृदिस्पृशम् ऋध्यामा त ओहैः ६६ अधा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं०
८९

ग्नेः क्रतोर्भद्रस्य दक्षस्य साधोः रथीर्ऋतस्य बृहतो बभूथ ए॒भिर्न्नो अर्कैर्भवा नो अर्वाङ्स्वर्णज्योतिः अग्ने विश्वेभिः सुमना अनीकैः ६८ अग्निꣳ होतारं मन्ये दास्वन्तं वसुꣳ सूनुꣳ सहसो जातवेदसं विप्रन्न जातवेदसम् य ऊर्ध्वया स्वध्वरो देवो देवाच्या कृपा घृतस्य विभ्राष्टिमनु वष्टि शो ८९

चिषा जुह्वानस्य सर्प्पिषः ६९ अग्ने त्वन्नो अन्तम उत त्राता शिवो भवा वरूथ्यः वसुरग्निर्वसुश्रवा अच्छा नक्षि द्युमत्तमꣳ रयिं दाः तन्त्वा शोचिष्ठ दीदिवः सुम्नाय नूनमीमहे सखिभ्यः ७० ७ येन ऋषयस्तपसा सत्रमायन्निन्धाना अग्निꣳ स्वराभरन्तः तस्मिन्नहन्निदधे नाके अग्निय्य

मातुर्मनवस्तीर्णवर्हिषम् ७१ तम्पत्नीभिरनुगच्छेमदेवाः पु
त्रैर्भ्रातृभिरुतवाहिरण्यैः नाकंगृभ्णानाः सुकृतस्य लोके
तृतीये पृष्ठे अधिरोचने दिवः ७२ आवाचो मध्यमरुह
द्भुरण्युरयमग्निस्सत्पतिश्चेकितानः पृष्ठे पृथिव्या नि
हितोदविद्युतदधस्पदं कृणुतांयेपृतन्यवः ७३ अयम

ग्निर्वीरतमोवयोधाः सहस्रियो द्योततामप्रयुच्छन् विभ्रा
जमानस्सरिरस्य मध्यउपप्रयाहिदिव्यानिधाम ७४
सम्प्रच्यवध्वमुपसम्प्रयाताग्नेपथोदेवयानान्कृणुध्व
म् पुनः कृण्वानापितरायुवानान्वातांसीत्त्वयितन्तु
मेतम् ७५ उद्बुध्यस्वाग्नेप्रतिजागृहित्वमिष्टापूर्तेसं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥सं०॥ ५ स्व जैथामयंचे अस्मिन्सधस्थे अध्युत्तरस्मिन्विश्वेदे
॥९१॥ वायजमानश्चसीदत ७६ येनवहसिसहस्रंयेना
ग्नेसर्ववेदसम् तेनेमंयज्ञंन्नोनयस्वर्देवेषुगंतवे
७७ अयंतेयोनिर्ऋत्वियोयतोजातोअरोचथाः ॥
तंजानन्नग्नआरोहाथानोवर्द्धयारयिम् ७८ तप
॥९१॥

श्चतपस्यश्चशैशिरावृतू अग्नेरंतश्लेषोसि कल्पे
तांद्यावापृथिवीकल्पंतामापओषधयः कल्पन्तामग्न
यः पृथङ्ममज्यैष्ठ्यायसव्रताः येअग्नयः समनसोंत
राद्यावापृथिवीइमे शैशिरावृतू अभिकल्पमानाइं
द्रमिवदेवाअभिसंविशंतुतयादेवतयाङ्गिरस्वध्रुवेसी

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥सं०॥
॥९२॥

दतम् परमेष्ठीत्वासादयतुदिवस्पृष्ठेज्योतिष्मतीम् वि
श्वस्मैप्राणायापानायव्यानायविश्वंज्योतिर्यच्छ सूर्य
स्तेधिपतिस्तयादेवतयाङ्गिरस्वद्ध्रुवासीद ७९ लोकं
पृणछिद्रंपृणाथोसीदध्रुवात्वम् इन्द्राग्नीत्वाबृहस्पति
रस्मिन्योनावसीषदन् ८० ताअस्यसूददोहसः सोम

॥९२५

श्रीणंतिपृश्नयः जन्मन्देवानांविशस्त्रिष्वारोचनेदिवः
इंद्रंविश्वाअवीवृधन्त्समुद्रव्यचसंगिरः रथीतमंरथीनांवा
जानांसत्पतिंपतिम् ८२ प्रोथदश्वोनयवसेविष्यन्यदाम
हः संवरणाद्व्यस्थात् आदस्यवातोअनुवातिशोचिरधस्म
तेव्रजनंकृष्णमस्ति ८३ आयोष्ट्वासदनेसादयाम्यवतश्छा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं० ९२ याया २ समुद्रस्य हृदये रश्मीवतीम्भास्वतीमा याद्याम्भास्यापृ ४०२
थिवीमोर्वन्तरिक्षम् परमेष्ठीत्वासादयतु दिवस्पृष्ठे व्यचस्वती
म्प्रथस्वतीम् दिवंयच्छ दिवन्दृंह दिवम्माहिंसीः विश्व
स्मै प्राणायापानाय व्यानायोदानाय प्रतिष्ठायै चरित्राय।
सूर्य्यस्त्वाभि पातु मह्यास्वस्त्याछर्दिषाशन्तमेन तया देवतया ९२

४०३
ङ्गिरस्वद्ध्रुवे सीद तम् ८४ सहस्रस्य प्रमासि सहस्रस्य प्रति
मासि सहस्रस्योन्मासि साहस्रोसि सहस्राय त्वा ८५ ६७
अग्ने जातान् ८ रश्मिना सत्याय ७ राज्ञसि १९ अयं पु
रो १० अग्निर्मूर्द्धा ३० येन ऋषयः ८ तपश्च ७ सप्तमो
नुवाकः इति षोडशो ध्यायः कण्डिका संख्या ८५ ६७ ॐम्

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रु.
२४

नमस्ते। रुद्रमन्यवउतोतइषवेनमः बाहुभ्यामुततेनमः १
याते। रुद्रशिवातनूरघोरापापकाशिनी तयानस्तन्वाशं
तमयागिरिशंताभिचाकशीहि २ यामिषुंगिरिशंतहस्तेबि
भर्ष्यस्तवे शिवांगिरित्रतांकुरुमाहिंसीः पुरुषंजगत्
३ शिवेनवचसात्वागिरिशाछावदामसि यथानःस २४

र्वमिज्जगदयक्ष्मंसुमनाअसत् ४ अध्यवोचदधिवक्ता
प्रथमोदैव्योभिषक् अहींश्चसर्वांजंभयंसर्वाश्चयातुधा
न्योधराचीःपरासुव ५ असौयस्ताम्रोअरुणउतबभ्रुःसु
मंगलः येचेमंरुद्राअभितोदिक्षुश्रिताःसहस्रशोवैषां
हेडईमहे ६ असौयोवसर्पतिनीलग्रीवोविलोहितः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ सं० ॥
॥ १५ ॥

उतैनंगोपा अदृश्रन्नदृश्रन्नुदहार्यः स दृष्टो मृडयाति नः ॥ ७ ॥
नमो अस्तु नीलग्रीवाय सहस्राक्षाय मीढुषे ॥ अथो ये अस्य स
त्वानोहं तेभ्यो करं नमः ॥ ८ ॥ प्रमुंच धन्वनस्त्वमुभयोरार्त्न्योर्ज्या
म् ॥ याश्च ते हस्त इषवः परा ता भगवो वप ॥ ९ ॥ विज्यं धनुः कप
र्दिनो विशल्यो बाणवां उत ॥ अनेशन्नस्येषव आभुरस्य

॥ १५ ॥

निषंगधिः ॥ १० ॥ परि ते धन्वनो हेतिरस्मान्वृणक्तु विश्वतः
अथो य इषुधिस्तवारे अस्मन्निधेहि तम् ॥ ११ ॥ या ते हेतिर्मी
ढुष्टम हस्ते बभूव ते धनुः तयास्मान्विश्वतस्त्वमयक्ष्मया
परिभुज ॥ १२ ॥ अवतत्य धनुष्ट्वं सहस्राक्ष शतेषुधे ॥ निशीर्य
शल्यानां मुखा शिवो नः सुमना भव ॥ १३ ॥ नमस्त आयुधाय

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥सं०॥
॥९६॥

नातताय धृष्णवे ॥ उभाभ्यामुत ते नमो बाहुभ्यां तव धन्वने १४
मा नो महांतमुत मा नो अर्भकं मा न उक्षंतमुत मा न उक्षितं
मा नो वधीः पितरं मोत मातरं मा नः प्रियास्तन्वो रुद्र रीरि
षः ॥ १५ मा नस्तोके तनये मा न आयुषि मा नो गोषु मा नो
अश्वेषु रीरिषः ॥ मा नो वीरान्रुद्र भामिनो वधीर्हविष्मंतः स

॥९६॥

दमित्त्वा हवामहे १६ प्रथमोनुवाकः ॥ नमो हिरण्यबाहवे से
नान्ये दिशां च पतये नमो नमो वृक्षेभ्यो हरिकेशेभ्यः पशूनां
पतये नमः ॥ नमः शष्पिंजराय त्विषीमते पथीनाम्पतये न
मो नमो हरिकेशायोपवीतिने पुष्टानां पतये नमः ॥ १७ नमो
बभ्लुशाय व्याधिनेन्नानां पतये नमो नमो भवस्य हेत्यै ज

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं॰
१८

गतांपतयेनमः नमोरुद्रायाततायिनेक्षेत्राणांपतयेनमो
नमः सूतायाहंत्यायवनानांपतयेनमः १८ नमोरोहितायस्थ
पतयेवृक्षाणांपतयेनमोनमोभुवंतयेवारिवस्कृतायौष
धीनांपतयेनमः नमोमंत्रिणेवाणिजायकक्षाणांपतयेन
मोनमउच्चैर्घोषायाक्रंदयतेपत्तीनांपतयेनमः १९ नमः

१८

कृत्स्नायतायधावतेसत्वनांपतयेनमोनमः सहमानाय
निव्याधिनआव्याधिनीनांपतयेनमः नमःककुभायनिषं
गिणेस्तेनानांपतयेनमोनमोनिचेरवेपरिचरायारण्या
नांपतयेनमः २० नमोवंचतेपरिवंचतेस्तायूनांपतयेनमो
नमोनिषंगिणइषुधिमतेतस्कराणांपतयेनमः नमःसृका

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं० १८

यिभ्योजिघांसद्भ्योमुष्णतांपतयेनमोनमोसिमद्भ्योनक्तंचरद्भ्यो
विकृंतानांपतयेनमः ॥ २१ ॥ द्वितीयोनुवाकः ॥ नमउष्णीषिणे ॥ गि
रिचरायकुलुंचानांपतयेनमोनमइषुमद्भ्योधन्वायिभ्यश्च
वोनमः ॥ नमआतन्वानेभ्यःप्रतिदधानेभ्यश्चवोनमोनम
आयछद्भ्योस्यद्भ्यश्चवोनमः ॥ २२ ॥ नमोविसृजद्भ्योविध्यद्भ्य १८

श्चवोनमोनमःस्वपद्भ्योजाग्रद्भ्यश्चवोनमः ॥ नमःशयानेभ्य
आसीनेभ्यश्चवोनमोनमस्तिष्ठद्भ्योधावद्भ्यश्चवोनमः ॥ २३ ॥
नमःसभाभ्यःसभापतिभ्यश्चवोनमोनमोश्वेभ्योश्वपति
भ्यश्चवोनमः ॥ नमआव्याधिनीभ्योविविध्यंतीभ्यश्चवो
नमोनमउगणाभ्यस्तृंहतीभ्यश्चवोनमः ॥ २४ ॥ नमोग

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं० ॥
॥ ११ ॥

णेभ्योगणपतिभ्यश्चवोनमोनमोव्रातेभ्योव्रातपतिभ्यश्चवोन
मः नमोगृत्सेभ्योगृत्सपतिभ्यश्चवोनमोनमोविरूपेभ्योविश्व
रूपेभ्यश्चवोनमः ॥ २५ ॥ नमःसेनाभ्यःसेनानिभ्यश्चवोनमो
नमोरथिभ्योअरथेभ्यश्चवोनमः ॥ नमःक्षत्तृभ्यः संग्र
हीतृभ्यश्चवोनमोनमोमहद्भ्योअर्भकेभ्यश्चवोनमः ॥ २६ ॥ तृती ॥ ११ ॥
भ्यो

नमस्तक्षभ्योरथकारेभ्यश्चवोनमोनमःकुलालेभ्यःकर्मारे
भ्यश्चवोनमः ॥ नमोनिषादेभ्यःपुंजिष्टेभ्यश्चवोनमोनमः
श्वनिभ्योमृगयुभ्यश्चवोनमः ॥ २७ ॥ नमःश्वभ्यःश्वपतिभ्य
श्चवोनमोनमोभवायचरुद्रायच ॥ नमःशर्वायचपशुपत
येचनमोनीलग्रीवायचशितिकंठायच ॥ २८ ॥ नमःकपर्द्दि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं० ॥
॥ १०० ॥

नेचव्युप्तकेशायचनमः सहस्राक्षायचशतधन्वनेच नमो
गिरिशयायचशिपिविष्टायचनमोमीढुष्टमायचेषुमते
च २९ नमोह्रस्वायचवामनायचनमोबृहतेचवर्षीयसे
च नमोवृद्धायचसवृधेचनमोग्र्यायचप्रथमायच ३०
नमआशवेचाजिरायचनमः शीघ्र्यायचशीभ्यायच

॥ १०० ॥

नमऊर्म्यायचावस्वन्यायचनमोनादेयायचद्वीप्यायच ३१
च नमोज्येष्ठायचकनिष्ठायचनमः पूर्वजायचापरजायच नमो
मध्यमायचापगल्भायचनमोजघन्यायचबुध्न्यायच ३२
नमः सोभ्यायचप्रतिसर्यायचनमोयाम्यायचक्षेम्यायच
नमः श्लोक्यायचावसान्यायचनमउर्वर्यायचखल्यायच ३३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२ नमो दुंदुभ्याय चाहनन्याय च ३५ सं. १

नमो वन्याय च कक्ष्याय च नमः श्रवाय च प्रतिश्रवाय च नम
आशुषेणाय चाशुरथाय च नमः शूराय चावभेदिने च ३४
नमो बिल्मिने च कवचिने च नमो वर्मिणे च वरूथिने च नम
श्रुताय च श्रुतसेनाय च नमो धृष्णवे च प्रमृशाय च नमो निषंगि
णे चेषुधिमते च नमस्तीक्ष्णेषवे चायुधिने च नमः स्वायुधा

१०१

य च सुधन्वने च ३६ नमः स्रुत्याय च पथ्याय च नमः काट्याय
च नीप्याय च नमः कुल्याय च सरस्याय च नमो नादेयाय वैशं च
ताय च ३७ नमः कूप्याय चावट्याय च नमः ईध्रियाय चातप्या
य च नमो मेघ्याय च विद्युत्याय च नमो वर्ष्याय चावर्ष्याय च
३८ नमो वात्याय च रेष्म्याय च नमो वास्तव्याय च वास्तुपा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं०॥
॥२॥

यच नमः सोमायचरुद्रायचनमस्ताम्रायचारुणायच ३९
नमः शंगवेचपशुपतयेचनमउग्रायचभीमायच नमोग्रेव
धायचदूरेवधायचनमोहंत्रेचहनीयसेच ४० नमोवृक्षे
भ्योहरिकेशेभ्योनमस्ताराय नमः शंभवेचमयोभवेचन
मः शंकरायचमयस्करायचनमः शिवायचशिवतरायच

॥२॥

४१ नमः पार्यायचावार्यायचनमः प्रतरणायचोत्तरणा
यच नमस्तीर्थ्यायचकूल्यायचनमः शष्प्यायचफेन्यायच
४२ नमः सिकत्यायचप्रवाह्यायचनमः किंशिलायच
क्षयणायच नमः कपर्दिनेचपुलस्तयेचनमइरिण्यायच
प्रपथ्यायच ४३ नमोव्रज्यायचगोष्ठ्यायचनमस्तल्प्याय

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं॰ ३

प्रगेह्यायच नमोह्रद्यायचनिवेष्प्यायचनमः काट्यायच
गह्वरेष्ठायच ४४ नमःशुष्क्यायचहरित्यायचनमः
पांसव्यायचरजस्यायच नमोलोप्यायचोलप्यायच
नमऊर्व्यायचसूर्म्यायच ४५ नमःपर्ण्यायचपर्णशदा
यचनमउद्गुरमाणायचाभिघ्नतेच नमआखिदतेचप्र ॥२॥

खिदतेचनमइषुकृद्भ्योधनुष्कृद्भ्यश्चवोनमः॥ नमोवः किरिके
भ्योदेवानांहृदयेभ्योनमोविचिन्वत्केभ्योनमोविक्षिणत्केभ्यो
नमआनिर्हतेभ्यः॥४६॥ स्वसमोतुयाव: द्रापेअंधसस्पतेद
रिद्रनीललोहित॥ आसांप्रजानामेषांपशूनांमाभेर्मारो
ङ्मोचनःकिंचनाममत्॥ ४७॥ इमारुद्रायतवसेकपर्दिनेक्ष

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं. ५४

यद्वीराय प्रभरामहे मतीः । यथा शमसद्द्विपदे चतुष्पदे विश्वं पुष्टं
ग्रामे अस्मिन्ननातुरम् ॥ ४८ ॥ या ते रुद्र शिवा तनूः शिवा विश्वा
हा भेषजी शिवा रुतस्य भेषजी तया नो मृड जीवसे ॥ ४९ ॥
परि णो हेती रुद्रस्य वृज्याः परि त्वेषस्य दुर्मतिरघायोः । अ
व स्थिरा मघवद्भ्यस्तनुष्व मीढ्वस्तोकाय तनयाय मृड ॥ ५० ॥

४

४२४

मीढुष्टम शिवतम शिवो नः सुमना भव । परमे वृक्ष आयु
धं निधाय कृत्तिं वसान आचर पिनाकं बिभ्रदागहि ॥ ५१ ॥ वि
किरिद्र विलोहित नमस्ते अस्तु भगवः । यास्ते सहस्रं हेत
योऽन्यमस्मन्निवपंतु ताः ॥ ५२ ॥ सहस्राणि सहस्रशो बाह्वो
स्तव हेतयः । तासामीशानो भगवः पराचीना मुखा कृधि ॥ ५३ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं॰
५

अ॒सं॒ख्या॒ता॒स॒ह॒स्रा॒णि॒ये रु॒द्रा अधि॒ भूम्या॑म्। तेषा॑ꣳ सहस्रयो

जने॒ऽव॒ध॒न्वा॒नि॒ त॒न्म॒सि ५४ अ॒स्मि॒न्म॒ह॒त्य॑र्ण॒वे॒ऽन्त॒रि॑क्षे भ

वा॒ अधि॑ तेषा॑ꣳ सहस्रयोज॒नेऽव॒ध॒न्वा॒नि॒ त॒न्म॒सि ५५

नी॒लग्री॑वाः शिति॒कण्ठा॒ दिव॑ꣳ रु॒द्रा उप॑श्रिताः तेषा॑ꣳ स॰

५६ नी॒लग्री॑वाः शिति॒कण्ठाः श॒र्वा अ॒धः क्ष॑माच॒राः

५

४२६

तेषा॰ ५७ ये वृ॒क्षेषु॑ श॒ष्पिञ्ज॑रा॒ नील॑ग्रीवा॒ विलो॑हिताः

तेषा॰ ५८ ये भू॒ताना॒मधि॑पतयो विशि॒खासः॑ कप॒र्दिनः॑

तेषा॰ ५९ ये प॒थां प॑थि॒रक्ष॑य॒ ऐलबृ॒दा आ॒युर्युधः॑ ते॰ ६॰

ये ती॒र्थानि॑ प्र॒चर॑न्ति सृ॒काह॑स्ता निष॒ङ्गिणः॑ तेषा॰ ६१

ये न्ने॑षु वि॒विध्य॑न्ति॒ पात्रे॑षु॒ पिब॑तो॒ जना॑न् तेषा॰ ६२ य

ल

४२७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं॰ ६५

एतावंतश्च भूयांसश्च दिशो रुद्रा वितस्थिरे तेषां॰ ६२
नमोस्तु रुद्रेभ्यो ये दिवि येषां वर्षमिषवः तेभ्यो दश प्राची
र्दश दक्षिणा दश प्रतीची र्दशोदीची र्दशोर्ध्वाः तेभ्यो नमो
अस्तु ते नो मृडयंतु ते नो ऽवंतु ते यं द्विष्मो यश्च नो द्वेष्टि तमे
षां जंभे दध्मः नमोस्तु रुद्रेभ्यो ये ऽन्तरिक्षे येषां वात इषवः ६५

तेभ्यो दश॰ तेभ्यो नमोस्त्वं॰ ते यं द्विष्मो॰ नमोस्तु रुद्रेभ्यो
ये पृथिव्यां येषामन्नमिषवः तेभ्यो दश॰ तेभ्यो नमो अस्तु॰
ते यं द्विष्मो॰ दध्मः ६७ ७ नमस्ते १६ नमो हिरण्यबाहवे ५
नमउष्णीषिणे ५ नमस्तक्षभ्यो ५ नमो ज्येष्ठाय ५ नमस्तु
स्राय नमः पार्याय १६ द्रापे अंधसः १८ अष्टमोनु॰ इति सप्त

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं० ६

दशोध्यायः कंडिकासंख्या ६४ ॥ ॐ अश्मन्नूर्ज्जं पर्वते शि
श्रियाणामद्भ्य ओषधीभ्यो वनस्पतिभ्यो अधि संभृतं पयः
तान्न इषमूर्ज्जं धत्त मरुतः संरराणा अश्मंस्ते क्षुन्मयि त
ऊर्ग्यं द्विष्मस्तं ते शुगृच्छतु १ इमा मे अग्न इष्टका धेनवः सं
त्वेका च दश च दश च शतं च शतं च सहस्रं च सहस्रं चा ६

युतं चायुतं च नियुतं च नियुतं च २ अर्बुदं च। न्यर्बुदं च समु
द्रश्च मध्यं चान्तश्च परार्द्धश्च एता मे अग्न इष्टका धेनवः
संत्वमुत्रामुष्मिंल्लोके ३ ऋतव स्थ ऋतावृध ऋतुष्ठा स्थ
ऋतावृधः घृतश्चुतो मधुश्चुतो विराजो नाम कामदुघा अ
क्षीयमाणाः ४ समुद्रस्य त्वावकयाग्ने परि व्ययामसि पा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥सं०॥
॥८॥

वको अस्मभ्यꣳ शिवोभव ५ हिमस्यत्वा जरायुणाग्ने परि
व्ययामसि पावको अस्मभ्यꣳ शिवोभव ६ उपज्मन्नुपवे
तसेवतर नदीष्वा अग्नेपित्तमपामसि मंडूकि ताभिरागहि
सेमन्नो यज्ञं पावकवर्णꣳ शिवंकृधि ७ अपामिदंन्ययन
ꣳ समुद्रस्यनिवेशनं अन्याꣳस्ते अस्मत्तपंतु हेतयः पावको

॥७॥

४१२

अस्मभ्यꣳ शिवोभव ८ अग्ने पावकरोचिषा मंद्रया देवजि
व्हया आदेवान्वक्षियक्षिच ९ सनः पावकदीदिवोग्ने देवाँ
इहावह उपयज्ञꣳ हविश्च नः १० पावकयायश्चितयंत्याकृ
पाक्षामन्रुरुचउषसोनभानुना तूर्वन्नयामन्नेतशस्यनू
रणआयोघृणेनततृषाणो अजरः ११ नमस्तेहरसेशो

४१३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ सं० ॥
॥ ९ ॥

४३४

न्विषेनमस्तेअस्तुविश्वेषे ॥ अन्यांस्तेअस्मत्तपंतुहेतयःपावको
अस्मभ्यंशिवोभव ॥ नृषदेवेळप्सुषदेवेड्बर्हिषदेवेड्वनसदे
वेड्स्वर्विदेवेट् १२ येदेवादेवानांयज्ञियायज्ञियानांसंवत्स
रीणमुपभागमासते ॥ अहुतादोहविषोयज्ञेअस्मिंस्वयंपि
बन्तुमधुनोघृतस्य १३ येदेवादेवेष्वधिदेवत्वमायन्ये ॥ ९ ॥

४३५

ब्रह्मणःपुरएतारोअस्य ॥ येभ्योनऋतेपवतेधामकिंचन
नतेदिवोनपृथिव्याअधिस्नुषु १४ प्राणदाअपानदाव्या
नदावर्चोदावरिवोदाः ॥ अन्यांस्तेअस्मत्तपंतुहेतयःपा
वकोअस्मभ्यंशिवोभव १५ प्रथमोनुवाकः ॥ अग्निस्ति
ग्मेनशोचिषायासद्विश्वंन्यत्रिणम् ॥ अग्निर्नोवनुतेरयिं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं० १०

म १६ य इमा विश्वा भुवनानि जुह्वदृषिर्होता न्यसीदत्पिता नः
स आशिषा द्रविणमिच्छमानः प्रथमच्छदवराँ३ आविवेश ॥ १७
किं स्विदासीदधिष्ठानमारंभणं कतमत्स्वित्कथासीत्
यतो भूमिं जनयन्विश्वकर्मा वि द्यामौर्णोन्महिना विश्वचक्षाः
१८ विश्वतश्चक्षुरुत विश्वतोमुखो विश्वतोबाहुरुत विश्व १०

तस्पात् । संबाहुभ्यां धमति संपतत्रैर्द्यावाभूमी जनयं देव ए
कः १९ किं स्विद्वनं क उ स वृक्ष आस यतो द्यावापृथिवी
निष्टतक्षुः मनीषिणो मनसा पृच्छतेदु तद्यदध्यतिष्ठद्भुव
नानि धारयन् २० या ते धामानि परमाणि यावमा या
मध्यमा विश्वकर्मन्नुतेमा शिक्षा सखिभ्यो हविषि स्वधा

सं० ११

वस्वयंयजस्वतन्वंवृधानः २१ वाचस्पतिंविश्वकर्मा
णमूतयेमनोजुवंवाजेअद्याहुवेम सनोविश्वानिहव
नानिजोषद्विश्वशंभूरवसेसाधुकर्मा २२ विश्वकर्म
न्हविषावावृधानःस्वयंयजस्वपृथिवीमुतद्याम् मुह्य
न्त्वन्येअभितःसपत्नाइहास्माकंमघवासूरिरस्तु २३ ॥११॥

विश्वकर्मन्हविषावर्द्धनेनत्रातारमिंद्रमकृणोरवध्यम्
तस्मैविशःसमनमंतपूर्वीरयमुग्रोविहव्योयथासत् २४
द्वितीयोनुवाकः चक्षुषःपितामनसाहिधीरोघृतमेनेअ
जनन्नम्नमाने यदेदंताअददृंहंतपूर्वआदिद्यावापृथिवी
अप्रथेताम् २५ विश्वकर्माविमनाआद्विहायाधातावि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं. १२

धातापरमोतसंदृक् तेषामिष्टानिसमिषामदंतियत्रा
सप्तऋषीन्परएकमाहुः २६ योनःपिताजनितायोवि
धाताधामानिवेदभुवनानिविश्वा योदेवानान्नामधा
एकएवतंसंप्रश्नंभुवनायंत्यन्या २७ तआयजंतद्र
विणंसमस्माऋषयःपूर्वेजरितारोनभूना असूर्ते

१२

४४०

सूर्तेरजसिनिषत्तेयेभूतानिसमकृण्वन्निमानि २८
परोदिवापरएनापृथिव्यापरोदेवेभिरसुरैर्यदस्ति कं
स्विद्गर्भंप्रथमंदध्रआपोयत्रदेवाःसमपश्यंतपूर्वे २९
तमिद्गर्भंप्रथमंदध्रआपोयत्रदेवाःसमगच्छंतविश्वे
अजस्यनाभावध्येकमर्पितंयस्मिन्विश्वानिभुवना

४४१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ सं० ॥
॥ ९३ ॥ नि

नस्थुः ॥ २०॥ ननं विदाथ य इमा जजानान्यद्युष्माकमंतरं ४४१
बभूव ॥ नीहारेण प्रावृता जल्प्या चासुतृप उक्थशास
श्चरंति ॥ २१॥ विश्वकर्मा ह्यजनिष्ट देव आदिद्गंधर्वो अभ
वद्द्वितीयः ॥ तृतीयः पिता जनितौषधीनामपां गर्भं व्यदधा
त्पुरुत्रा ॥ २२॥ तृतीयोनुवाकः ॥ आशुः शिशानो वृषभो

॥ ९३ ॥

४४२
न भीमो घनाघनः क्षोभणश्चर्षणीनाम् ॥ संक्रंदनोनि
मिष एकवीरः शतं सेना अजयत्साकमिंद्रः ॥ २३॥ संक्रं
दनेनानिमिषेण जिष्णुनायुत्कारेण दुश्च्यवनेन धृष्णु
ना ॥ तदिंद्रेण जयत तत्सहध्वं युधो नर इषुहस्तेन वृष्णा
॥ २४॥ स इषुहस्तैः स निषंगिभिर्वशी संस्रष्टा स युध

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स॰ ०
१४

इंद्रेण गणेन संसृष्टजित्सोमपाबाहुशर्ध्युग्रधन्वाप्रति
हिताभिरस्ता ३ बृहस्पते परिदीयारथेन रक्षोहामित्रां २ हा
अपबाधमानः प्रभंजन्सेनाः प्रमृणोयुधाजयन्नस्मा
कमेध्यविता रथानाम् ४ बलविज्ञायस्थविरः प्रवी
रः सहस्वान्वाजी सहमानउग्रः अभिवीरो अभिसत्वा १४

सहोजाजैत्रमिंद्ररथमातिष्ठगोवित् ५ गोत्रभिदंगो
विदं वज्रबाहुं जयंतमज्मप्रमृणंतमोजसा इमंसजा
ताअनुवीरयध्वमिंद्रं सखायोअनुसंरभध्वम् ६
अभिगोत्राणि सहसागाहमानोदयोवीरः शतमन्युरिं
द्रः दुश्च्यवनः पृतनाषाळयुध्योस्माकंसेनाअवतुप्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं०॥
॥१५॥

युत्सु ॥ ३९ ॥ इंद्र आसां नेता बृहस्पतिर्दक्षिणा यज्ञः पुर एतु सो
मः देवसेनानामभिभंजतीनां जयंतीनां मरुतो यंत्वग्रम्
॥ ४० ॥ इंद्रस्य वृष्णो वरुणस्य राज्ञ आदित्यानां मरुतां शर्ध
उग्रम् महामनसां भुवनच्यवानां घोषो देवानां जयता
मुदस्थात् ॥ ४१ ॥ उद्धर्षय मघव न्नायुधान्युत्सत्वनां माम

४२६ ॥५१५॥

४२७

कानां मनांसि उद्वृत्रहन्वाजिनां वाजिनान्युद्रथा
नां जयतां यंतु घोषाः ॥ ४२ ॥ अस्माकमिंद्रः समृतेषु
ध्वजेष्वस्माकं या इषवस्ता जयंतु अस्माकं वीरा उत्तरे
भवंत्वस्मां उ देवा अवता हवेषु ॥ ४३ ॥ अमीषां चित्तं।
प्रतिलोभयंती गृहाणांगान्यप्वे परेहि अभि प्रेहि निर्द

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं०
१६

ह हृत्सु द्वेषैरंधेनामित्रास्तमसासचंताम् ॥ ४४ ॥ अवसृ
ष्टापरापतशरव्ये ब्रह्मसंशिते गच्छामित्रान्प्रपद्यस्वमा
मीषां कंचनोच्छिषः ॥ ४५ ॥ प्रेताजयतानरइंद्रोवः शर्मयच्छ
तु उग्रावः संतुबाहवोनाधृष्यायथासथ ॥ ४६ ॥ असौ
यासेनामरुतः परेषामभ्येतिनओजसास्पर्धमाना तां १६

गूहततमसापव्रतेनयथामीअन्योअन्यंनजानन्
॥ ४७ ॥ यत्रबाणाः संपतंतिकुमाराविशिखाइव तन्न
इंद्रोबृहस्पतिरदितिः शर्मयच्छतुविश्वाहाशर्मयच्छतु ॥ ४८ ॥
मर्माणितेवर्मणाछादयामिसोमस्त्वाराजामृतेनानुव
स्ताम् उरोर्वरीयोवरुणस्तेकृणोतुजयंतंत्वानुदेवामदं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं० ॥ १७ ॥

४५०

तु ॥ ४९ ॥ चतुर्थोनुवाकः ॥ उदेनमुत्तरान्नयाग्ने घृतेना
हुत ॥ रायस्पोषेण सं सृज प्रजया च बहुं कृधि ॥ ५० ॥
सजाता इन्द्रेमं प्रतरान्नय [illegible] नामसद्वशी ॥ समेनं वर्चसा सृ
ज देवानां भागदा असत ॥ ५१ ॥ यस्येन्दुमौ गृहे हविस्तम
ग्ने वर्द्धया त्वम् ॥ तस्मै देवा अधि ब्रवन्नयं च ब्रह्मणस्पतिः ॥ ५२ ॥

॥ १७ ॥

४५१

उदु त्वा विश्वेदेवा अग्ने भरन्तु चित्तिभिः ॥ स नो भव शिवस्त्वं
सुप्रतीको विभावसुः ॥ ५३ ॥ पञ्च दिशो दैवीर्यज्ञमवन्तु देवी
रपामतिं दुर्मतिं बाधमानाः ॥ रायस्पोषे यज्ञपतिमाभजन्
ती रायस्पोषे अधि यज्ञो अस्थात् ॥ ५४ ॥ समिद्धे अग्ना
अधि मामहान उक्थपत्र ईड्यो गृभीतः ॥ तप्तं घर्मं परिगृ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं०
१८

साध्यंतोऽऊर्ध्वायपुज्ञमयजंतदेवाः ५५ देव्यायधर्त्रे।
जोष्ट्रेदेवश्री ः श्रीमनाः शतपयाः परिगृह्यदेवायज्ञमा
यंदेवादेवेभ्योऽग्रध्वर्यंतोऽअस्थुः ५६ वीतᳲहविः शमित
शमितायजध्यैतुरीयोयज्ञोयत्रहव्यमेति ततोवाकाऽआशि
षोनोजुषंताम् ५७ सूर्यरश्मिर्हरिकेशः पुरस्तात्सविता

४५२

१८

४५२

ज्योतिरुदयां३ऽअजस्रम् तस्यपूषाप्रसवेयाति विद्वा
संपश्यन्विश्वाभुवनानिगोपाः ५८ विमानएषदिवो
मध्यआस्तआपप्रिवान्रोदसीऽअंतरिक्षं सविश्वाचीर
भिचष्टेघृताचीरंतरापूर्वमपरंचकेतुम् ५९ उक्षासमु
द्रोऽअरुणः सुपर्णः पूर्वस्ययोनिंपितुराविवेश मध्येदि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

योनिहितः दम्भिर स्नमा निचक्रमेरजसस्यायंतौ ६० इन्द्रंवि
श्वा॥ अवीवृधन्त्समुद्रव्यचसंगिरः रथीतमँ रथीनांवाजा
नाँ सत्पतिंपतिम् ६१ देवहूर्यज्ञ ऽ आचवक्षत्सुम्नहूर्यज्ञ
ऽ आचवक्षत् यक्षदग्नि र्देवोदेवाँ ऽ आचवक्षत् ६२
वाजस्यमा प्रसवउद्ग्राभेणोदग्रभीत् अधासपत्नानिंद्रो

मेनिग्राभेणाधराँ ऽ अकः ६३ उद्ग्राभंचनिग्राभंचब्रह्मदे
वा ऽ अवीवृधन् अधासपत्नानिंद्राग्नी मेविषूचीनान्व्य
स्यताम् ६४ पंचमोनुवाकः क्रमध्वमग्निना नाकमुख्य
ँ हस्तेषुबिभ्रतः दिवस्पृष्ठँ स्वर्गत्वादेवेभिराध्वम् १ प्रा मिश्रा
चीमनुप्रदिशंप्रेहि विद्वानग्नेरग्नेपुरोअग्निर्भवेह विश्वा

ष्ठ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥सं॰॥
॥२०॥ आक्रान्दीधानोविभाह्यूर्ज्जन्नोधेहिद्विपदेचतुष्पदे २ ४५६
पृथिव्याःअहमुदंतरिक्षमारुहमंतरिक्षाद्दिवमारुहम्
दिवोनाकस्यपृष्ठात्स्वर्ज्योतिरगामहम् ३ स्वर्यंतोना
त पेक्षंतआद्यांरोहंतिरोदसी यज्ञंयेविश्वतोधारंसुवि
द्वांसोवितेनिरे ४ अग्नेप्रेहिप्रथमोदेवयतांचक्षु
॥२०॥

४५७
देवानामुतमर्त्यानाम् इयक्षमाणाभृगुभिःसजोषाः
स्वर्यंतुयजमानास्वस्ति ५ नक्तोषासासमनसाविरूपे
धापयेतेशिशुमेकंसमीची द्यावाक्षामारुक्मोअंत
र्विभातिदेवाअग्निंधारयंद्रविणोदाः ६ अग्नेसह
स्राक्षशतमूर्द्धंछतंतेप्राणाःसहस्रंव्यानाः त्वंसाहस्र

॥सं०॥
॥२१॥

स्यरायईर्षिषेतस्मैतेविधेमवाजायस्वाहा ॥ ७ ॥ सुपर्णोसि
गरुत्मान्पृष्ठेपृथिव्याःसीद भासांतरिक्षमापृण ज्योति
षादिवमुत्तभानतेजसादिशउद्दृंह ॥ ८ ॥ आजुह्वानःसुप्र
तीकःपुरस्तादग्नेस्वांयोनिमासीदसाधुया ॥ अस्मिन्स
धस्थेअध्युत्तरस्मिन्विश्वेदेवायजमानश्चसीदत ॥ ९ ॥

॥२१॥

४५८

ताᳬंसवितुर्वरेण्यस्यचित्रामाहंवृणेसुमतिंविश्वज
न्याम् ॥ यामस्यकण्वोअदुहत्प्रपीनाᳬंसहस्रधारांपय
सामहींगाम् ॥ १० ॥ विधेमते।परमेजन्मन्नग्नेविधेमस्तो
मैरवरेसधस्थे ॥ यस्माद्योनेरुदारिथायजेतंप्रत्वेह
वीᳬंषिजुहुरेसमिद्धे ॥ ११ ॥ प्रेद्धोअग्नेदीदिहिपुरोनोजस्रया

ज

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सुम्नायविश्व। स्वाहाऽश्वंतउपयंतिवाजाः॥ १२ अग्नेत।
मद्याश्वन्नस्तोमैः क्रतुन्नभद्रंहृदिस्पृशम्। ऋध्यामात
ओहैः॥ १३ चित्तिंजुहोमिमनसाघृतेनयथादेवाइहागम
न्वीतिहोत्राऋतावृधः पत्येविश्वस्यभूमनोजुहोमिवि
श्वकर्मणेविश्वाहादाभ्यंहविः॥ १४॥ सप्तते।अग्नेस

मिधःसप्तजिह्वाःसप्तऋषयःसप्तधामप्रियाणि॥ सप्त
होत्राःसप्तधात्वायजंतिसप्तयोनीरापृणस्वघृतेन
स्वाहा॥ १५ [illegible]॥ शुक्रज्योतिश्चचित्रज्योतिश्च
सत्यज्योतिश्चज्योतिष्मांश्च शुक्रश्चऋतपाश्चात्यंहाः
॥१॥ ईदृङ्चान्यादृङ्चसदृङ्चप्रतिसदृङ्च॥ मितश्चसम्मि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥सं०॥
॥२३॥

लश्च सभरा: ॥ २ ॥ ऋतजिच्च । सत्यजिच्च सेनजिच्च सुषे
णश्च अंतिमित्रश्च दूरेअमित्रश्च गण: ३ ऋतश्च स
त्यश्च ध्रुवश्च धरुणश्च धर्त्ताच विधर्त्ताच विधारय:
४ ईदृक्षास एतादृक्षास ऊषुण: सदृक्षास: प्रतिसदृ
क्षास एतन । मितासश्च संमितासो नो अद्य सभ ॥२३॥

रसो मरुतो यज्ञे अस्मिन् ५ स्वतवांश्च प्रघासीच सांत
पनश्च गृहमेधीच ॥ क्रीडीच शाकीचोज्जेषी ६ इंद्रं दैवी
र्विशो मरुतोनुवर्त्मानो भवन्यथेंद्रं दैवीर्विशो मरुतोनुवर्त्मा
नो भवन् ॥ एवमिमं यजमानं दैवीश्च विशो मानुषीश्चानुव
र्त्मानो भवंतु: ॥ ७ ॥ ७ ॥ सप्तमोनुवाक: ॥ ७ ॥ ॥ ७ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ सं. ॥
॥ २५ ॥

यद्दंसं नर्जम् ॥ १५ ॥ अग्निस्तिग्मेन ॥ ९ ॥ चक्षुषः पिता ॥ ९ ॥
आयुः द्विद्वान ॥ १७ ॥ उदेनं ॥ १५ ॥ समध्वमग्निना ॥ १५ ॥
शुक्रज्योतिश्च ॥ ७ ॥ अष्टादशोध्यायः ॥ ॐम् ॥ इमं स्तन
मूर्जस्वंतं धयापां प्रपीनमग्ने सरिरस्य मध्ये ॥ उत्संजुषस्व
मधुमंतमर्वन्त्समुद्रियं सदनमाविशस्व ॥ १ ॥ घृतं मिमि

॥ २६५ ॥

ष

क्षे घृतमस्य योनिर्घृते श्रितो घृतम्वस्य धाम ॥ अनुष्वध
मावह मादयस्व स्वाहाकृतं वृषभ वक्षि हव्यम् ॥ २ ॥ समुद्रादू
र्मिर्मधुमां उदारदुपांशुना सममृतत्वमानट् ॥ घृतस्य
नाम गुह्यं यदस्ति जिह्वा देवानाममृतस्य नाभिः ॥ ३ ॥ वयं
नाम प्रब्रवामा घृतस्यास्मिन्यज्ञे धारयामा नमोभिः ॥ ४ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ सं. ॥
॥ २५ ॥
शृणवच्छस्यमानं चतुःशृंगोवमीद्गौर एतत् ॥ २ ॥ चत्वा
रि शृंगा त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य । त्रिधा
बद्धो वृषभो रोरवीति महो देवो मर्त्याँ आविवेश ॥ ३ ॥ त्रिधा हि
तं । पणिभिर्गुह्यमानं गवि देवासो घृतमन्वविंदन् । इंद्र एकं
सूर्य एकं जजान वेनादेकं स्वधया निष्टतक्षुः ॥ ४ ॥ ए
॥ २५ ॥

ता अर्षंति हृद्यात्समुद्राच्छतव्रजा रिपुणा नावचक्षे । घृत
स्य धारा अभिचाकशीमि हिरण्ययो वेतसो मध्य आसां ।
त सम्यक्स्रवंति सरितो न धेना अंतर्हृदा मनसा पूयमानाः ॥
एते अर्षंत्यूर्मयो घृतस्य मृगा इव क्षिपणोरीषमाणाः ॥ ६ त
सिंधोरिव प्राध्वने शूघनासो वातप्रमियः पतयंति यह्वाः ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं०
२६

घृतस्यधारा। अरुषोनवाजीकाष्ठाभिंदन्नूर्मिभिः पि
न्वमानः ८ अभिप्रवंतसमनेवयोषाः कल्याण्यः स्म
यमानासो अग्निम्। घृतस्यधारास्समिधोनसंतता
जुषाणोहर्यतिजातवेदाः ९ कन्याइववहतुमेतवा
उ अंज्यंजाना अभिचाकशीमि। यत्रसोमः सूयतेयत्र

२६

यज्ञोघृतस्यधारा अभितत्पवंते १० अभ्यर्षतसुष्टुतिं
गव्यमाजिमस्मासुभद्राद्रविणानिधत्त। इमंयज्ञंनय
तदेवतानोघृतस्यधारामधुमत्पवंते ११ धामंतेविश्वं
भुवनमधिश्रितमंतः समुद्रेहृद्यंतरायुषि। अपामनी
केसमिथेयआभृतस्तमश्याममधुमंतंतऊर्मिम्।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रु. २८

१२ अथमोनुवाकः वाजश्चमे प्रसवश्चमे प्रयति
श्चमे प्रसितिश्चमे धीतिश्चमे क्रतुश्चमे स्वरश्चमे
श्लोकश्चमे श्रावश्चमे श्रुतिश्चमे ज्योतिश्चमे सुवश्चमे यज्ञे
न कल्पन्ताम् १ प्राणश्चमेपानश्चमेव्यानश्चमे
चित्तंचमआधीतंचमे वाक्चमेमनश्चमे चक्षुश्चमे

स्वश्चमे
श्चमे

॥२८॥

४६०

श्रोत्रंचमेदक्षश्चमेबलंचमेयज्ञेनकल्पन्ताम् २
ओजश्चमेसहश्चमआत्माचमेतनूश्चमे शर्मचमे
वर्मचमेऽङ्गानिचमेऽस्थीनिचमे परूंषिचमेशरी
राणिचमआयुश्चमेजराचमेयज्ञेनकल्पन्ताम् ३
ज्यैष्ठ्यंचमआधिपत्यंचमेमन्युश्चमेभामश्चमे अ

४६१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स॰
२९

म

मश्चमे भश्चमेजेमाचमेमहिमाचमेवरिमाचमेप्रथि
माचमेवर्षिमाचमेद्राघिमाचमे वृद्धंचमेवृद्धिश्चमेय॰
ह्राच्चे ॥१॥ द्वितीयोनु॰ सत्यंचमेश्रद्धाचमेजगच्चमेधनंचमे
विश्वंचमेमहश्चमेक्रीडाचमेमोदश्चमे जातंचमेज
निष्यमाणंचमेसूक्तंचमेसुकृतंचमेयज्ञे॰ ॥१॥ वित्तं

२९

चमेवेद्यंचमेभूतंचमेभविष्यच्चमे सुगंचमेसुपथ्यंच
मऋद्धंचमऋद्धिश्चमे क्लृप्तंचमेक्लृप्तिश्चमेमतिश्च
मेसुमतिश्चमेय॰ ॥२॥ यंताचमेधर्त्ताचमेक्षेमश्चमेधृति
श्चमे विश्वंचमेमहश्चमेसंविच्चमेज्ञात्रंचमे सीरंचमेल च
यश्चमेसश्चमेप्रसूश्चमेयज्ञे॰ ॥३॥ शंचमेमयश्चमेप्रि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यंच मे नु कामश्च मे कामश्च मे सौमनसश्च मे भगश्च मे द्र
विणं च मे भद्रं च मे श्रेयश्च मे वसीयश्च मे यशश्च मे
यज्ञे० २ तृतीयोनुवाकः ऊर्क्च मे सूनृता च मे पय
श्च मे रसश्च मे घृतं च मे मधु च मे सग्धिश्च मे सपीति
श्च मे कृषिश्च मे वृष्टिश्च मे जैत्रं च मे औद्भिद्यं च मे

यज्ञे० २१ ऋतं च मे मृतं च मे यक्ष्मं च मे नामयच्च मे जी
वातुश्च मे दीर्घायुत्वं च मे नमित्रं च मे भयं च मे सुगं च मे श
यनं च मे सूषा च मे सुदिनं च मे य० २२ रयिश्च मे रायश्च
मे पुष्टं च मे पुष्टिश्च मे विभु च मे प्रभु च मे पूर्णं च
मे पूर्णतरं च मे कुयवं च मे क्षितं च मे न्नं च मे क्षुच्च मे य० २३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं. २०

व्रीहयश्च मे यवाश्च मे माषाश्च मे तिलाश्च मे मुद्गाश्च मे ख
ल्वाश्च मे प्रियंगवश्च मेऽणवश्च मे श्यामाकाश्च मे नीवारा
श्च मे गोधूमाश्च मे मसूराश्च मे यज्ञेन कल्पन्ताम् ॥ २४
चतुर्थेऽनुवाकः ॥ अश्मा च मे मृत्तिका च मे गिरयश्च मे पर्व
ताश्च मे सिकताश्च मे वनस्पतयश्च मे हिरण्यं च मेऽयश्च

३.

मे सीसं च मे त्रपु च मे श्यामं च मे लोहं च मे ॥ २५ अग्नि
श्च मे आपश्च मे वीरुधश्च म ओषधयश्च मे कृष्टपच्याश्च
मेऽकृष्टपच्याश्च मे ग्राम्याश्च मे पशव आरण्याश्च मे वि
त्तं च मे वित्तिश्च मे भूतं च मे भूतिश्च मे यज्ञे ॥ २६ वसु च मे
वसतिश्च मे कर्म च मे शक्तिश्च मेऽर्थश्च मे यामहस्या च

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं·
२१

मेगतिश्चमे [illegible] यज्ञे· २७ पंचमोनुवाकः अग्निश्च
श्चमइंद्रश्चमे सोमश्चमइंद्रश्चमे सविताचमइंद्रश्च
मेसरस्वतीचमइंद्रश्चमे पूषाचमइंद्रश्चमेबृहस्पतिश्च
मइंद्रश्चमेय· २८ मित्रश्चमइंद्रश्चमेवरुणश्चमइं
द्रश्चमे धाताचमइंद्रश्चमे त्वष्टाचमइंद्रश्चमे मरुत २१
श्च·

श्चमइंद्रश्चमे [illegible] विश्वेच्चमेदेवाइंद्रश्चमे
य· २९ पृथिवीचमइंद्रश्चमेंतरिक्षंचमइंद्रश्चमे द्यौश्च
मइंद्रश्चमेसमाश्चमइंद्रश्चमे नक्षत्राणिचमइंद्रश्चमे
दिशश्चमइंद्रश्चमे यज्ञे· ३० षष्ठोनुवाकः अंशुश्च
मेरश्मिश्चमेदाभ्यश्चमेधिपतिश्चमे उपांशुश्चमेंत

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं० ॥
॥३२॥

४८०

र्यामश्च म ऐंद्रवायवश्च मे मैत्रावरुणश्च मे आश्विनश्च
मे प्रतिप्रस्थानश्च मे शुक्रश्च मे मंथीच मे यज्ञे · २१ आ
ग्रयणश्च मे वैश्वदेवश्च मे ध्रुवश्च मे वैश्वानरश्च म ऐंद्रा
ग्नश्च मे महावैश्वदेवश्च मे मरुत्वतीयाश्च मे निष्केवल्यश्च
मे सावित्रश्च मे सारस्वतश्च मे पात्नीवतश्च मे हारियो २

॥३२५

४८१

जनश्च मे यज्ञेन · २२ स्रुचश्च मे चमसाश्च मे वायव्या
नि च मे द्रोणकलशश्च मे ग्रावाणश्च मेऽधिषवणे च
मे पूतभृच्च म आधवनीयश्च मे वेदिश्च मे बर्हिश्च मे स्व
गाकारश्च मेऽवभृथश्च मे यज्ञे · २३ अग्निश्च मे घर्म
श्च मेऽर्कश्च मे सूर्यश्च मे प्राणश्च मेऽश्वमेधश्च मे पृथिवी

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रुं॰
३३

चमेदितिश्चमे दितिश्चमेघोश्चमेंगुलयः शक्वरयोदिशा
श्चमेयज्ञे॰ २४ व्रतंचमऋतवश्चमेसंवत्सरश्चमेतप
श्चमे अहोरात्रेउर्वष्ठीबृहद्रथंतरंचमेयज्ञे॰ २५
सप्तमोनुवाकः एकाचमेतिस्रश्चमेतिस्रश्चमेपंचचमे
हात्मा यज्ञेन कल्पताᳫं स्वाहा पृष्ठं यज्ञेन कल्पताᳫं
स्वाहा ॥ ब्रह्म यज्ञेन कल्पताᳫं स्वाहा यज्ञो यज्ञेन क
ल्पताᳫं स्वाहा ज्योतिर्यज्ञेन कल्पताᳫं स्वाहा स्व ७२

र्यज्ञेन कल्पताᳫं स्वाहा ॥ ४५ ॥ एकस्मै स्वाहा द्वाभ्या
ᳫं स्वाहा शताय स्वाहैकशताय स्वाहा व्युष्ट्यै स्वा
हा स्वर्गाय स्वाहा ॥ ४६ ॥ ७ ॥ एकविंशत्यनुवाकेषु
षट्चत्वारिᳫंशत् ॥ इति शुक्लयजुर्वेदसंहितायां च
तुर्विंशतिमोध्यायः ॥ ७ ॥ ७ ॥ हरिः ॐ ॥ ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं. ७३

हिरण्यगर्भः समवर्त्तताग्रे भूतस्य जातः पतिरेक आ
सीत् स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा
विधेम ॥ १ ॥ उपयामगृहीतोसि प्रजापतये त्वा जुष्टं
गृह्णाम्येष ते योनिः सूर्यस्ते महिमा ॥ यस्तेह
न्संवत्सरे महिमा संबभूव यस्ते वायावन्तरिक्षे महिमा ७३

संबभूव ॥ यस्ते दिवि सूर्ये महिमा संबभूव तस्मै ते म
हिम्ने प्रजापतये स्वाहा देवेभ्यः ॥ २ ॥ यः प्राणतो निमि
षतो महित्वैक इद्राजा जगतो बभूव ॥ य ईशे अस्य
द्विपदश्चतुष्पदः कस्मै देवाय हविषा विधेम ॥ ३ ॥
उपयामगृहीतोसि प्रजापतये त्वा जुष्टं गृह्णाम्येष

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं॰ १ ॥ २३५ ॥

ते यो निश्चंद्रमास्ते महिमा ॥ यस्ते रात्रौ संवत्सरे महि
मा संबभूव यस्ते पृथिव्यामग्नौ महिमा संबभूव
यस्ते नक्षत्रेषु चंद्रमसि महिमा संबभूव तस्मै ते म
हिम्ने प्रजापतये देवेभ्यः स्वाहा ॥ ५ ॥ युंजंति ब्रध्न
मरुषं चरंतं परितस्थुषः ॥ रोचंते रोचना दिवि ॥ २३५ ॥

युंजंत्यस्य काम्या हरी विपक्षसा रथे ॥ शोणा धृष्णू नृवा
हसा ॥ ६ ॥ यद्वातो अपो अगनीगन्प्रियामिंद्रस्य तन्व
म् ॥ एतं स्तोतरनेन पथा पुनरश्वमावर्त्तयासि नः
॥ ७ ॥ वसवस्त्वांजंतु गायत्रेण छंदसा रुद्रास्त्वांजंतु
त्रैष्टुभेन छंदसा ॥ आदित्यास्त्वांजंतु जागतेन छंद

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं· ८५

सा ८ भूर्भुवः स्वर्लाजी३ञ्छाची३न्यव्ये गव्ये एत
दन्नमत्त देवा एतदन्नमद्धि प्रजापते ९ कः स्वि
देकाकी चरति क उ स्विज्जायते पुनः किꣳ स्विद्धि
मस्य भेषजं किम्वावपनं महत् १० सूर्य एकाकी
चरति चंद्रमा जायते पुनः अग्निर्हिमस्य भेषजं ८५

भूमिरावपनं महत् ११ कास्विदासीत्पूर्वचित्तिः कि
ꣳ स्विदासीद्बृहद्वयः कास्विदासीत्पिलिप्पिला का
स्विदासीत्पिशंगिला १२ द्यौरासीत्पूर्वचित्तिर
श्व आसीद्बृहद्वयः अविरासीत्पिलिप्पिला रा
त्रिरासीत्पिशंगिला १३ वायुष्ट्वा पचतैरवत्वसि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं॰ ७६ तग्रीवश्छागैः न्यग्रोधश्चमसैः शाल्मलिर्वृद्ध्या ॥ १४ ॥
एषस्यराथ्योवृषापड्भिश्चतुर्भिरेदगन् ब्रह्माकृ
ष्णश्चनोवतु नमोग्नये ॥ १५ ॥ संशितोरश्मिनार
थः संशितोरश्मिनाहयः संशितोअप्स्वप्सुजा
ब्रह्मासोमपुरोगवः ॥ १६ ॥ स्वयंवाजिंस्तन्वंकल्प ७६

६६०

६६१

यस्वस्वयंयजस्वस्वयंजुषस्व महिमातेन्येननस
न्नशे ॥ १७ ॥ नवाउएतन्म्रियसेनरिष्यसिदेवाँइदे
षिपथिभिः सुगेभिः यत्रासतेसुकृतोयत्रतेययु
स्तत्रत्वादेवःसविताद्दधातु ॥ १८ ॥ अग्निःपशुरासी
त्तेनायजन्तसएतंलोकमजयद्यस्मिन्नग्निः स

सं॰ ७८

ते लोको भविष्यति तंजेष्यसि पिबेता अपः ॥ वायुः प
शू रासीत्तेनायजंत स एतंल्लोकमजयद्यस्मिन्वायुः
स ते लोको भविष्यति तंजेष्यसि पिबेता अपः ॥ सूर्यः
पशू रासीत्तेनायजंत स एतंल्लोकमजयद्यस्मिन्सू
र्यः ॥ स ते लोको ० १९ प्राणाय स्वाहा पानाय स्वाहा ७८

व्यानाय स्वाहा ॥ अंबे अंबिके अंबालिके न मा नयति
कश्चन ॥ ससस्त्यश्वकः सुभद्रिकां कांपीलवासिनीं
॥ २० ॥ गणानां त्वा गणपतिं हवामहे प्रियाणां त्वा
प्रियपतिं हवामहे निधीनां त्वा निधिपतिं हवा
महे ॥ सोमम ॥ २१ ॥ आहमजानि गर्भधमा त्वमजा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं
स॰ ८
२

सिगर्भधं ताउभौच्चतुरः पदः संप्रसारयाव स्वर्गेलो
केप्रोण्वोथांव्रषावाजीरेता धारेतोदधातु ॥ २२ ॥ उ
सेवक्ष्याश्रवणुर्द्धेहिसमं जिंचारस्यावृषन्॥ यः
स्त्रीणांजीवभोजनः ॥ २३ ॥ यकासकैाज्ञ कुंतिका
हलगितिवंचति ॥ आहंतिगभेपसोनिगल्गालीति ॥ ८ ॥

६६४

धारका ॥ २४ ॥ यकोसकोशकं तकच्याहलगितिवंच
ति ॥ विवक्षतइवतमुखमध्वयोमानस्वमभिभाष
था ॥ २५ ॥ मातास्चतेपिताचतेग्रवृक्षस्परोहतः ॥
प्रतिला मातितिपिताऽगभेमुष्टिमततंसयत ॥ २६ ॥
माताश्चतेपिताचतेग्रवृक्षस्यक्रीडतः ॥ विवक्ष

६६५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं॰
७९

नरा इवतेमुखंब्रस्तनमात्सं वदोबतु ॥ २७ ॥ उर्ध्वामेना
मुच्छ्रापयगिरोभारं हरन्निव अथास्यैमध्यमेध
तां शीतेवातेपुनंनिव ॥ २८ ॥ उर्ध्वमेनमुच्छ्रयताद्गि
रोभारं हरन्निव अथास्यमध्यमेजतुशीतेवा
तेपुनंनिव ॥ २९ ॥ यदस्या अंहुभेद्याः कृधुस्थू
७९

लमुपातसत् ॥ मुष्काविदस्या एजतोगोशफेशकु
लाइव ॥ ३० ॥ यद्देवासोललामगुंप्रविष्टीमिनमावि
षुः ॥ सक्थ्नादेदिश्यतेनारीसत्यस्याक्षिभुवोयथा
॥ ३१ ॥ यद्धरिणोयवमत्तिनपुष्टंपशुमन्यते ॥ शू
द्रा यदर्यजारानपोषायधनायति ॥ ३२ ॥ यद्धरि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

घोयवमन्तिनपुंश्वनुमन्यते ॥ शूद्रोयदर्यायैजा
रोनपोषमनुमन्यते ॥ ३३ ॥ दधिक्राव्णो अकारिषं
जिष्णोरश्वस्य वाजिनः ॥ सुरभिनोमुखाकरत्प्रण
आयूंषितारिषत् ॥ ३४ ॥ गायत्रीत्रिष्टुब्जगत्य
नुष्टुप्पंक्त्यासह ॥ बृहत्युष्णिहाककुप्सूचीभिः शं

म्यंतुत्वा ॥ ३५ ॥ द्विपदायाश्चतुष्पदास्त्रिपदायाश्च
षट्पदाः ॥ विछंदायाश्चसछंदाःसूचीभिः शम्यंतुत्वा
॥ ३६ ॥ महानाम्न्योरेवत्यो विश्वाआशाःप्रभूवरीः
मेघीर्विद्युतोवाचःसूचीभिः शम्यंतुत्वा ॥ ३७ ॥ नार्य
स्तपत्न्योलोमविचिन्वंतुमनीषया ॥ देवानांपत्न्या

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं० ॥

॥ ८१ ॥ दिशः सूचीभिः शम्यंतुत्वा ॥ २७ ॥ रजता हरिणीः सी
सा युजो युज्यंते कर्मभिः ॥ अश्वस्य वाजिनस्त्वचि
सिमाः शम्यंतु शम्यंतीः ॥ ३८ ॥ कुविदंग यवमंतो यवं
चिद्यथा दांत्यनुपूर्वं वियूय । इहेहैषां कृणुहि भोज
नानि ये बर्हिषो नमउक्तिं न जग्मुः ॥ ३९ ॥ कस्त्वाछ्य

८१

ति कस्त्वा विशास्ति कस्ते गात्राणि शम्यति । क उ ते श
मिता कविः ॥ ४० ॥ ऋतवस्त ऋतुथा पर्व शमिता
रो विशासतु । संवत्सरस्य तेजसा शमीभिः शम्यं
तु त्वा ॥ ४१ ॥ अर्द्धमासाः परूंषि ते मासा आछ्यं
तु शम्यंतः । अहोरात्राणि मरुतो विलिष्टं स

सं·

८२ दयंतुते ४२ देव्या अध्वर्यवस्त्वाछ्यंतु वि च शासतु
गात्राणि पर्वशस्ते सिमाः कृण्वंतु शम्यंतीः ४४
द्यौस्ते पृथिव्यंतरिक्षं वायुश्छिद्रं पृणातु ते सूर्यस्ते
नक्षत्रैः सह लोकं कृणोतु साधुया ४५ शं ते परेभ्यो
गात्रेभ्यः शमस्त्ववरेभ्यः शमस्थभ्यो मज्जभ्यः श
८२

म्वस्त्वुत तन्वे तव ४६ कः स्विदेकाकी० ४७ स
र्य एकाकी० ४८ किं स्वित्सूर्यसमं ज्योतिः किं
समुद्रसमं सरः किं स्वित्पृथिव्यै वर्षीयः क
स्य मात्रा न विद्यते ४९ ब्रह्म सूर्यसमं ज्योतिर्द्यौः
समुद्रसमं सरः इंद्रः पृथिव्यै वर्षीयान्गोस्तु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं. ८३

मात्रानविद्यते ५० पृच्छामित्वाचितयेदेवसख
यदित्वमत्रमनसाजगंथ येषुविष्णुस्त्रिषुपदे
ष्वेष्टस्तेषुविश्वंभुवनमाविवेशा ५१ अपितेषु
त्रिषुपदेष्वस्मियेषुविश्वंभुवनमाविवेश सद्यः
पर्येमिपृथिवीमुतद्यामेकेनांगेनदिवोअस्य ८३

पृष्ठम् ५२ केष्वंतःपुरुषआविवेशकान्यंतःपु
रुषेअर्पितानि एतद्ब्रह्मन्नुपवल्हामसित्वाकिं
स्विन्नःप्रतिवोचास्यत्र ५३ पंचस्वंतःपुरुष
आविवेशतान्यंतःपुरुषेअर्पितानि एतत्त्वात्र
प्रतिमन्वानोअस्मिनमाययाभवस्युत्तरोमत् ५४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥सं०॥
॥९७॥ कास्विदासीत् ॰ इंगिला ॥५५॥ घोरासीत् ॰ ॥५६॥
काईमरेपिशंगिला काईंकुरुपिशंगिला कईमा
स्कंदमर्षति कईं पंथां विसर्पसि ॥५७॥ अजारेपिशं
गिला श्वावित्कुरुपिशंगिला शशआस्कंदमर्ष
त्यहिः पंथां विसर्पसि ॥५८॥ कत्यस्य विष्ठाः कत्य ॥९७॥

क्षराणि कति होमासः कतिधा समिद्धः यज्ञस्य त्वा
विदथा पृच्छ मत्र कति होतार ऋतुशो यजंति ॥५९॥
षडस्य विष्ठाः शतमक्षराण्यशीतिर्होमाः समिधो
ह तिस्रः यज्ञस्य ते विदथा प्र ब्रवीमि सप्त होता
र ऋतुशो यजंति ॥६०॥ को अस्य वेद भुवनस्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नाभिं को द्यावापृथिवी अंतरिक्षम् । कः सूर्यस्य वेद
बृहतो जनित्रं को वेद चंद्रमसं यतोजाः ॥ ६१ ॥ वेदा
हमस्य भुवनस्य नाभिं वेद द्यावापृथिवी अंतरिक्षं
वेद सूर्यस्य बृहतो जनित्रमथो वेद चंद्रमसं यतो
जाः ॥ ६२ ॥ पृच्छामि त्वा परमंतं पृथिव्याः पृच्छामि य

त्र भुवनस्य नाभिः । पृच्छामि त्वा वृष्णो अश्वस्य रेतः
पृच्छामि वाचः परमं व्योम ॥ ६३ ॥ इयं वेदिः परो अंतः
पृथिव्या अयं यज्ञो भुवनस्य नाभिः । अयꣳ सोमो
वृष्णो अश्वस्य रेतो ब्रह्मायं वाचः परमं व्योम ॥ ६४ ॥
सुभूः स्वयंभूः प्रथमोंतर्महत्यर्णवे दधे ह गर्भम्

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं- ८६ त्वियंयतोजातः प्रजापतिः ६५ होतायक्षत्प्रजाप
तिꣳसोमस्यमहिम्नः जुषतांपिबतुसोमꣳहोतर्य
ज ६६ प्रजापतेनत्वदेतान्यन्योविश्वारूपाणिप
रिताबभूव यत्कामास्तेजुहुमस्तन्नोअस्तुवयꣳ
स्यामपतयोरयीणाम् ६७ ॥ ७ ॥ दशानुवाके ८६

प्रसप्तसप्ति ॥ ७ ॥ इतिशुक्लयजुर्वेदसंहितायांपंच
विंशतिमोध्यायः ॥ ७ ॥ हरिः ॐ अश्वस्तूप
रोगोमृगस्तेप्राजापत्याः कृष्णग्रीवआग्नेयो
रराटे ॥ पुरस्तात्सारस्वतीमेष्यधस्ताद्धन्वोः
आश्विनावधोरामौबाह्वोःसोमापौष्णःश्यामो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

खं·
८ नाभ्यां सौर्ययामो ॥ श्वेतश्च कृष्णश्च पार्श्वयोः
॥ २ स्याद्गौ लोमशः सक्तोऽसक्तो वाय्वः श्वेतः पुच्छ
हन्ताय स्वपुरस्यायवेहद् ध्वजो वामनः ॥ रोहितो धू
म्ररोहितः कृष्णधुरोहितस्ते सौम्या बभ्रुररुणब
भ्रुः भ्रुबभ्रुस्ते वारुणाः ॥ ३ श्रितिरंध्रो न्यतः ८

श्रितिरंध्रः समन्तात् श्रितिरंध्रस्ते सावित्राः श्रितिबा
हुरन्यतः श्रितिबाहुः समन्तात् श्रितिबाहुस्ते बार्हस्प
त्याः ॥ पृषतो क्षुद्रपृषतो स्थूलपृषतो नामैत्राव
रुणयः ॥ ४ ॥ शुद्धवालः सर्वशुद्धवालो मणिवालस्ते
आश्विना ॥ श्येत श्येताक्षो रुणस्ते रुद्राय पशुप

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ सं॰ ॥
॥ ८८ ॥

तयेकर्णायामाः ॥ ५ ॥ अवलिप्ता रौद्रा नभोरूपाः
पार्जन्याः ॥ पृश्निस्तिरश्चीनपृश्निरूर्ध्वपृश्नि
स्ते मारुताः ॥ ६ ॥ फल्गूर्लोहितोर्णी पलक्षी ता
स्सारस्वत्यः ॥ प्लीहाकर्णः शुंठाकर्णोध्यालो
हकर्णस्ते त्वाष्ट्राः ॥ ७ ॥ कृष्णग्रीवः शितिकक्षोंजि ॥ ८८ ॥

सक्थस्त ऐन्द्राग्नाः ॥ कृष्णांजिरल्पांजिर्महांजिस्त
उषस्याः ॥ ८ ॥ शिल्पा वैश्वदेव्यो रोहिण्यस्त्र्यवयो
वाचेविज्ञाता अदित्यै सरूपा धात्रे वत्सतर्यो देवानां
पत्नीभ्यः ॥ ९ ॥ कृष्णग्रीवा आग्नेयाः शितिभ्रवो
वसूनां रोहिता रुद्राणां ॥ श्वेता अवरोकिण आदि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं ८२

स्थानान्नभोरूपाः पार्जन्याः ॥ १० ॥ उन्नतः ऋष
भोवामनस्तऐन्द्रावैष्णवाउन्नतः शितिबाहुः
शितिपृष्ठस्तऐंद्राबार्हस्पत्याः ॥ शुकरूपावा
जिनाः कल्माषाआग्निमारुताः श्यामाःपौष्णाः
॥ ११ ॥ एताऐन्द्राग्नाद्विरूपाअग्नीषोमीयावा ८२

मनाअनड्वाहआग्नावैष्णवाः ॥ वशामैत्रावरु
ण्योन्यतएन्यो मैत्र्यः ॥ १२ ॥ कृष्णग्रीवाआग्नेया
बभ्रवः सौम्याः श्वेतावायव्याअदित्यै सरूपा
धात्रे वत्सतर्यो देवानांपत्नीभ्यः ॥ १३ ॥ कृष्णाभौ
माधूम्राआन्तरिक्षाबृहन्तोदिव्याः शबला

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं०
९०

वैद्युताः सिध्माः स्तारकाः १४ धूम्रान्वसंताया
लभते श्वेतान्ग्रीष्मायकृष्णान्वर्षाभ्योरुणांछरदे
पृषतोहेमंतायपिशंगाञ्छिशिराय १५ त्र्यव
योगायत्र्यैपंचावयस्त्रिष्टुभेदित्यवाहोजगत्यै
त्रिवत्साअनुष्टुभेतुर्यवाहउष्णिहे १६ पष्ठवाहो ९०

विराजउक्षाणोबृहत्याऋषभाःककुभेअनड्वाहः
पंक्त्यैधेनवोतिछंदसे १७ कृष्णग्रीवाआग्नेया
बभ्रवःसौम्याउपध्वस्ताःसावित्रावत्सतर्यःसार
स्वत्यःश्यामाःपौष्णाःपृश्नयोमारुताबहुरूपा
वैश्वदेवावशाद्यावापृथिवीयाः १८ उक्ताः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं०
९९ संचरा एता ऐन्द्राग्नाः कृष्णा वारुणाः पृश्नयो मारुताः
कायास्तूपराः १९ अग्नयेनीकवते प्रथमजानाल
भते मरुद्भ्यः सांतपनेभ्यः सवात्यान्मरुद्भ्यो गृहमे
धिभ्यो बष्किहान् मरुद्भ्यः क्रीडिभ्यः संसृष्टान्म
रुद्भ्यः स्वतवद्भ्योनुसृष्टान् २० उक्ताः संचरा ९९

एता ऐन्द्राग्नाः प्राशृंगा माहेन्द्रा बहुरूपा वैश्वकर्म
णाः २१ धूम्रा बभ्रुनीकाशाः पितॄणां सोमवतां ब
भ्रवो धूम्रनीकाशाः पितॄणां बर्हिषदाम् कृष्णा बभ्रु
नीकाशाः पितॄणामग्निष्वात्तानां कृष्णाः पृषन्तस्त्रै
यंबकाः २२ उक्ताः संचरा एताः शुनासीरीयाः श्वे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं० ॥
॥२२॥

नानायव्याः श्वेताः सौर्याः ॥२३॥ ७॥ वसन्ताय
कपिंजलानालभते ग्रीष्माय कलविंकान्वर्षा
भ्यः स्त्तित्तिरीन्छरदे वर्त्तिकाः हेमन्ताय कक
रान्छिशिराय विककरान् ॥२४॥ समुद्राय शि
शुमारानालभते पर्जन्याय मंडूकानद्भ्यो म ॥२२॥

त्स्यान् मित्राय कुलीपयान्वरुणाय नाक्रा
न् ॥२५॥ सोमाय हंसानालभते वायवे बला
काइन्द्राग्निभ्यां क्रुंचान् मित्राय मद्गून्वरुणा
य चक्रवाकान् ॥२६॥ अग्नये कुटरूनालभते
वनस्पतिभ्य उलूकानग्नीषोमाभ्यां चाषा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं०
६३

न्‌ ॥ अग्निभ्याम्मयूरान्मित्रावरुणाभ्यांकपोता
न्‌ ॥ २७ ॥ सोमायलबानालभतेत्वष्ट्रेकौलीका
न्गोषादीर्देवानांपत्नीभ्यः कुलीकादेवजामि
भ्योग्नयेगृहपतयेपारुष्णान्‌ ॥ २८ ॥ अह्नेपा
रावतानालभतेरात्र्यैसीचारहोरात्रयोः सं
६३

धिभ्योजतूः ॥ मासेभ्योदात्योहान्संवत्सराय
महतःसुपर्णान्‌ ॥ २९ ॥ भूम्याआखूनालभते
न्तरिक्षायपाङ्क्रान्दिवकशान्‌ दिग्भ्योनकु
लान्बभ्रुकानवान्तरदिशाभ्यः ॥ ३० ॥ वसुभ्य
ऋश्यानालभतेरुद्रेभ्योरुरूनादित्येभ्योन्य

कृन् विश्वेभ्योदेवेभ्यः पृषतान्साध्येभ्यः कुलुं
गान् ३१ ईशानायपरस्वतआलभतेमित्रा
यगौरान्वरुणायमहिषान् बृहस्पतेगवया
ंस्त्वष्ट्रउष्ट्रान् ३२ प्रजापतयेपुरुषान्हस्तिन
आलभतेवाचेप्लुषीन् चक्षुषेमशकान्श्रो

त्रायभृंगाः ३३ प्रजापतयेचवायवेचगोमृगो
वरुणायारण्योमेषोयमायकृष्णोमनुष्यराजाय
मर्कटः शार्दूलायरोहिदृषभायगवयीक्षिप्रश्ये
नायवर्त्तिकानीलंगोः क्रिमिः समुद्रायशिशुमारो
हिमवतेहस्ती ३४ मयुः प्राजापत्यउलोहलि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं.
५५

क्षोणोवृषदंशस्तेधात्रेदिशांकंकोधुंक्षाग्नेयी क
लविंकोलोहिताहिःपुष्करसादस्तेत्वाष्ट्रावाचेक्रुंच
ः ३५ सोमायकलुंगआरण्योजोनकुलःशकाते
पौष्णाःक्रोष्टामायोरिन्द्रस्यगौरमृगः पिद्वोन्यं
कुःकक्कटस्तेनुमत्यैप्रतिश्रुत्कायैचक्रवाकः ३६

५५

सौरीबलाकाशार्गःसृजयःशयांडकस्तेमैत्राः
सरस्वत्यैशारिःपुरुषवाक्श्वाविद्भौमी शार्दूलो
वृकःपृदाकुस्तेमन्यवेसरस्वतेशुकःपुरुषवा
क् ३७ सुपर्णःपार्जन्यआतिर्वाहसोदर्विदाते
वायवेबृहस्पतयेवाचस्पतयेपैंगराजोलज

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं०
९६

आन्तरिक्षः ॥ प्लवो मद्गुर्मत्स्यस्ते नदीपतये द्यावापृ
थिवीयः कूर्मः ॥ ३८ ॥ पुरुषमृग श्चंद्रमसो गोधाका
लका दार्वाघाटस्ते वनस्पतीनां कृकवाकुः सावि
त्रो हंसो वातस्य ॥ नाक्रो मकरः कुलीपयस्तेकूपार
स्य ह्रियै शल्यकः ॥ ३९ ॥ एण्यह्नो मंडूको मूषिका

९६

तित्तिरिस्ते सर्पाणां लोपाश आश्विनः कृष्णो रात्र्यै
ऋक्षो जतूः सुषिलीका त इतरजनानां जहका वै
ष्णवी ॥ ४० ॥ अन्यवापोर्द्धमासानामृश्यो मयूरः
सुपर्णस्ते गंधर्वाणामपामुद्रो मासां कश्यपः रोहि
त्कुंडृणाची गोलत्तिका ते प्सरसां मृत्यवेसितः ॥ ४१

सं० ९८

वर्षाहूर्ऋतूनामाखुः कशो मान्थालस्ते पितॄणां ब
लायाजगरो वसूनां कपिञ्जलः कपोत उलूकः श
शस्ते निरृत्यै वरुणायारण्यो मेषः ४२ श्वित्र
आदित्यानामुष्ट्रो घृणीवान्वार्ध्रीनसस्ते मत्या
अरण्याय सृमरो रुरू रौद्रः क्वयिः कुटरुर्दा ९८

त्यौहस्ते वाजिनां कामाय पिकः ४३ खड्गो वैश्व
देवः श्वा कृष्णः कर्णो गर्दभस्तरक्षुस्ते रक्षसामि
न्द्राय सूकरः सिंहो मारुतः कृकलासः पिप्पका
शकुनिस्ते शरव्यायै विश्वेषां देवानां पृषतः ४४
अष्टानुवाकेषु चतुश्चत्वारिंशत् ८ इति शुक्ल

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥स॰॥
॥१८॥

यजुर्वेदसंहितायांषड्विंशतिमोध्यायः॥ हरिः॥
ॐ॥ शादंदद्भिरवकांदंतमूलैर्मृदंबर्स्वैस्ते
गांदंष्ट्राभ्यांसरस्वत्याअग्रजिह्वंजिह्वायाउ
त्सादं॥ अवक्रंदेनतालुवाजंहनुभ्यामपआ
स्येनवृषणमांडाभ्यां॥ १॥ आदित्यान्श्मश्रुभिः ॥१८॥

वर्त्तो

पंथानंभ्रूभ्यांद्यावापृथिवीवर्त्तोभ्यांविद्युतंकनीनका
भ्यां॥ शुक्लायस्वाहाकृष्णायस्वाहापार्याणिप
क्ष्माण्यवार्याइक्षवोवार्याणिपक्ष्माणिपार्याइ
क्षवः॥ २॥ वातंप्राणेनापानेननासिकेउपया
ममधरेणौष्ठेनसदुत्तरेण॥ प्रकाशेनांतरम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं०
९९

न्क्रोशेन वायुं निवेष्यं मूर्ध्ना स्तनयित्नुं निर्बा
धेनाशनिं मस्तिष्केण विद्युतं कनीनकाभ्यां २
कर्णाभ्याꣳ श्रोत्रꣳ श्रोत्राभ्यां कर्णौ तेदनीमधर
कण्ठेनापः शुष्ककण्ठेन चित्तं मन्याभिः अदितिं
शीर्ष्णा निर्ऋतिं निर्जर्जल्पेन शीर्ष्णा संक्रोशैः ९९

प्राणान्नेष्माणꣳ स्तुपेन ॥ ४ ॥ मशकान्केशैरिन्द्रꣳ
स्वपसा वहेन बृहस्पतिꣳ शकुनिसादेन कूर्मान्
शफैराक्रमणꣳ स्थूराभ्यामृक्षलाभिः कपिञ्जला
न् ॥ ५ ॥ जवं जङ्घाभ्यामध्वानं बाहुभ्यां जाम्बीले
नारण्यमग्निमतिरुग्भ्याम् पूषणं दोर्भ्यामश्वि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ सं० ॥
॥ १०० ॥

ना॥ ७॥ साभ्या॥ ८॥ रुद्र॥ ९॥ रोराभ्याम् ॥ १०॥ अग्नेः पक्षति
र्वायोर्निपक्षतिरिन्द्रस्य तृतीयापांचतुर्थी॥ अदि
त्यै पंचमीन्द्राण्यै षष्ठी मरुतां सप्तमी बृहस्पते
रष्टमी॥ अर्यम्णो नवमी धातुर्दशमीन्द्रस्यैकाद
शी वरुणस्य द्वादशी यमस्य त्रयोदशी॥ ७॥ इन्द्रा ॥ १०० ॥

ग्न्योः पक्षतिः सरस्वत्यै निपक्षतिर्मित्रस्य तृतीया
सोमस्य चतुर्थी॥ निर्ऋत्यै पंचम्यग्नीषोमयोः ष
ष्ठी सर्पाणां सप्तमी विष्णोरष्टमी॥ पूष्णो नवमी त्व
ष्टुर्दशमीन्द्रस्यैकादशी वरुणस्य द्वादशी यम्यै त्र
योदशी॥ द्यावापृथिव्योर्दक्षिणं पार्श्वं विश्वेषां

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं० ॥ ७ ॥ देवानामुत्तरम् ८ मरुतां स्कंधा विश्वेषां देवा
नां प्रथमा कीकसा रुद्राणां द्वितीयादित्यानां तृती
या वायोः पुच्छमग्नीषोमयोर्भासदौ क्रौंचौ श्रोणि
भ्यामिन्द्राबृहस्पती ऊरुभ्यां मित्रावरुणा अ
ल्गाभ्यामाक्रमणं स्थूराभ्यां बलं कुष्ठाभ्यां ॥ ९ ॥ ७ ॥

पूषणं वनिष्ठुनान्धाहीन्स्थूलगुदया सर्पान्गुदाभि
र्विह्रुत आंत्रैरपो वस्तिना वृषणमांडाभ्यां वाजि
नं शेपेन प्रजां रेतसा चाषान्पित्तेन प्रदरान्पायु
ना कूश्मांछकपिंडैः ॥ १० ॥ इंद्रस्य क्रोडो दित्यै पा
जस्यं दिशां जत्रवो दित्यै भसत् जीमूतान्हृदयौ

सं॰
२

पु

श्येनानन्तरिक्षंपुरीतता ॥ ११ ॥ नभउदर्येणचक्रवाकौ
मतस्नाभ्यांदिवंवृक्काभ्यांगिरीन्प्लाशिभिः उपला
न्प्लीह्नावल्मीकान्क्लोमभिर्ग्लौभिर्गुल्मान्हिराभिस्र
वंतीः ह्रदान्कुक्षिभ्याꣳसमुद्रमुदरेणवैश्वानरंभ
स्मना ॥ १२ विधृतिन्नाभ्याघृतꣳरसेनापोयूष्णा ॥ २ ॥

मरीचीर्विप्रुड्भिर्नीहारमूष्मणाशीनंवसयाप्रुष्वाअ
श्रुभिः ह्रादुनीर्दूषीकाभिरस्नारक्षाꣳसिचित्राण्य
ङ्गैर्नक्षत्राणिरूपेणपृथिवीन्त्वचाजुंबकायस्वाहा
॥ १३ हिरण्यगर्भःसमवर्त्तताग्रेभूतस्यजातःपति
रेकआसीत सदाधारपृथिवींद्यामुतेमांकस्मैदे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं०
२

वाय हविषा विधेम १४ यः प्राणतो निमिषतो म
हित्वैक इद्राजा जगतो बभूव य ईशे अस्य द्विपद
श्चतुष्पदः कस्मै देवाय हविषा विधेम १५ यस्ये
मे हिमवन्तो महित्वा यस्य समुद्रं रसया सहाहुः
यस्येमाः प्रदिशो यस्य बाहू कस्मै देवाय हविषा २

विधेम १६ य आत्मदा बलदा यस्य विश्व उपा
सते प्रशिषं यस्य देवाः यस्य छायामृतं यस्य मृ
त्युः कस्मै देवाय हविषा विधेम १७ ७ आ
नो भद्राः क्रतवो यन्तु विश्वतोऽदब्धासो अपरीता
स उद्भिदः देवा नो यथा सदमिद्वृधे असन्नप्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

युवोरक्षितारोदिवेदिवे ॥१८॥ देवानांभद्रासुम
तिर्ऋजूयतांदेवानांरातिरभिनोनिवर्त्तताम्
देवानांसख्यमुपसेदिमावयंदेवानआयुः
प्रतिरन्तुजीवसे ॥१९॥ तान्पूर्वयानिविदाहूम
हेवयंभगंमित्रमदितिंदक्षमस्रिधम् ॥ अर्य

मणंवरुणंसोममश्विनासरस्वतीनःसुभगा
मयस्करत् ॥२०॥ तन्नोवातोमयोभुवातुभेष
जंतन्मातापृथिवीतत्पिताद्यौः ॥ तद्ग्रावाणः
सोमसुतोमयोभुवस्तदश्विनाशृणुतंधिष्ण्या
युवम् ॥२१॥ तमीशानंजगतस्तस्थुषस्पतिंधि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं·
५

यं जिन्वमवसे हूमहे वयम्॥ पूषा नो यथा वेदसा
मसद्वृधे रक्षिता पायुरदब्धः स्वस्तये॥ २२॥ स्व
स्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः
स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः स्वस्ति नो बृह
स्पतिर्दधातु॥ २३॥ ७॥ पृषदश्वा मरुतः पृश्नि ॥ ५॥

७१८

मातरः शुभंयावानो विदथेषु जग्मयः॥ अग्निजि
ह्वा मनवः सूरचक्षसो विश्वे नो देवा अवसाग
मन्निह॥ २४॥ भद्रं कर्णेभिः शृणुयाम देवा भद्रं
पश्येमाक्षभिर्यजत्राः॥ स्थिरैरंगैस्तुष्टुवांसः
स्तनूभिर्व्यशेम देवहितं यदायुः॥ २५॥ शतमिन्नु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं- ६

शरदो अन्ति देवा यत्रा नः श्चक्रा जरसं तनूना
म्। पुत्रासो यत्र पितरो भवंति मा नो मध्या रीरिष
तायुर्गन्तोः ॥२५॥ अदितिर्द्यौरदितिरन्तरिक्षमदि
तिर्माता स पिता स पुत्रः। विश्वे देवा अदितिः पंच
जना अदितिर्जातमदितिर्जनित्वम्॥ मा नो मि
॥२६॥ ६

६२०

त्रो वरुणो अर्यमायुरिंद्र ऋभुक्षा मरुतः परिख्य
न्। यद्वाजिनो देवजातस्य सप्तेः प्रवक्ष्यामो वि
दथे वीर्याणि ॥२७॥ यन्निर्णिजा रेक्णसा प्राव
तस्य रातिं गृभीता म्मुखतो नयंति। सुप्राङजो
मेम्यद्विश्वरूप इन्द्रापूष्णोः प्रियमप्येति पाथः ॥२८॥

६२१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥सं॰॥
॥८॥

८२२

एषछागः पुरोअश्वेनवाजिना पूष्णोभागोनीय
तेविश्वदेव्यः अभिप्रियंयत्पुरोडाशमर्वतात्वष्टे
देनꣳसौश्रवसायजिन्वति २९ यद्धविष्यमृतुशो
देवयानंत्रिर्मानुषाः पर्यश्वंनयन्ति अत्रापूष्णः
प्रथमोभागएतियज्ञंदेवेभ्यःप्रतिवेदयन्नजः ८॥

८२३

३० होताध्वर्युरावयाअग्निमिंधोग्रावग्राभउत
शꣳस्तासुविप्रः तेनयज्ञेनस्वरंकृतेनस्विष्टेनवक्ष
णाआपृणध्वम् ३१ यूपव्रस्काउतयेयूपवाहा
श्चषालंयेअश्वयूपायतक्षति येचार्वतेपचन
ꣳसंभरंत्युतोतेषामभिगूर्त्तिर्नइन्वतु ३२ उपप्रा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं.
८

गात्सुमन्मेधायिमन्मदेवानामाशाउपवीतपृष्ठः॥ अ
न्वेनंविप्राऋषयोमदन्तिदेवानांपुष्टेचकृमासुबंधु
म॥ ३३॥ यद्वाजिनोदामसंदानमर्वतोयाशीर्षण्यार
शनारज्जुरस्य॥ यद्वाघास्यप्रभृतमास्येतृणं॥ स
र्वाताते अपिदेवेष्वस्तु॥ ३४॥ यदश्वस्यक्रविषोम

॥८॥

क्षिकाशयद्वास्वरौस्वधितौरिप्तमस्ति॥ यद्धस्तयोः
शमितुर्यन्नखेषुसर्वातातेअपिदेवेष्वस्तु॥ ३५॥ य
दूवध्यमुदरस्यापवातियआमस्यक्रविषोगंधोअ
स्ति॥ सुकृतातच्छमितारःकृण्वन्तूतमेधंशृत
पाकंपचंतु॥ ३६॥ यत्तेगात्रादग्निनापच्यमाना

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥सं॰॥ ६२६
॥१॥

दभिशूलन्निहतस्यावधावति । मातद्भूम्यामाश्रि
षन्मातृणेषु देवेभ्यः स्तदुशद्भ्योरातमस्तु ॥ ३७
येवाजिनंपरिपश्यंतिपक्वंयईमाहुः सुरभिर्निर्हरे
ति । येचार्वतोमाꣳसभिक्षामुपासतउतोतेषामभि
गूर्त्तिर्नइन्वतु ॥ ३८ ॥ यन्नीक्षणंमाꣳस्पचन्याउखा

॥१॥

६२८

यायापात्राणियूष्णआसेचनानि । ऊष्मण्यापिधा
नाचरूणामंकाः सूनाः परिभूषंत्यश्वम् ॥ ३९ ॥ मात्वा
ग्निर्ध्वनयीद्धूमगंधिर्मोखाभ्राजंत्यभिविक्तजि
घ्रिः । इष्टंवीतमभिगूर्त्तंवषट्कृतंतंदेवासः प्रति
गृभ्णंत्यश्वम् ॥ ४० ॥ निक्रमणंन्निषदनंविवर्त्तनं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥सं०॥
॥१०॥

यच्चपड्बीशमर्वतः॥ यच्चपपौयच्चघासिंजघाससर्
र्वातातेअपिदेवेष्वस्तु॥४१॥ यदश्वायवासउपस्तृ
णंत्यधीवासंयाहिरण्यान्यस्मै॥ संदानमर्वन्तंप
ड्बीशंप्रियादेवेष्वायामयंति॥४२॥ इमानुकंभुव
नासीषधामेन्द्रश्चविश्वेचदेवाः॥ आदित्यैरिन्द्रः ॥१०॥

सगणोमरुद्भिरस्मभ्यंभेषजाकरत्॥ यज्ञंचनस्तन्वं
चप्रजांचादित्यैरिन्द्रः सहसीषधाति॥४३॥ अग्नेत्वं
नोअन्तमउतत्राताशिवोभवावरूथ्यः॥ वसुरग्नि
र्वसुश्रवाअच्छानक्षिद्युमत्तमंरयिंदाः॥ तंत्वाशो
चिष्ठदीदिवःसुम्नायनूनमीमहेसखिभ्यः॥४४॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ सं० ॥
॥ १११ ॥

६२०

षोडशानुवाकेषु चत्वारिंशत् ॥ ७ ॥ ७ ॥ ओम् ॥
अग्निश्च पृथिवी च सन्नते ते मे सन्नमतामदो वायुश्चा
न्तरिक्षं च सन्नते ते मे सन्नमतामदः आदित्यश्च द्यौ
श्च सन्नते ते मे सन्नमतामद आपश्च वरुणश्च सन्न
ते ते मे सन्नमतामदः सप्त संसदो अष्टमी भूतसा

॥ १११ ॥

६२१

धनी ॥ १ ॥ सकामां अध्वनस्कुरु संज्ञानमस्तु मेमुना
यथेमां वाचं कल्याणीमावदानि जनेभ्यः ॥ २ ॥ ब्रह्म
राजन्याभ्यां शूद्राय चार्याय च स्वाय चारणाय च
प्रियो देवानां दक्षिणायै दातुरिह भूयासमयं मे
कामः समृध्यतामुप मादो नमतु ॥ ३ ॥ बृहस्पते अ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥सं०॥ 632

॥१२॥ त्रिय दूर्यो अर्हो घुमद्विभाति क्रतुमज्जनेषु । यद्दीदयच्छ
वस ऋतप्रजात तदस्मासु द्रविणं धेहि चित्रम् उ
पयामगृहीतोसि बृहस्पतये त्वैष ते योनिर्बृहस्प
तये त्वा ॥ ४ ॥ इन्द्र गोमन्निहायाहि पिबा सोमं शत
क्रतो ॥ विद्यद्भिर्ग्रावभिः सुतम् । उपयामगृहीतो
॥१२॥

633

सीन्द्राय त्वा गोमत एष ते योनिरिन्द्राय त्वा गोमते
॥ ५ ॥ ऋतावानं वैश्वानरमृतस्य ज्योतिषस्पतिम् ।
अजस्रं घर्ममीमहे । उपयामगृहीतोसि वैश्वानरा
य त्वैष ते योनिर्वैश्वानराय त्वा ॥ ६ ॥ वैश्वानरं हवा
ष महऋतस्य ज्योतिस्पतिम् । अजस्रं घर्ममीमहे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥सं०॥
॥१३॥

उपयामगृहीतोसिवैश्वानरायत्वैषते० ७ वैश्वान
रोनऊतयआप्रयातुपरावतः अग्निरुक्थेनवाह
सा उपयामगृही० ८ वैश्वानरस्यसुमतौस्याम
राजाहिकंभुवनानामभिश्रीः इतोजातोविश्वमि
दंविचष्टेवैश्वानरोयततेसूर्येण उपयामगृहीतो ॥१३॥

सिवैश्वानरायत्वे० ९ मरुत्वांइन्द्रवृषभोरणाय
पिबासोममनुष्वधंमदाय आसिंचस्वजठरेम
ध्वऊर्मिंत्वंराजासिप्रतिपत्सुतानाम् उपयाम
गृहीतोसींद्रायत्वामरुत्वतएषतेयोनिरिंद्राय
त्वामरुत्वते १० महांइन्द्रोवज्रहस्तःषोडशी

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥सं०॥
॥२६॥

७३६

शर्मयछतु हन्तुपाप्मानंयोस्मान्द्वेष्टि उपयामगृ
हीतोसीन्द्रायत्वाषोडशिन एषतेयोनिरिन्द्रायत्वा
षोडशिने ११ अग्निर्ऋषिः पवमानः पांचजन्य
पुरोहितः तमीमहे महागयम् १२ अनुवीरैर
नुपुष्यास्म गोभिरन्वश्वैरनुसर्वेणपुष्टैः अनु ॥२६॥

७३७

तु

द्विपदानुचतुष्पदा वयंदेवानोयज्ञमृतुथानयं
तु १३ आनोगोत्रा दर्दृहिगोपते गाः समस्मभ्यं
सनयोयंतुवाजाः दिवक्षा असिवृषभसत्य
शुष्मोस्मभ्यंसुमघवन्बोधिगोदाः १४
७ इतिशुक्लयजुर्वेदसंहितायांषड्विंश

॥ सं० ॥
॥ १५ ॥

638

त्तिमोध्यायः ॥ ७ ॥ हरिः ॐ ॥ समास्त्वाग्नऋतवोव
र्द्धयन्तु संवत्सराऋषयोयानिसत्या ॥ संदिव्येनदीदि
हिरोचनेनविश्वाआभाहिप्रदिश्श्चतस्रः ॥ १
संचेध्यस्वाग्नप्रचबोधयैनमुच्चतिष्ठमहतेसौ
भगाय ॥ माचरिषदुपसत्तातेअग्नेब्रह्माणस्तेय ॥ १५ ॥

639

शसः संतुमान्ये ॥ २ ॥ त्वामग्नेवृणतेब्राह्मणाइमे
शिवोअग्नेसंवरणेभवानः ॥ सपत्नहानोअभि
मातिजिच्च स्वेगयेजागृह्यप्रयुच्छन् ॥ ३ ॥ इहैवा
ग्नेअधिधारयारयिंमात्वानिक्रन्पूर्वचित्तोनिका
रिणः ॥ क्षत्रमग्नेसुयममस्तुतुभ्यमुपसत्तावर्द्ध

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं० १६ तांतेअग्निहुतः ॥ ४ ॥ क्षत्रेणाग्नेस्वायुःसंरभस्वमि
त्रेणाग्नेमित्रधेयेयतस्व ॥ सजातानांमध्यमस्था
एधिराज्ञामग्नेविहव्योदीदिहीह ॥ ५ ॥ अतिनिहो
अतिस्रिधोत्यचित्तिमत्यरातिमग्ने ॥ विश्वाह्यग्ने
दुरितासहस्वाथास्मभ्यंसहवीरांरयिंदाः ॥ ६ ॥ १६

अनाधृष्योजातवेदाअनिहुतोविराळग्नेक्षत्रभृ
द्दीदिहीह ॥ विश्वाआशाःप्रमुंचन्मानुषीर्भियःशि
वाभिरद्यपरिपाहिनोवृधे ॥ ७ ॥ बृहस्पतेसवितः
र्वर्धयेनंसंशितंचित्संतरांसंशिशाधि
वर्धयैनंमहतेसौभगायविश्वएनमनुमदंतुदे

॥ सं० ॥
॥ १८ ॥

धाः ॥ ८ ॥ अमुत्रभूयादधयद्यमस्यबृहस्पतेअभि
शस्तेरमुंचः प्रत्यौहतामश्विनामृत्युमस्माद्देवाना
मग्नेभिषजाशचीभिः ॥ ९ ॥ उद्वयंतमसस्परिस्वः
पश्यन्तउत्तरम् देवन्देवत्रासूर्यमगन्मज्योतिरु
त्तमम् ॥ १० ॥ ऊर्ध्वाअस्यसमिधोभवन्त्यूर्ध्वाशु ॥ १८ ॥

क्राशोचीꣳष्यग्नेः ॥ द्युमत्तमासुप्रतीकस्यसूनोः
॥ ११ ॥ तनूनपादसुरोविश्ववेदादेवोदेवेषुदेवः
पथोअनक्तुमध्वाघृतेन ॥ १२ ॥ मध्वायज्ञन्नक्षसे
प्रीणानोनराशꣳसोअग्ने सुकृद्देवःसविताविश्ववारः
॥ १३ ॥ अच्छायमेतिशवसाघृतेनेडानोव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ सं॰ ॥
॥ १९ ॥

न्निर्नमसा ॥ अग्निं स्रुचो अध्वरेषु प्रयत्सु ॥ १४ ॥ स
यक्षदस्य महिमानमग्नेः सईम्मन्द्रासुप्रयसः ॥ वसु
श्चेतिष्ठो वसुधातमश्च ॥ १५ ॥ द्वारो देवीरन्वस्य वि
६ श्वे व्रता दंदन्ते अग्नेः ॥ उरुव्यचसो धाम्ना पत्यमानाः
॥ १६ ॥ ते अस्य योषणे दिव्ये न योना उषासानक्ता

॥ १९ ॥

इमं यज्ञमवतामध्वरन्नः ॥ १७ ॥ दैव्या होतारा उर्ध्व
मध्वरन्नोग्नेर्जिह्वामभिगृणीतम् ॥ कृणुतन्नः स्वि
ष्टिम् ॥ १८ ॥ तिस्रो देवीर्बर्हिरेदं सदन्त्विडा सरस्व
ती भारती मही गृणाना ॥ १९ ॥ तन्नस्तुरीपमद्भुतं
पुरुक्षु त्वष्टा सुवीरम् ॥ रायस्पोषं विष्यतु नाभिमस्मे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ सं. ॥

॥ १९ ॥ ॥ २० ॥ वनस्पते नस्व जारराण त्मना देवेषु ॥ अग्निर्हव्यं
शमिता सूदयाति ॥ २१ ॥
अग्ने स्वाहा कृणुहि जातवेद इंद्राय हव्यम्
विश्वे देवा हविरिदं जुषंतां ॥ २२ ॥ ७ ॥ पीवो अन्ना रयि
वृधः सुमेधाः श्वेतः सिषक्ति नियुतामभिश्रीः ॥ ते ॥ १९ ॥

वायवे समनसो वितस्थुर्विश्वेन्नरः स्वपत्यानि चक्रुः
॥ २३ ॥ राये नु यं जज्ञतू रोदसीमे राये देवी धिषणा धाति
देवम् ॥ अध वायुं नियुतः सश्चत स्वा उत श्वेतं वसु
धितिं निरेके ॥ २४ ॥ वायुरग्रेगा यज्ञप्रीः साकं गन्म
नसा यज्ञम् ॥ शिवो नियुद्भिः शिवाभिः ॥ २५ ॥ प्रया

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ सं० ॥
॥ २० ॥

भिर्यासिदाश्वाꣳसमच्छानियुद्भिर्वायविष्टयेदुरोणे । नि
नोरयिꣳसुभोजसंयुवस्वनिवीरंगव्यमश्व्यंचराधः २६ ॥
वायोयेतेसहस्रिणोरथासस्तेभिरागहि । नियुत्वा
न्सोमपीतये ॥ २७ ॥ एकयाचदशभिश्चस्वभूतेद्वाभ्या
मिष्टयेविꣳशतीच । तिसृभिश्चवहसेत्रिꣳशताच

६२८ ॥ २० ॥

६२९

नियुद्भिर्वायविहताविमुंच ॥ २८ ॥ नियुत्वान्वायवाग
ह्ययꣳशुक्रोअयामिते । गंतासिसुन्वतोगृहं ॥ २९
वायोशुक्रोअयामितेमध्वोअग्रंदिविष्टिषु । आया
हिसोमपीतयेस्पार्होदेवनियुत्वता ॥ ३० ॥ आनोनियु
द्भिःशतिनीभिरध्वरꣳसहस्रिणीभिरुपयाहियज्ञम्

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ सं० ॥
॥ २९ ॥

पायो अस्मिन्त्सवने मादयस्व यूयं पात स्वस्तिभिः सदा
नः ॥ ३१ ॥ तव वायव् ऋतस्पते त्वष्टुर्जामातरद्भुत । अवा
ꣳस्या वृणीमहे ॥ हिरण्यगर्भ इत्येषः ॥ ३२ ॥ येन द्यौरुग्रा
पृथिवी च दृढा येन स्वः स्तभितं येन नाकः ॥ यो अन्त
रिक्षे रजसो विमानः कस्मै देवाय हविषा विधेम ॥ ३३ ॥

६७०

॥ २९ ॥

६७१

यं क्रन्दसी अवसा तस्तभाने अभ्यैक्षेतां मनसा रे
जमाने ॥ यत्राधि सूर उदितो विभाति कस्मै देवाय
हविषा विधेम ॥ ३४ ॥ आपो ह यद् बृहतीर्विश्वमायन्
गर्भं दधाना जनयन्तीरग्निम् ॥ ततो देवानामसुः स
मवर्ततासुरेकः कस्मै देवाय हविषा विधेम ॥ ३५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

।।सं०।।
।।२२।।

यश्चिदापोमहिनापर्यपश्यद्दक्षंदधानाजनयंती
र्यज्ञं। योदेवेष्वधिदेवएकआसीत्कस्मैदेवाय। २६
मानोहिंसीज्जनितायःपृथिव्यायोवादिवं
सत्यधर्माजजान। यश्चापश्चंद्राबृहतीर्जजा
नकस्मैदेवाय।।२७ प्रजापतेनत्वदेतान्यन्यो

।।२२।।

विश्वाजातानिपरिताबभूव। यत्कामास्तेजुहु
मस्तन्नोअस्तुवयंस्यामपतयोरयीणां। २८
अग्नआयूंषिपवसआसुवोर्जमिषंचनः। आ
रेबाधस्वदुच्छुनां। २९ अग्नेपवस्वस्वपाअस्मे
वर्चःसुवीर्यम्। दधद्रयिंमयिपोषम्। ३०। अ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥सं०॥
॥२३॥

ग्निरृषिः पवमानः पांचजन्यः पुरोहितः । तमीमहे
महागयम् ॥ ८१ ॥ अभित्वा शूरनोनुमोदुग्धा इव धेन
वः ॥ ईशानमस्य जगतः स्वर्दृशमीशानमिन्द्र तस्थु
षः ॥ ८२ ॥ नत्वावां अन्यो दिव्यो न पार्थिवो न जातो
न जनिष्यते ॥ अश्वायन्तो मघवन्निन्द्र वाजिनो
गव्यंतस्त्वा हवामहे ॥ ८३ ॥ त्वामिद्धि हवामहे सा ॥२३॥

तौ वाजस्य कारवः ॥ त्वां वृत्रेष्विंद्र सत्पतिन्नरस्त्वां
काष्ठास्वर्वतः ॥ ८४ ॥ स त्वन्नः श्चित्र वज्रहस्त धृ
ष्णुयामहस्तवानो अद्रिवः ॥ गामश्वं रथ्यमिन्द्र
संकिर सत्रावाजन्नजिग्युषे ॥ ८५ ॥ कयानश्चि
त्र आभुवदूती सदावृधः सखा । कयाशचिष्ठ

॥सं०॥
॥२५॥

पावकता ॥ ४६ ॥ कृत्वा सख्योमहानां मंहिष्ठो मत्सदं
धसः ॥ दृळ्हाचिद्दारुजे वसु ॥ ४७ ॥ अभीषुणः स
खीनामविता जरितॄणाम् ॥ शतंभवास्यूतये ॥ ४८ ॥
यज्ञायज्ञावोअग्नये गिरागिराचदक्षसे ॥ प्रप्र
वयममृतं जातवेदसं प्रियंमित्रंनशंसिषम् ॥ ॥२५॥

॥ ४९ ॥ ऊर्जोनपातं सहिनायमस्मयुर्दाशेमह
व्यदातये ॥ भुवद्वाजेष्वविताभुवद्वृध उतत्राताता
नूनाम् ॥ ५० ॥ संवत्सरोसि परिवत्सरोसीदावत्स
रोसीद्वत्सरोसिवत्सरोसि ॥ उषसस्ते कल्पंता
महोरात्रास्ते कल्पंतामर्धमासास्ते कल्पंतांमा

॥ सं० ॥
॥ २५ ॥

सास्तेनक्लृप्तंता ऋतवस्तेनक्लृप्तंता ऽ संवत्सरस्ते
नक्लृप्ताम् ॥ ५७ ॥ मेष्याए स्थ्ये संचांचुमर्चे सारस्या ॥
सुपर्णे चिदसि तया देवतयाङ्गिरस्वद्ध्रुवः सी
द ॥ ५२ ॥ ७ ॥ षष्ठानुवाकेषु पंचाशत् ॥ ७ ॥ ७ ॥
॥ ७ ॥ इति शुक्लयजुर्वेदसंहितायां एकोनत्रिंशति
मोऽध्यायः ॥ ७ ॥ ॥ २५ ॥

श्री

हरिः ॐ ॥ होतायक्षत्समिधेंद्रमिडस्पदे नाभापृ
थिव्या अधि ॥ दिवोवर्ष्मंत्समिध्यत ओजिष्ठ ॥ श्च
र्षणीसहांवेत्वाज्यस्यहोतर्यज ॥ होतायक्षत्तनून
प पातमूतिभिर्जेतारमपराजितम् ॥ इंद्रंदेवं ॥ स्वर्वि
दंपथिभिर्मधुमत्तमैर्नराशंसेन तेजसा वेत्वा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥सं०॥
२६ ज्यस्यहोतर्यज ॥ २ ॥ होतायक्षदिळाभिरिंद्रमीळितमा
जुह्वानममर्त्यम् । देवोदेवैः सवीर्योवज्रहस्तः पुरंद
रोवेत्वाज्यस्यहोतर्यज ॥ ३ ॥ होतायक्षद्बर्हिषींद्रंनिषद्वरं
वृषभंनर्यापसम् । वसुभीरुद्रैरादित्यैः सयुग्भिर्बर्हिरा
सदद्वेत्वाज्यस्यहोतर्यज ॥ ४ ॥ होतायक्षद [illegible]
२६

जोनवीर्य ॥ सहोद्वारइंद्रमवर्द्धयन् । सुप्रायणाअस्मि
न्यज्ञेविश्रयंतामृतावृधोद्वारइंद्रायमीढुषेव्यंत्वाज्य
स्यहोतर्यज ॥ ५ ॥ होतायक्षदुषेइंद्रस्यधेनूसुदुघेमा
तरामही । सवातरौनतेजसावत्समिंद्रमवर्द्धतांवीतां
माज्यस्यहोतर्यज ॥ ६ ॥ होतायक्षद्दैव्याहोताराभिष

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥सं०॥
२८

जासखायाहविषेंद्रंभिषज्यतः॥ कवीदेवौप्रचेतसा
इंद्रायधत्तइंद्रियंवीतामाज्यस्य०॥८॥होतायक्षत्ति
स्रोदेवीर्नभेषजंत्रयःस्त्रिधातवोपसइडासरस्व
तीभारतीमहीः॥ इंद्रपत्नीर्हविष्मतीर्व्यंत्वाज्यस्य० ॥९
होतायक्षत्त्वष्टारमिंद्रंदेवंभिषजंसुयजंघृत

२८

श्रियं॥पुरुरूपंसुरेतसंमघोनमिंद्रायत्वष्टाद
धदिंद्रियाणिवेत्त्वाज्यस्य०॥१॥होतायक्षद्वनस्पतिं
शु त
शमितारंशतक्रतुंधियोजोष्टारमिंद्रियम्॥ मध्वास
मंजन्पथिभिःसुगेभिःस्वदातियज्ञंमधुनाघृतेन
वेत्त्वाज्यस्य०॥१०॥होतायक्षदिंद्रंस्वाहाज्यस्यस्वा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥सं०॥
२८

हामेदसस्वाहास्तोकानाꣳस्वाहास्वाहाकृतीनाꣳ
स्वाहाहव्यसूक्तीनाम् स्वाहादेवाआज्यपाजुषाणा
इंद्रआज्यस्यव्यंतुहोतर्यज ७१ देवंबर्हिरिंद्रꣳसुदे
वंदेवैर्वीरवत्स्तीर्णंवेद्यामवर्धयत् वस्तोर्वृतंप्राक्तो
र्भृतꣳरायाबर्हिष्मतोत्यगाद्वसुवनेवसुधेयस्य २८

वेतुयज ॥७२ देवीर्द्वारइंद्रꣳसंघातेवीड्वीर्यामन्नव
र्द्धयन्आवत्सेनतरुणेनकुमारेणचमीवतापार्वा
णꣳरेणुककाटंनुदंतांवसुवनेवसुधेयस्यव्यंतु
यज ७३ देवीउषासानक्तेंद्रंयज्ञेप्रयत्यह्वेताम्
दैवीर्विशःप्रायासिष्टाꣳसुप्रीतेसुधितेवसुवने

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं॰
२९ वसुधेयस्यवीतांयज ॥ ३ ॥ देवीजोष्ट्रीवसुधितीदेव
मिंद्रमवर्द्धताम् ॥ अयाव्यन्याघाद्वेषांस्यान्याव
क्षद्वसुवार्याणियजमानायशिक्षितेवसुवनेव
सुधेयस्यवी॰ ॥ ४ ॥ देवीऊर्जाहुतीदुघेसुदुघेपय
सेन्द्रमवर्धताम् ॥ इषमूर्जमन्यावक्षत्सग्धिंसपी २९

तिमन्यानवेनपूर्वंदयमानेपुराणेननवमधाताम्ऊर्ज
मूर्जाहुतीऊर्जयमानेवसुवार्याणियजमानायशि
क्षितेवसुवनेवसुधेयस्यवी॰ ॥ ५ ॥ देवादैव्याहोतारा
देवमिंद्रमवर्धताम् ॥ हताघशंसावाभार्ष्टांवसुवा
र्याणियजमानायशिक्षितौवसुवनेवसुधेयस्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं०
३०

वी०॥६॥ देवीस्तिस्रस्तिस्रो देवीः पतिमिंद्रमवर्द्धयन्
अस्पृक्षद्भारती दिवꣳ रुद्रैर्यज्ञꣳ सरस्वतीडा व
सुमती गृहान्वसुवने वसुधेयस्य व्यंतु यज ॥७॥ दे
व इंद्रो नराशꣳसस्त्रिवरूथस्त्रिवंधुरो देवमिंद्रम
वर्धयत् शतेन शितिपृष्ठानामाहितः सहस्रेण प्र

३०

वर्त्तते मित्रावरुणेदस्य होत्रमर्हतो बृहस्पतिः स्तोत्रम
श्विनाध्वर्यवं वसुवने वसुधेयस्य वेतु यज ॥८॥ देवो
दैव्यैर्वनस्पतिर्हिरण्यपर्णो मधुशाखः सुपिप्पलो दे
वमिंद्रमवर्धयत् दिवमग्रेणास्पृक्षदांतरिक्षं पृथि
वीमदृꣳहीद्वसुवने वसुधेयस्य वेतु यज ॥९॥ देवं ब

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥स॰॥
३९

र्हिर्बांरितीनां देवमिंद्रमवर्धयत् । स्वासस्थमिंद्रे
णासंनमन्यानर्हीं ष्यभ्यभटु सुवनेनसुधेयस्यवे॰
॥१०॥ देवो अग्निस्विष्टकृद्देवमिंद्रमवर्धयत् ॥ स्विष्टकृ
तेन्स्विष्टकृत्स्विष्टमद्य करोतु नो वसु॰ वे॰ ॥११॥ अग्नि
मद्य होतारमवृणीतायं यजमानः पचन्प क्तीः प ३९

८८०

चैन्पुरोडाशं बध्नन्निन्द्राय छागम् ॥ सूपस्था अद्य देवो
वनस्पतिरभवदिन्द्राय छागेन । अघत्तं मेदस्तः प्रति प
चताग्रभीदवीवृधत्पुरोडाशेन । त्वामद्य ऋषे ॥१२
॥८१॥ होता यक्षत्समिधानं महद्यशः सुसमिद्धं वरेण्य
मग्निमिंद्रं वयोधसम् । गायत्रीं छंद इंद्रियं त्र्यविं
गां वयो दधद्वेत्वाज्यस्य होतर्यज ॥१॥ होता यक्षत्त

८८१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥सं॰॥
३२

नूनपातमुभिदं यं गर्भमदितिर्दधे शुचिमिंद्रं व
योधसम् उष्णिहं छंद इंद्रियं दित्यवाहं गां वयो
दधद्वे॰ ॥२ होता यक्षदीडेन्यमीडितं वृत्रहंतम
मिडाभिरीड्यं सहः सोममिंद्रं वयोधसम् अ
नुष्टुभं छंद इंद्रियं पंचाविं गां वयो दधद्वे॰ ॥३॥ ३२

होता यक्षत्सुबर्हिषं पूषण्वंतममर्त्यं सीदंतं बर्हि
षि प्रियेमृतेंद्रं वयोधसम् बृहतीं छंद इंद्रियं त्रिव
त्सं गां वयो दधद्वे॰ ॥४॥ होता यक्षद्व्यचस्वतीः सु
प्रायणा ऋतावृधो द्वारो देवीर्हिरण्ययीर्ब्रह्माणम्
इंद्रं वयोधसं पंक्तिं छंद इहेंद्रियं तुर्यवाहं गां वयो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं०
३३

दधद्व्यंत्वाज्यस्य हो० ॥५॥ होता यक्षत्सुपेशसा सुशि
ल्पे बृहती उभे नक्तोषासा न दर्शते विश्वमिन्द्रं व
योधसम् त्रिष्टुभं छंद इहेन्द्रियं पष्ठवाहं गां वयो द
धद्वीतामाज्यस्य होतर्यज ६ होता यक्षत्प्रचेतसा
देवानामुत्तमं यशो होतारा दैव्या कवी सयुजेन्द्रं वयो

३३

धसम् जगतीं छंद इंद्रियमनड्वाहं गां वयो दधद्वीता०
यजे ॥७॥ होता यक्षत्पेशस्वतीस्तिस्रो देवीर्हिरण्य
यीर्भारतीर्बृहतीर्महीः पतिमिंद्रं वयोधसम् वि
राजं छंद इहेन्द्रियं धेनुं गां न वयो दधद्व्यंत्वाज्यस्य०
॥८॥ होता यक्षत्सुरेतसं त्वष्टारं पुष्टिवर्द्धनं रू

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ सं॰ ॥

३६

पाणिविभ्रतंत्रुष्टथक्पुष्टिमिंद्रंवयोधसम् ॥ द्विपदंछंद
इंद्रियमुक्षाणंगान्नवयोदधद्वे॰यजे ॥ ९ ॥ होतायक्षद्व
नस्पतिंशमितारंशतक्रतुंहिरण्यपर्णमुक्थि
नंरशनांबिभ्रतंवशिंभगमिंद्रंवयोधसम् ॥ ककु
भंछंदइहेंद्रियंवशांवेहतंगांवयोदधद्वे॰ ॥ १० ॥

३६

होतायक्षत्स्वाहाकृतीरग्निंगृहपतिंपृथग्वरुणं
भेषजंकविंक्षत्रमिंद्रंवयोधसम् ॥ अतिछंदसं
छंदइंद्रियंबृहदृषभंगांवयोदधद्व्यंतु॰यजे ॥ ११ ॥
॥ ८७ देवंबर्हिर्वयोधसंदेवमिंद्रमवर्द्धयत् ॥ गा
यत्र्याछंदसेंद्रियंचक्षुरिंद्रेवयोदधद्वसुवनेवसु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं०
३५
स्य

धेयस्य वेतु यज ॥१॥ देवीर्द्वारो वयोधसꣳ शुचिमिंद्रम
वर्धयन् । उष्णिहा छंदसेंद्रियं प्राणमिंद्रे वयो दधद्व
सुवने वसुधेयस्य व्यंतु यज ॥२॥ देवी उषासानक्ता देव
मिंद्रं वयोधसं देवी देवमवर्धतां । अनुष्टुभा छंदसेंद्रि
यं बलमिंद्रे वयो दधद्वसुवने वसुधेयस्य वीतां यज ॥३॥

३५

देवी जोष्ट्री वसुधिती देवमिंद्रं वयोधसं देवी देवम
वर्धतां । बृहत्या छंदसेंद्रियꣳ श्रोत्रमिंद्रे वयो दधे
द्वसुवने वसुधेयस्य वी० ॥४॥ देवी ऊर्जाहुती दु
घे सुदुघे पयसेंद्रं वयोधसं देवी देवमवर्द्धतां ॥ प
ङ्क्त्या छंदसेंद्रियꣳ शुक्रमिंद्रे वयो दधद्वसुवने वसु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥स॰॥
३६

धेयस्यवी॰॥ ५॥ देवा देव्या होतारा देवमिंद्रं वयोध
सं देवौ देवमवर्द्धतां॥ त्रिष्टुभा छंदसेंद्रियं त्विषिमिं
द्रे वयो दधद्वसुवने वसुधेयस्य वी॰॥ ६॥ देवीस्तिस्र
स्तिस्रो देवीर्वयोधसं पतिमिंद्रमवर्द्धयन्॥ जगत्या
छंदसेंद्रियं शूषमिंद्रे वयो दधद्वसुवने वसुधेयस्य व्यं॰॥

३६

॥७॥ देवो नराशंसो देवमिंद्रं वयोधसं देवो देवमवर्द्ध
यत्॥ विराजा छंदसेंद्रियं रूपमिंद्रे वयो दधद्वसुव
ने वसुधेयस्य वेतु यज॥ ८॥ देवो वनस्पतिर्देवमिंद्रं
वयोधसं देवो देवमवर्द्धयत्॥ द्विपदा छंदसेंद्रियं भग
मिंद्रे वयो दधद्वसुवने वसुधेयस्य वे॰॥ ९॥ देवं बर्हिः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं॰ ३० ५

र्गिरितीनां देव मिंद्रं वयोधसं देवं देवम वर्धयत्॥ ककु ६८१
भाछंदसेंद्रियं यशाइंद्रे वयो दधद्वसुवने वसुधेयस्य वे॰
॥१०॥ देवो अग्निः स्विष्टकृद्देव मिंद्रं वयोधसं देवो देव
मवर्धयत्॥ अतिछंदसा छंदसेंद्रियं क्षत्रमिंद्रे वयो दध
द्वसुवने वसुधेयस्य वे॥ ११॥ अग्निमद्य होतारमवृ

३०

६८२

णीतायं यजमानः पचन्पक्तीः पचन्पुरोडाशं बध्नन्निं
द्राय वयोधसे छागम्॥ सूपस्था अद्य देवो वनस्पति
रभवदिंद्राय वयोधसे छागेन॥ अघत्तं मेदस्तः प्रति
पचताग्रभीदवीवृधत्पुरोडाशेन॥ त्वामद्य ऋषे
॥१२॥ आर्षेय ऋषीणां नपादवृणीतायं यजमानो बहुभ्य आ संगतेभ्य एष मे देवेषु वसु वार्यायक्ष्यत इति ता या देवा देव दानान्यदुस्तान्यस्मा आ च शास्स्वा च गुरस्वेषितश्च होतरसि भद्रवाच्याय प्रेषितो मानुषः सूक्तवाकाय सूक्ता ब्रूहि॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ सं०॥
३८

त्रैं पुरुष्या शुक्रं देवो निष्टुभा त्विषिमः॥ जगत्या भूषेंवि
राज्ञा रूपं छिप्रदाभगं रुद्रभाय ३ो तिषं छंदसा हस्त्रीमिं
द्राय वयोधसे छा॥ मिंद्राय वयोधसे घागेन॥ छ
॥ १३॥ छ॥ छ॥ इति शुक्लयजुः काण्वसंहिता
यां त्रिंशोध्यायः॥ छ॥ छ॥ छ॥ छ॥ छ॥ ३८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

६५

इति तृतीयदशकं समाप्तः

॥७॥ अथ चतुर्थदशकं प्रारंभः ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥सं०॥
॥१॥

श्रीगणेशाय नमः॥ हरिः ॐ॥ समिद्धो अञ्जन्कृदरं
मतीनांघृतमग्ने मधुमत्पिन्वमानः॥ वाजीवहन्वाजि
नंजातवेदोदेवानांवक्षिप्रियमासधस्थं॥१॥ घृते
नांजन्त्संपथोदेवयानान्प्रजानन्वाज्यप्येतुदेवान्
अनुत्वासप्तेप्रदिशःसचंतांस्वधामस्मैयजमा ॥१॥

नायधेहि॥२॥ ईड्यश्चासिवंद्यश्चवाजिन्नाशुश्चा
सिमेध्यश्चसप्ते॥ अग्निष्ट्वादेवैर्वसुभिःसजोषाःप्री
तंवह्निंवहतुजातवेदाः॥३॥ स्तीर्णंबर्हिःसुष्टरीमा
जुषाणोरुपृथुप्रथमानंपृथिव्यां॥ देवेभिर्युक्तम
दितिःसजोषाःस्योनंकृण्वानासुवितेदधातु॥४॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अ सं ॥
॥२॥

एताउवः सुभगाविश्वरूपाविपक्षोभिःश्रयमा
णाउदातैः ऋष्वाः सतीः कवषः शुंभमानाद्वा
रोदेवीः सुप्रायणा भवंतु ५ अंतरामित्रावरु
णाचरंतीमुखंयज्ञानामभिसंविदाने। उषासा
वांसुहिरण्येसुशिल्पेऋतस्ययोनाविहसाद ॥२॥

यामि ॥ ६ ॥ प्रथमावां सरथिनासुवर्णादेवौपश्यं
तौभुवनानिविश्वा। अपिप्रयंचोदनावांमिमा
नाहोताराज्योतिः प्रदिशादिशंता ॥ ७ ॥ आदित्यै
र्नोभारतीवष्टुयज्ञं सरस्वतीसहरुद्रैर्नआवीत् ॥
इडोपहूतावसुभिः सजोषायज्ञंनोदेवीरमृ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥सं॰॥
॥२॥

तेषुधत्त ॥८॥ त्वष्टावीरंदेवकामंजजानत्वष्टु
रर्वाजायतआशुरश्वः ॥ त्वष्टेदंविश्वंभुवनं
जजानबहोःकर्त्तारमिहयक्षिहोतः ॥९॥ अश्वो
घृतेनत्मन्यासमक्तउपदेवांऋतुशःपाथएतु
वनस्पतिर्देवलोकंप्रजानन्नग्निनाहव्यास्व ॥२॥

दितानिवक्षत् ॥१०॥ प्रजापतेस्तपसावावृधानः
सद्योजातोदधिषेयज्ञमग्ने ॥ स्वाहाकृतेनहविषा
पुरोगायाहिसाध्याहविरदंतुदेवाः ॥११॥ केतुंकृ
ण्वन्नकेतवेपेशोमर्याअपेशसे ॥ समुषद्भिरजा
यथाः ॥१२॥ जीमूतस्येवभवतिप्रतीकंयद्वर्मी

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ सं॰ ॥
॥ ५४ ॥

७०३

यातिसमदामुपस्थे ॥ आनाविद्धयातन्वाजयत्वंस
त्वावर्मणोमहिमापिपर्त्तु ॥ १३ ॥ धन्वनागाधन्वना
जिंजयेमधन्वनातीव्राःसमदोजयेम ॥ धनुःशत्रो
रपकामंकृणोतिधन्वनासर्वाःप्रदिशोजयेम ॥ १४ ॥
तेआचरंतीसमनेवयोषामातेवपुत्रंबिभृता ॥ ५४ ॥

७०४

मुपस्थे ॥ अपशत्रून्विध्यतांसंविदानेआर्त्नीइ
मेविष्फुरंतीअमित्रान् ॥ १५ ॥ वक्ष्यंतीवेदागनीगं
तिकर्णंप्रियंसखायंपरिषस्वजाना ॥ योषेवसिं
क्ते॰विततांधिधन्वंज्याइयंसमनेपारयंती ॥ अ
हिरिवभोगैःपर्येतिबाहुंज्यायाहेतिंपरिबाधमा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥सं॥
॥५॥

न्पुमां

नः॥ हस्तघ्नो विश्वा वयुनानि विद्वान्पुमांꣳसं परि
पातु विश्वतः॥ १७॥ बह्वीनां पिता बहुरस्य पुत्रः श्चि
श्चा कृणोति समनावगत्य॥ इषुधिः संकाः पृत
नाश्च सर्वाः पृष्ठे निनद्धो जयति प्रसूतः॥ १८॥
सुपर्णं वस्ते मृगो अस्या दंतो गोभिः संनद्धा पत

॥२५॥

७८५

ति प्रसूता॥ यत्रा नरः सं च वि च द्रवंति तत्रास्मभ्यमि
षवः शर्म यꣳसन्॥ १९॥ वनस्पते वीड्वंगो हि भूया अ
स्मत्सखा प्रतरणः सुवीरः॥ गोभिः संनद्धो असि वीळ
यस्वास्थाता ते जयतु जेत्वानि॥ २०॥ रथे तिष्ठन्नयति
वाजिनः पुरो यत्रयत्र कामयते सुषारथिः॥ अभी

७८६

॥सं० ६॥

रनां महिमानं पनाय तु मनः पश्चादनु यंति रश्मयः ॥२१॥ आजंघंति सान्वेषां जघनाँ उप जिघ्नते ॥ अश्वाजनि प्रचेतसोऽश्वान्समत्सु चोदय ॥२२॥ उप पश्चा स्य पृथिवीमुत द्यां पुरुत्रा ते मनुतां विष्ठितं जगत् । स दुंदुभे सजूरिंद्रेण देवैर्दूराद्दवीयो अप सेध शत्रून् ॥ ६ ॥

न् ॥२३॥ यदक्रंदः प्रथमं जायमान उद्यन्त्समुद्रादुत वा पुरीषात् ॥ श्येनस्य पक्षा हरिणस्य बाहू उपस्तु त्यं महि जातं ते अर्वन् ॥२४॥ यमेन दत्तं त्रित एनमा युनगिंद्र एणं प्रथमो अध्यतिष्ठत् ॥ गंधर्वो अस्य र शनामगृभ्णात्सूरादश्वं वसवो निरतष्ट ॥२५॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ स्वं० ॥
॥ ८ ॥ ७९९

असि यमो अस्यादित्यो अर्वन्नसि त्रितो गुह्येन व्र
तेन असि सोमेन समया विपृक्त आहुस्ते त्रीणि दि
वि बंधनानि २६ त्रीणि त आहुर्दिवि बंधनानि त्रीण्य
प्सु त्रीण्यंतः समुद्रे उतेव मे वरुणश्छंत्स्यर्वन्यत्रा
त आहुः परमं जनित्रम् ॥ २७ ॥ इमा ते वाजिन्नवमा
॥ ८ ॥

८००

र्जनानीमा शफानां सनितुर्निधाना अत्रा ते भद्रा
रशना अपश्यमृतस्य या अभिरक्षंति गोपाः २८
आत्मानं ते मनसारादजानामवो दिवा पतयंतं पतं
गं शिरो अपश्यं पथिभिः सुगेभिररेणुभिर्जेहमा
नं पतत्रि २९ अत्रा ते रूपमुत्तममपश्यं जिगीष

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥सं॥
॥८॥ षमाणमिषआपदेगोः यदातेमर्तोअनुभोगमानळ्
दिद्ग्रसिष्ठओषधीरजीगः ॥२०॥ अनुत्वारथोअ
नुमर्योअर्वन्ननुगावोनुभगःकनीनाम् अनु
व्रातासस्तवसख्यमीयुरनुदेवाममिरेवीर्यंते
॥२१॥ हिरण्यशृंगोयोअस्यपादामनोजवाअ
॥८॥

वरइंद्रआसीत् देवाइदस्यहविरद्यमायन्यो
अर्वन्तम्प्रथमोअध्यतिष्ठत् ॥२२॥ ईर्मान्तासः सि
लिकमध्यमासःसंशूरणासोदिव्यासोअत्याः
हंसाइवश्रेणिशोयतन्तेयदाक्षिषुर्दिव्यमज्ममश्
वाः ॥२३॥ तवशरीरंपतयिष्ण्वर्वन्तवचित्तंवातइ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं० ८०३
१

वध्रजीमान् तवश्रृङ्गाणि विष्ठितापुरुत्रा
रण्येषुजर्भुराणाचरंन्ति ३४ उपप्रागाच्छ
सनंवाज्यर्वादेवद्रीचामनसादीध्यानः अजः
पुरोनीयतेनाभिरस्यानुपश्चात्कवयोयन्तिरे
भाः ३५ उपप्रागात्परमंयत्सधस्थमर्वाँ२ १

८०४

अच्छापितरंमातरंच अद्यादेवाञ्जुष्टतमोहिग
म्या अथाशास्तेदाशुषेवार्याणि ३६ २ समि
द्धोअद्यमनुषोदुरोणेदेवोदेवान्यजसिजातवे
दः आचवहमित्रमहश्चिकित्वान्त्वंदूतःकवि
रसिप्रचेताः ३७ तनूनपात्पथऋतस्ययाना

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं०
॥ १० ॥

म्मध्वासमञ्जन्त्स्वदयासुजिह्व । मन्मानिधीभि
रुतयज्ञमृन्धन्देवत्राचकृणुह्यध्वरंनः ॥ २८ ॥ नरा
शंसस्यमहिमानमेषामुपस्तोषामयजतस्ययज्ञैः
येसुक्रतवःशुचयोधियन्धास्स्वदंतिदेवाउभया
निहव्या ॥ २९ ॥ आजुह्वानईड्योवन्द्यश्चायाह्य ॥ १० ॥

ग्नेवसुभिस्सजोषाः । त्वंदेवानामसियह्वहोतासए
नान्यक्षीषितोयजीयान् ॥ ३० ॥ प्राचीनंबर्हिःप्रदिशा
पृथिव्यावस्तोरस्यावृज्यतेअग्रेअह्नाम् ॥ व्युप्रथ
तेवितरंवरीयोदेवेभ्योअदितयेस्योनम् ॥ ३१ ॥ व्य
चस्वतीरुर्वियाविश्रयंताम्पतिभ्योनजनयश्शुम्भ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ते

॥११॥

मानाः देवीर्द्वारो बृहतीर्विश्वमिन्वा देवेभ्यो भवत सुप्रा
यणाः ॥७२॥ आसुष्वयंती यजते उपाके उषासानक्ता सदतां
न्नियोनौ ॥ दिव्ये योषणे बृहती सुरुक्मे अधि श्रियं
शुक्रपिशन्दधाने ॥७३॥ दैव्या होतारा प्रथमा सुवाचा
मिमाना यज्ञम्मनुषो यजध्यै ॥ प्रचोदयंता विदथेषु का

॥११॥

रू प्राचीनञ्ज्योतिः प्रदिशा दिशन्ता ॥७४॥ आ नो यज्ञ
म्भारती तूयमेत्विळा मनुष्वदिह चेतयन्ती ॥ तिस्रो दे
वीर्बर्हिरेदं स्योनं सरस्वती स्वपसः सदन्तु ॥७५॥
य इमे द्यावापृथिवी जनित्री रूपैरपिंशद्भुवनानि
विश्वा ॥ तमद्य होतरिषितो यजीयान्देवन्त्वष्टारमिह य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥सं॰॥
॥१२॥

क्षिविद्वान् ॥ ४६ ॥ उपावसृजत्मन्यासमञ्जन्देवानाम्पा
थऋतुथाहवीꣳषि ॥ वनस्पतिः शमितादेवोअग्निस्स्वद
न्तुहव्यंमधुनाघृतेन ॥ ४७ ॥ सद्योजातोव्यमिमीतयज्ञम
ग्निर्देवानामभवत्पुरोगाः ॥ अस्यहोतुः प्रदिश्यृतस्य
वाचिस्वाहाकृतꣳहविरदन्तुदेवाः ॥ ४८ ॥ ३ ॥ अग्न
॥१२॥

येगायत्रायत्रिवृतेराथंतरायाष्टाकपालइन्द्रायत्रैष्टु
भायपञ्चदशायबार्हतायैकादशकपालोविश्वेभ्योदे
वेभ्योजागतेभ्यस्सप्तदशेभ्योवैरूपेभ्योद्वादशकपालो
मित्रावरुणाभ्यामानुष्टुभाभ्यामेकविꣳशाभ्यांवैरा
जाभ्यां ॥ पयस्याबृहस्पतयेपाङ्क्तायत्रिणवायशाक्व

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रायचरुस्सवित्रओघ्निहायत्रयस्त्रिꣳशायैरेवता
यद्वादशकपालः प्राजापत्यश्चरूरौद्रस्यैविष्णुपत्न्यै
१३ चरुरग्नयेवैश्वानरायद्वादशकपालोनुमत्याअ
ष्टाकपालः ॥५०॥ आग्नेयः कृष्णग्रीवस्सारस्वती
मेषीबभ्रुस्सौम्यः पौष्णश्श्यामश्शितिपृष्ठोबार्हस्प १३

त्यः शिल्पोवैश्वदेवः ॥ ऐन्द्रोरुणोमारुतः कल्माषऐन्द्रा
ग्नस्संहितोधोरामः सावित्रोवारुणः कृष्णएकशि
तिपात्पेत्वः ॥५१॥ अग्नयेनीकवतेरोहिताञ्जिरनड्वा
न्धोरामौसावित्रौपौष्णौरजतनाभीवैश्वदेवौपि
शङ्गौतूपरौ ॥ मारुतः कल्माषआग्नेयः कृष्णोजस्सा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ सं० ॥
॥ १४ ॥ रस्वतीमेषीवारुणः पेत्वः ॥ ५३ ॥ ५ ॥ ४५ ॥ इतिशुक्लयजुःका
ण्वसंहितायां ॥ पंचानुवाकेनद्विपंचशत्रयत्रिंशतितमोध्या
यः ॥ ७ ॥ हरिः ॐ ॥ अस्याजरासोदमामरित्राअर्चद्धू
मासोअग्नयःपावकाः ॥ श्वितीचयः श्वात्रासोभुरण्य
वोवनर्षदोवायवोनसोमाः ॥ १ ॥ हरयोधूमकेतवोवातजू ॥ १४ ॥

ताउपद्यवि ॥ यतन्तेवृथगग्नयः ॥ २ ॥ यजानोमित्रावरु
णायजादेवांऋतंबृहत् ॥ अग्नेयक्षिस्वन्दमम् ॥ ३ ॥
युक्ष्वाहिदेवहूतमां ॥ अश्वांअग्नेरथीरिव ॥ निहोतापूर्व्य
स्सदः ॥ ४ ॥ द्वेविरूपेचरतःस्वर्थेअन्यान्यावत्समुपधा
पयेते ॥ हरिरन्यस्यांभवतिस्वधावाञ्छुक्रोअन्यस्यां

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ सं० ॥
॥ १५ ॥

दक्षो सुवर्चाः ॥ ५ ॥ अयमिह प्रथमो धायि धातृभिर्होता यजिष्ठो अध्वरेष्वीड्यः ॥ यमप्नवानो भृगवो विरुरुचुर्वनेषु चित्रं विभ्वं विशेविशे ॥ ६ ॥ त्रीणि शता त्री सहस्राण्यग्निं त्रिंशच्च देवा नव चासपर्यन् ॥ औक्षन्घृतैरस्तृणन्बर्हिरस्मा आदिद्धोतारं न्यसादयन्त ॥ ७ ॥ मूर्द्धा

नं दिवो अरतिं पृथिव्या वैश्वानरमृत आ जातमग्निम् ॥ कविं सम्राजमतिथिं जनानामासन्ना पात्रं जनयन्त देवाः ॥ ८ ॥ अग्निर्वृत्राणि जंघनद्द्रविणस्युर्विपन्यया ॥ समिद्धः शुक्र आहुत ॥ ९ ॥ विश्वेभिः सोम्यं मध्वग्न इन्द्रेण वायुना ॥ पिबा मित्रस्य धामभिः ॥ १० ॥ आ यदिषे नृ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥सं०॥ वि
॥१६॥

पतिंतेजआनरम्भुरेतोनिषिक्तंघोरभीके ॥ अग्निःशर्द्धं
मनवद्यंयुवानंऽस्वाध्यंजनयत्सूदयच्च ॥११॥ अग्नेश
र्द्धमहतेसौभगायतवद्युम्नान्युत्तमानिसन्तु ॥ संजास्पत्य
ंऽसुयममाकृणुष्वशत्रूयतामभितिष्ठामहांऽसि ॥१२॥
स्वाऽहिमन्द्रतममर्कशोकैर्वव्रमहेमहिनःश्रोष्यग्ने ॥
॥१६॥

इन्द्रंनत्वाशवसादेवतावायुंपृणंतिराधसानृतमाः ॥१३॥
तेअग्नेस्वाहुतप्रियासःसंतुसूरयः ॥ यंतारोयेमघवा
नोजनानामूर्वान्दयंतगोनाम् ॥१४॥ श्रुधिश्रुत्कर्णवन्हि
भिर्देवैरग्नेसयावभिः ॥ आसीदंतुबर्हिषिमित्रोअर्य
माप्रातर्यावाणोअध्वरम् ॥१५॥ विश्वेषामदितिर्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥सं०॥
॥१६॥

द्वियानां विश्वेषामतिथिर्मानुषाणाम्‌ अग्निर्देवानामवः
आवृणानः सुमृळीको भवतु जातवेदाः ॥१५ महो अग्नेः
समिधानस्य शर्मण्यनागा मित्रे वरुणे स्वस्तये श्रेष्ठे
स्याम सवितुः सवीमनि तद्देवानामवो अद्या वृणीमहे
॥१६ आपः शिशिप्सुस्तर्यो भगा वोन सन्त्वं तं जरि ॥१६॥

तारस्त इंद्र ॥ याहि वायुर्न नियुतो नो अच्छा त्वं हि धीभि
र्दयसे वि वाजान्‌ ॥१८ गाव उपावतावृतं मही यज्ञस्य
रप्सुदा उभा कर्णा हिरण्यया ॥१९ यदद्य सूर उदिते ना
गा मित्रो अर्यमा सुवाति सविता भगः ॥२० आ सुते
सिंचत श्रियं रोदस्योरभिश्रियम्‌ रसा दधीत वृ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं०

१८ षुभम् तं प्रत्नथायं वेनश्चोदयत् २१ आ तिष्ठंतं परि १८
विश्वे अभूषंछ्रियो वसानश्चरति स्वरोचिः महत्त
द्वृष्णो असुरस्य नामा विश्वरूपो अमृतानि तस्थौ २२
प्र यो महे मंदमानायांधसोर्चा विश्वानराय विश्वा
भुवे इंद्रस्य यस्य सुमखं सहो महि श्रवो नृम्णं च

रोदसी सपर्यतः २३ बृहन्निदिध्म एषां भूरि शस्तं
पृथुः स्वरुः येषामिंद्रो युवा सखा २४ इंद्रेहि म
त्स्यंधसो विश्वेभिः सोमपर्वभिः महाँ अभिष्टिरोज
